Gita sridhar tikka sahit;
Benaras, 1965

25417



॥श्रीगणेशायनमः॥ ॐ नमः कमलदलविपुलनयनाभिरामायश्रीनारायणायशेषाशेषमुखव्याख्याचातुर्यंत्वेकवक्त्रतः दधानमद्भुतंवंदे
परमानंदमाधवं १ श्रीमाधवंप्रणम्योमाधवंविश्वेशमादरात् तद्भक्तियंत्रितःकुर्वेगीताव्याख्यांसुबोधिनीं २ भाष्यकारमतंसम्यक्तद्व्याख्यातॄंगिरस्त
थायथामतिसमालोच्यगीताव्याख्यांसमारभे गीताव्याख्यायतेयस्याःपाठमात्रप्रयत्नतः सेयंसुबोधिनीटीकासदाध्येयामनीषिभिः ४
इहखलुसकललोकवंदितचरणोविहितावतारःपरमकारुणिकोभगवान्देवकीनंदनस्तत्त्वाज्ञानविजृंभितशोकमोहविभ्रंशितविवेक
तयानिजधर्मत्यागपरधर्माभिसंधिपरमर्जुनंधर्मज्ञानरहस्योपदेशप्लवेनतस्माच्छोकमोहसागरादुद्धारतमेवश्रीभगवदुपदिष्टमर्थं
कृष्णद्वैपायनःसप्तभिःश्लोकशतैरुपनिबबंधतत्रचप्रायशःश्रीकृष्णमुखनिःसृतानेवश्लोकानलिखत्कांश्चित्तत्संगतयेस्वयमप्यरचयत्।

॥श्रीगणेशायनमः धृतराष्ट्रउवाच धर्मक्षेत्रेकुरुक्षेत्रेसमवेतायुयुत्सवः मामकाःपांडवाश्चैवकिमकुर्वतसंज-
यय १ संजयउवाच दृष्ट्वातुपांडवानीकंव्यूढंदुर्योधनस्तदा॥ १ यद्यप्युक्तंगीतामाहात्म्ये गीताःसुगीताःकर्त्तव्याःकिमन्यैःशा-
स्त्रविस्तरैःयास्वयंपद्मनाभस्यमुखपद्माद्विनिःसृता इतितत्रतावद्धर्मक्षेत्रइत्यादिनाविषीदन्निदमब्रवीदित्यंतेनग्रंथेनश्रीकृष्णार्जुनसं
वादप्रस्तावायकथानिरूप्यते ततःपरमासमाप्तेस्तयोर्धर्मज्ञानार्थसंवादः तत्रधर्मक्षेत्रइत्यनेनश्लोकेनधृतराष्ट्रोहस्तिनापुरस्थितंस्वसा
रथिंसमीपस्थंसंजयंप्रतिकुरुक्षेत्रवृत्तांतंसाक्षात्पश्यन्निव धृतराष्ट्रःपरिनिवेदयामासधर्मक्षेत्रेत्यादि हेसंजयधर्मभूमौकुरुक्षेत्रेमत्पुत्रादु
र्योधनादयःअपरेपांडुपुत्राःपांडवाश्चयुयुत्सवोयोद्धुमिच्छवःसमवेतामिलिताःसंतःकिमकुर्वतकिंकृतवंतःकिंविदधुः १ संजयउवाच तत्पु
नस्तेषुमिलितेषुसत्सुराजादुर्योधनः अनेकवीरसमुदायेनलब्धदीप्तिर्दुःखेनयोद्धुमिच्छुमशक्यः दुर्योधनोराजाआचार्यंधनुर्वेदोपदेष्टारंद्रो
णमुपसंगम्याधिकेनाचार्यत्वकृतेनसंगम्यसंगतोभूत्वाद्रोणाचार्यसमीपंगत्वावचनमनंतरंवक्ष्यमाणंवाक्यमब्रवीत्उवाचकिं॥

गी· टी· त्वापांडवानीकंपांडवानांयुधिष्ठिरादीनामनीकंसैन्यंव्यूढंचक्रादिव्यूहरचनयाव्यवस्थितंसंपन्नंदृष्ट्वाअवलोक्यदुर्योधनोद्रोणंप्रति
श्री· प्र· पद्यवचः अवोचत तदेवनवभिः श्लोकैः संजयोधृतराष्ट्रंप्रतितदेववचनमाह २ पश्यैतामिति हेआचार्यपांडुपुत्राणांपांडवानामेतांमह
२ तींचमूंसेनांसप्ताक्षौहिणीपरिमितांपश्यावलोकयकथंभूतांतवशिष्येणद्रुपदपुत्रेणधृष्टद्युम्नेनधीमतातवशिष्यत्वेनसेनान्युहविन्यासादिबु
द्धिमताव्यूढांव्यूहरचनयास्थापितांतवशिष्येणेति तवापिपांडवसेनायाकश्चिदनुरागोस्तीतिकौटिल्यवचनंदुर्योधनस्येति पांडुः पांडुरोध
मस्तत्पुत्राजारपुत्राइतिसाभिप्रायवचनंदुर्योधनस्य ३ अत्रेति अत्रास्यांचम्वांअमीशूराःशौर्येणक्षात्रधर्मेणोपेतामहेष्वासाइषवो
बाणाः अस्यंतेक्षिप्यंतेयैरितीष्वासाःधनूंषिमहांतइष्वासायेषांतेयुधिसंग्रामेभीमार्जुनसमाःभीमोभियाभयेनभीयतेचकितैरेववीरांत

आचार्यमुपसंगम्यराजावचनमब्रवीत् २ पश्यैतांपांडुपुत्राणामाचार्यमहतींचमूं व्यूढांद्रुपदपुत्रेणतवशिष्येण।
धीमता ३ अत्रशूरामहेष्वासाभीमार्जुनसमायुधियुयुधानोविराटश्चद्रुपदश्चमहारथः ४ धृष्टकेतुश्चेकितानःकाशि
राजश्चवीर्यवान् पुरुजित्कुंतिभोजश्चशैब्यश्चनरपुंगवः ५॥ रैरविलोक्यतइतिभीमः अर्जुनःपशुपतिसंग्रामोपार्जितयशोविभू

तिभिरर्जुनंपांडुरंसंपादितंविश्वंयेनसोयमर्जुनःतौभीमार्जुनौअत्रातिप्रसिद्धौयोद्धारौताभ्यांतुल्याःसमाःशूराःसंतितानेवनामभिर्निर्दि
शतियुयुधानःसात्यकिर्वीरैर्वैरेवमिश्रीभावेनयुद्धाविष्टः युमिश्रणाइतिधातुपाठात् विगतोविपक्षभूतोराट् राजायस्यशत्रुसूदनस्यसविरा
टः द्रुमवदृक्षवत्संग्रामेनिश्चलौपादौयस्यसद्रुपदःमहारथःप्रत्येकंमहारथत्वविशेषणाम्· ४ धृष्टकेतुरितिधृष्टःप्रगल्भःशत्रुविनाशनः राम
केतुश्चिन्हंध्वजादिर्यस्यधृष्टानांरणेप्रगल्भानांकेतुर्विनाशकइतिवाधृष्टकेतुश्चेकितानःसंग्रामकुशलःचेकितानोनामेकोराजाचका २
शिराजःकाशीब्रह्मतत्वप्रकाशोयस्यांनिवसतःसुलभःसाकाशितस्याराजासःवैरिपुरविजयीशैब्यःसंग्रामविजयार्हःनरपुंगवोनरश्रेष्ठः ५॥

॥श्रीकाशीजीमेमहल्लाघुघुरानासामाकीगलीश्रीयुतवाबूहरखचंदजीकेबाडेमे॥
॥दुर्गाप्रसादकसेरेकेगणेशयंत्रालयमेगीताश्रीधरीटीकासंयुक्तछापीगईलिखासीतारामिमश्र
छापनेवालापुन्वासीजिसेलेनाहोयसोचान्दनीचौकमेकुंजगलीकेपच्छिमफाटककेपासदु
॥र्गाप्रसादपोथीवालेकीदुकानमेमिलैगी॥ मी०॥ फाल्गुनबदि॥ १३॥ सम्बत १९२३॥

अन्येचेति अपरे अन्ये सहायत्वेन समागता भगदत्तशल्यप्रभृतयः बहवः शूरा मदर्थे मत्प्रयोजनार्थं मम विजयसाधनार्थं वा त्य
क्तजीविताः जीवितं त्यक्तुमध्यवसिता इत्यर्थः नानाविधानि अनेकानि शस्त्राणि प्रहरणानि साधनानि येषां ते युद्धविशारदा निपुणा इत्य
र्थः ८ ततः किमित्यत आह अपर्याप्तमिति तत्तथाभूतैर्वीरैर्युक्तमपि भीष्मेणाभिरक्षितमपि अस्माकं बलं सैन्यमपर्याप्तं तैः सह योद्धुमसमर्थं
भाति इदं तु एतेषां पांडवानां बलं भीमेनाभिरक्षितं सत्पर्याप्तं समर्थं भाति तथा सैन्यद्वयपरिकल्पनस्य प्रयोजनमाह तत्पांडवानां बलं सैन्यं भी
ष्मेण सेनापतिनाऽभिरक्षितमस्माकं बलं प्रत्यपर्याप्तमपरिपूर्णं संख्यया सामर्थ्येन च इदं त्वस्माकं बलं पुनरेतेषां पांडवानां भीमाभिरक्षितं ब
लं प्रति पर्याप्तं [illegible] तथा च भाष्यांतरे भीमस्यैकपक्षपातित्वाद

अन्ये च बहवः शूरा मदर्थे त्यक्तजीविताः नानाशस्त्रप्रहरणाः सर्वे युद्धविशारदाः ८ अपर्याप्तं तदस्माकं बलं भी
ष्माभिरक्षितं पर्याप्तं त्विदमेतेषां बलं भीमाभिरक्षितं १० अयनेषु च सर्वेषु यथाभागमवस्थिताः भीष्ममेवाभिर
क्षंतु भवंतः सर्व एव हि ११ ॥ ९ तेषां बलं समर्थं भाति भीष्मस्योभयपक्षपातित्वादस्माकं बलमसमर्थं भातीति दुर्योधनस्या
भिप्रायः १० तस्माद्भवद्भिरेवं वर्तितव्यमित्याह अयनेष्विति हि यस्मात्सर्व एव भवंतो यूयं वीर्यवंतः प्रभवंतो वा वीराः सर्वेषु
समस्तप्रकारेषु अयनेषु च मार्गेषु गोमूत्रिकादिव्यूहस्थलेषु सर्वेषु यथाभागं व्यूहभागमनतिक्रम्य विभक्तां स्वां स्वां रणभूमिमपरि
त्यज्यावस्थिता वर्तमानाः संतो भीष्ममेव सेनानायकमभितः सर्वतो रक्षंतु स्वव्यूहादुत्थायाभिपालयंतु यथान्यैर्युध्यमानः पृष्ठ
तः कैश्चिन्न हन्येत तथा रक्षंतु भीष्मबलेनास्माकं जीवनमिति भावः ११ ॥ ❋ ॥ ६ ॥ ६ ६ ॥ ६ ६ ॥

तदेवं द्रोणं प्रति राज्ञा भीष्मस्य बहुमानपुरःसरं यदुक्तं तच्छ्रुत्वा भीष्मः किं कृतवान् तदाह तस्येति कुरुवृद्धः पितामहो गांगेयस्तस्यैवं द्रोणं प्रति नि
रूपणां कुर्वतो दुर्योधनस्य राज्ञो हर्षं प्रीतिं संजनयन् कुर्वन् उच्चैर्महांतं सिंहनादं विनद्य कृत्वा सर्वसत्वसंत्रासनं सिंहनादमिव नादं महदृहासं कृ
त्वा शंखं दध्मौ वा पूरितवानित्यर्थः प्रतापवान् १२ तदेवं सेनापतेर्भीष्मस्य युद्धोत्सवमालक्ष्य सर्वतो युद्धोत्सवः प्रवृत्त इत्याह ततइति ततो भी
ष्मशंखपूरणानंतरं शंखाश्च पटहभेर्यः पणवानकगोमुखाः सहसैव युगपदेवैकस्मिन्काले तत्क्षणमेवाभ्यहन्यंता स्फालिताः वादिताः स च शंखादि
शब्दस्तुमुलो महान् एकवर्णो विवेचनायोग्योऽभवत् पणवा आनका गोमुखा इत्याद्या वाद्यविशेषाः १३ ततः पांडवसैन्ये प्रवृत्तं युद्धोत्सवमाह ततइति प

तस्य संजनयन्हर्षं कुरुवृद्धः पितामहः सिंहनादं विनद्योच्चैः शंखं दध्मौ प्रतापवान् १२ ततः शंखाश्च भेर्यश्च पणवानकगोमु-
खाः सहसैवाभ्यहन्यंत स शब्दस्तुमुलोऽभवत् १३ ततः श्वेतैर्हयैर्युक्ते महति स्यंदने स्थितौ माधवः पांडवश्चैव दिव्यौ शंखौ प्रदध्मतुः
१४ पांचजन्यं हृषीकेशो देवदत्तं धनंजयः पौंड्रं दध्मौ महाशंखं भीमकर्मा वृकोदरः १५ अनंतविजयं राजा कुंतीपुत्रो युधिष्ठिरः॥

च भिः ततो दुर्योधनसैन्यवाद्यकोलाहलानंतरं श्वेतैः शुक्लैः कैलासाचलशिखरकल्पैः परसैन्योत्कर्षतनूकरणसामर्थ्यैर्वह्निवोढय इति वेगातिरेका
त्स्वभावतो वाहे आकाशे यांतीति हया विशिष्टा अश्वास्तैर्युक्ते संयोजिते महत्यादित्यमंडलकल्पे पूज्ये स्यंदने संग्रामभूमिप्रद्रवणशीले रथवरे स्थितौ
वर्तमानौ मा पा लक्ष्म्या धवः पतिः कृष्णः पांडवश्चार्जुनश्चापि दिव्यौ दिविभवौ वप्राकृतौ शंखौ प्रदध्मतुः परकीयवाद्यकोलाहलाभिभवसंपादनेन
दध्मतुः आपूरितवंतौ १४ तदेव विभागेन प्रदर्शयन्नाह पांचजन्यमिति हृषीकाणामिंद्रियाणामीशोऽधिष्ठाता लीलागृहीतदेहो भगवान् श्रीविष्णुः
पांचजन्यं पंचजनाख्यदैत्यदेहोद्भवं धनंजयो देवदत्तं वृकोदरो भीमकर्मा यस्य स भीमकर्मा महाशंखं पौंड्रं दध्मावापूरितवान् १५ अनंतविजयमि
ति युग्मं पूर्वश्लोकोक्तक्रियात्र संबध्यते कुंतीपुत्रो युधिष्ठिरो राजा पांडवानां स्वामी अनंतविजयं महाशंखं दध्मौ यस्य शंखस्यापूरणादनंतः॥

संततोविजयोभवतीतिअनंतविजयःतंनकुलःसुघोषंनामशंखंप्रदध्मौसहदेवोमणिपुष्पकंच १६ काश्यश्चेतिचापरंकाश्यःकाशिराजः
परमउत्कृष्टःइष्वासोधनुर्यस्यसः परमेष्वासःचपुनःशिखंडीमहारथशिखंडवान् सकलसुरासुराजयभीष्मभीष्मवधार्थमुत्पन्नःपौरुषेयशि
खायुक्तःअपरंधृष्टद्युम्नःचविराटश्चसात्यकिःसएवापराजितःअजेयःएतेसर्वेपृथक्पृथक्शंखानदध्मुर्वादयांचक्रुः इतिपरेणसंबंधः १७ द्रुपद
इति हेपृथिवीपतेधृतराष्ट्रद्रुपदश्चान्येद्रौपदेयाःद्रौपदीपुत्राःचापरंमहाबाहुःसौभद्रःएतेसर्वेपृथक्प्रत्येकंशंखान्दध्मुः १८ ॥ ९

नकुलःसहदेवश्चसुघोषमणिपुष्पकौ १६ काश्यश्चपरमेष्वासःशिखंडीचमहारथः धृष्टद्युम्नोविराटश्चसात्यकिश्चाप
राजितः १७ द्रुपदोद्रौपदेयाश्चसर्वशःपृथिवीपते सौभद्रश्चमहाबाहुःशंखान्दध्मुःपृथक्पृथक् १८ सघोषोधार्त्तराष्ट्रा
णांहृदयानिव्यदारयत् नभश्चपृथिवींचैवतुमुलोव्यनुनादयन् १९ अथव्यवस्थितान्दृष्ट्वाधार्तराष्ट्रान्कपिध्वजः प्रवृत्तेश
स्त्रसंपातेधनुरुद्यम्यपांडवः २० हृषीकेशंतदावाक्यमिदमाहमहीपते सेनयोरुभयोर्मध्येरथंस्थापयमेच्युत २१॥ ९

तस्यशंखनादस्यधार्त्तराष्ट्रान् प्रतिभयजनकत्वंसंजयआह सघोषइति सघोषस्तुमुलोघोरःपांडवसेनापतीनांशंखादिजोघोषोधार्त्तराष्ट्रा
णांत्वदीयानांहृदयानिव्यदारयत् विदारितवान्किंकुर्वन्नभआकाशंपृथिवींचव्यनुनादयन्प्रतिशब्दंकारयन्प्रतिध्वनिभिरापूरयन्नित्यर्थः
१९ एतस्मिन्समयेश्रीकृष्णमर्जुनोव्यज्ञापयामासततश्चतुर्भिश्लोकैःसंजयआह अथेति अथशंखपूरणानंतरंकपिध्वजःव्यवस्थितान्युद्धो
द्योगेनस्थितान्विशेषेणोत्साहेनावस्थितान्स्वशंखनादाद्धीरतरादपिअपरिभूतानधार्त्तराष्ट्रान्दृष्ट्वाशस्त्रसंपातेउत्साहफलेचधार्त्तराष्ट्राणांप्र
वृत्तेसतिधनुरुद्यम्यसज्जीकृत्य २० हृषीकेशमितिहेमहीपतेहृषीकेशमिदंवाक्यमाह किमितिहेअच्युतमेरथमुभयोःसैन्ययोर्मध्येस्थापय २१॥

युधामन्युः चापरं विक्रांतो वीर्यवान् उत्तमौजाः सौभद्रोभिमन्युरपरे द्रौपदेया द्रौपद्यास्तनयाः अथवा विक्रांतिपुधामन्युर्नामैकः
सः द्रौपदेया द्रौपद्यां पंचभ्यो युधिष्ठिरादिभ्यो जाताः प्रतिविंध्यादयः पंच एते सर्वे महारथा एव महा युद्धो त्सवाय आसमंतात् रथः श
स्त्राशस्त्रादिसंभृतो येषां ॥ ५ ॥ तेमहारथादीनां लक्षणं एको दशसहस्राणि योधयेद्यस्तु धन्विनां अस्त्रशास्त्रप्रवीणश्च महारथ इति स्मृतः अ
मितान्योधयेद्यस्तु संप्रोक्तोतिरथस्तु सः रथीत्वेकेन योयुध्येतन्न्यूनोर्धरथो मत इति ६ अस्माकमिति हे द्विजोत्तम तु पुनः ये अस्माकं धार्त्तरा
ष्ट्राणां विशिष्टाः पांडवसेनावीरेभ्योपि श्रेष्ठास्तान्निबोधावधारय मम सैन्यस्य ये नायकाः नेतारस्तान् ते तुभ्यं संज्ञार्थं सम्यग्ज्ञानार्थं ब्रवीमि कथयामी
त्यर्थः ७ तदेवाह भवानिति द्वाभ्यां भवान् त्वमेव तावत् यस्य तव युद्धकौशलोपदेशेन भगवान् पशुपतिरप्यर्जुनेन निर्जितः स

युधामन्युश्च विक्रांत उत्तमौजाश्च वीर्यवान् सौभद्रो द्रौपदेयाश्च सर्व एव महारथाः ६ अस्माकं तु विशिष्टा ये तान्निबो॥
ध द्विजोत्तम नायका मम सैन्यस्य संज्ञार्थं तान्ब्रवीमि ते ७ भवान्भीष्मश्च कर्णश्च कृपश्च समितिंजयः अश्वत्थामा विक
र्णश्च सौमदत्तिस्तथैव च ८ ॥ त्वं द्रोणः भीष्मः सकलक्षत्रक्षयकारिचक्रायुधलीलावतारपरशुरामस्यापि रणे भयंकरत्वात् भीष्मः
कर्णः वैरिणां कर्त्तनात् कर्णः कृपः शत्रुहिंसनशीलः कृपधातु हिंसार्थः समितिं संग्रामं जयतीति समितिंजयः अश्नुते व्याप्नोति अश्नाति
वैरिणो भक्षयति वा अथवा अश्व इवाभियाति गच्छति येन स्थाम्ना बलेन   तत्तादृशं सकललोकोपसंहा
रदक्षस्य दाक्षायणीपतेर्लीलावतार इत्यश्वत्थामा यस्मात् यस्यासमानवीरसंग्रामोपार्जितकीर्तिमंजरीवर्णनाया प्रत्यर्थिनः पार्थिवा विगा
नकर्णा बधिरा इवाद्विजन्तो भवंतीति विकर्णः पार्वतीपतिदत्तवरः सोमदत्तस्तस्य पौत्रः सौमदत्तिर्भूरिश्रवास्तथैव च वयं भवान्भीष्मश्चैत्र

श्वशुरान्निति चपुनः श्वशुरान्सुहृदश्चापश्यत् ततः किं कृतवानित्यतआह तानिति सकौंतेयः अर्जुनः सर्वान् विशेषेण बंधून्बध्नंतिपार्श्व
रस्नेहपाशैरितिबंधवस्तान् अवस्थितान्समीक्ष्य कृपया करुणयापरया तिशययाआविष्टोव्याप्तः युक्तः विषीदन् विशेषेणसीदन् अवसादं
ग्लानिंलभमानः इदमनंतरमुच्यमानमब्रवीत् २७ किमब्रवीदित्यपेक्षायामाह दृष्ट्वेममि त्यादियावदध्यायपरिसमाप्तिहेकृष्णभक्तानांले
शविलेषनाद्दुःखनाशनात्कृष्णेमंस्वजनंयुयुत्सुं योद्धुमिच्छंतंपुरतः सम्यगेवस्थितंबंधुजनंदृष्ट्वामदीयानिगात्राणिकरचरणादीनिअंगानिसी
दंतिविशीर्णानिशिथिलान्यनुत्साहानीभवंति विशीर्यंतइत्यर्थः चपुनःमुखंपरितःसमंतात्शुष्यतिनिर्द्रवीभवति किंचवेपथुरितिममशरीरेवे

श्वशुरान्सुहृदश्चैवसेनयोरुभयोरपितान्समीक्ष्यसकौन्तेयः सर्वान्बंधूनवस्थितान् कृपयापरयाविष्टोविषीदन्निदमब्र
वीत् २७ अर्जुनउवाच दृष्ट्वेमंस्वजनंकृष्णयुयुत्सुंसमुपस्थितं सीदंतिममगात्राणिमुखंचपरिशुष्यति वेपथुश्चशरीरेमे
रोमहर्षश्चजायते २८ गांडीवंस्रंसतेहस्तात्त्वक्चैवपरिदह्यते नचशक्नोम्यवस्थातुंभ्रमतीवचमेमनः ३० निमित्तानिचप
श्यामिविपरीतानिकेशव नचश्रेयोनुपश्यामिहत्वास्वजनमाहवे ३१ नकांक्षेविजयंकृष्णनचराज्यंसुखानिच॥ ९ ॥

पथुः कंपस्तथारोमहर्षोरोमांचश्चजायते २८ गांडीवमितिमेममगांडीवंस्रंसतेऽधःपतति त्वक्चैवपरिदह्यतेआंतरशोकज्वलनेनसर्वतःसंता
प्यते चापरंमेमनः कर्तव्याकर्तव्यबोधसाधनमंतःकरणंभ्रमतीवभ्रमंगच्छतिनिर्द्धारणंकर्तुंनशक्नोमि ३० निमित्तानीतिहेकेशवविपरीतानिअ
निष्टसूचकानिनिमित्तानिभाविसूचकानिचिन्हानिशकुनानिपश्यामिकिंचनचेति स्वजनमाहवेयुद्धेहत्वाश्रेयःकल्याणमनुपश्यामिउत्तर
कालेनपश्यामि ३१ ननुविजयादिकंश्रेयोवर्तमानेकिंनपश्यसीतिचेत्तत्राह नकांक्षइतिहेकृष्णाहंविजयंविशिष्टंजयंसंग्रामेउत्कर्षेनकां

विजयजन्यानंदप्रमोदानन्न प्रार्थये हे गोविंद नः अस्माकं राज्येन किं भोगैर्विषयसुखैः किं जीवितेनापि किं गोभिः श्रुतिभिर्वेदांतवाक्यैर्विद्यते न प
रमार्थरूपेण लभ्यत इति गोविंदः तत्संबोधनं हे गोविंद ३२ येषामिति येषां स्वजनानामर्थे प्रयोजनाय नोऽस्माकं राज्यं भोगाश्च पुनः सुखानि
च त इमे युद्धनिमित्तं प्राणान् आंतरधनानि त्यक्त्वा विहाय धनानि वाह्यप्राणांश्च त्यक्त्वाऽवस्थिताः अतः किमस्माकं राज्यादिभिः कृत्यमित्य
र्थः ३३ आचार्यादयो यथा व्याख्याताः पितरः पुत्रास्तथा पितामहा मातुलाः श्वशुराः पौत्राः स्यालाः पत्न्या भ्रातरः संबंधिनो विवा
हादिसंबंधवंतः ३४ ननु यदि कृपया त्वमेतान्न हंसि तर्हि त्वामेते राज्यलोभेन हनिष्यंति अतस्त्वमेवैतान् हत्वा राज्यं भुंक्ष्वेति तत्राह एता
निति साधनेन हे मधुसूदन एतान् आचार्यादीन् घ्नतोऽपि मरपतोऽपि त्रैलोक्यराज्यस्यापि हेतोः प्राप्त्यर्थं हंतुं नेच्छामि किं पुनर्महीमात्रप्राप्त्यर्थमि
त्यर्थः ३५ निहत्येति हे जनार्दन जनान् देवविपक्षभूतान् असुरादीन् अर्दयति पीडयतीति अथवा जनैरधिकारिपुरुषैरभ्युदयादिकम

किं नो राज्येन गोविंद किं भोगैर्जीवितेन वा ३२ येषामर्थे कांक्षितं नो राज्यं भोगाः सुखानि च त इमेऽवस्थिता युद्धे प्राणांस्त्यक्त्वा ध-
नानि च ३३ आचार्याः पितरः पुत्रास्तथैव च पितामहाः मातुलाः श्वशुराः पौत्राः स्यालाः संबंधिनस्तथा ३४ एतान्न हंतुमिच्छा
मि घ्नतोऽपि मधुसूदन अपि त्रैलोक्यराज्यस्य हेतोः किं नु महीकृते ३५ निहत्य धार्त्तराष्ट्रान्नः का प्रीतिः स्याज्जनार्दन॥ ((र्द्यते प्रार्थ्यते स्मा

दिति जनार्दनः हे जनार्दन धार्त्तराष्ट्रान्निहत्य नः अस्माकं का प्रीतिः किं सुखं स्यात् न किमपीति ननु च अग्निदो गरदश्चैव शस्त्रपाणिर्धनापहः
क्षेत्रदारहरश्चैव षडेते ह्याततायिन इति स्मरणादग्निदत्वादिभिः षड्भिरपि हेतुभिरेते तावदाततायिनः आततायिनामेषां च वधो विहितत्वा
त् युक्त एव आततायिनमायांतं हन्यादेवाविचारयन् नाततायिवधे दोषो हंतुर्भवति कश्चनेति वचनात् तत्राह साधेन पापमिति आततायिन
मायांतमित्यादिकमर्थशास्त्रं हितं च धर्मशास्त्राद्दुर्बलं यदुक्तं याज्ञवल्क्येन स्मृत्योर्विरोधे न्यायस्तु बलवान्व्यवहारतः अर्थशास्त्रात्तु बलवद्धर्मशा

तस्मादाततायिनामप्येतेषामाचार्यादीनांवधेस्माकंपापमेवभवेत् अन्यायत्वादधर्मत्वाच्चैतद्वधस्येत्येतामाशंकांधर्मशास्त्रस्यार्थशास्त्रा
द्बलवत्त्वेनपरिहरतिपापमिति नकेवलमिहलोकेसुखंनास्तिपरलोकेपितन्नास्तियस्मादेतानाततायिनोहत्वास्मान्पापमेवनरकादिदुःख
कारणमाश्रयेत् ३६ यस्मादेतेषांहनने लोकद्वयेप्यकल्याणमेवतस्मात्त्वांधवान् धार्त्तराष्ट्रान्हंतुंवयमर्हान्एतेषांवधस्यान्यायत्वात् अध
र्मत्वाच्चनकेवलमस्माकंपारलौकिकंसुखंनभवतिऐहिकमपिनभवतीत्याहस्वजनमितिहिमाधवहियस्मात्स्वजनंहत्वावयंसुखिनःकथंस्या
म ३७ ननुचएतेषामपिवंधुवधदोषेसमानेसतियथैवैतेवंधुवधदोषमंगीकृत्ययुद्धेप्रवर्त्ततेतथैवभवानपिप्रवर्त्ततांकिमनेनविषादेनत्याशि

पापमेवाश्रयेदस्मान्हत्वैतानाततायिनः ३६ तस्मान्नार्हावयंहंतुंधार्त्तराष्ट्रान्स्वबांधवान् स्वजनंहिकथंहत्वासुखिनःस्याम
माधव ३७ यद्यप्येतेनपश्यंतिलोभोपहतचेतसःकुलक्षयकृतंदोषंमित्रद्रोहेचपातकं ३८ कथंनज्ञेयमस्माभिःपापादस्मा
न्निवर्त्तितुम् कुलक्षयकृतंदोषंप्रपश्यद्भिर्जनार्दन ३९ कुलक्षयेप्रणश्यंतिकुलधर्माःसनातनाःधर्मेनष्टेकुलंकृत्स्नमधर्मो
भिभवत्युत ४० अधर्माभिभवात्कृष्णप्रदुष्यंतिकुलस्त्रियःस्त्रीषुदुष्टासुवार्ष्णेयजायतेवर्णसंकरः ४१॥ प्रैवुद्धिभेदेनपरिहरतिय

द्यपीतियद्यपिएतेधार्त्तराष्ट्रालोभोपहतचेतसःतिरस्कृतकर्त्तव्याकर्त्तव्यविवेकविज्ञानाःसंतःकुलक्षयकृतंगोत्रवधनिमित्तंदोषंमित्रद्रोहेचपातकं
नपश्यंतिहेजनार्दनतथापिअस्माभिःकुलक्षयकृतंदोषंप्रपश्यद्भिरस्मात्पापान्निवर्त्तितुंकथंनज्ञेयंनिवृत्तयेवुद्धिःकर्त्तव्येत्यर्थः ३९ तमेवदोषंदर्शयति
कुलक्षयइतिकुलक्षयस्यपारंपर्येणनरकप्राप्तिकारणत्वंदर्शयतिकुलक्षयेगोत्रपुरुषाणांविनाशेसनातनाःपारंपर्यागताःकुलेधर्माःप्रणश्यंतिध
र्मेनष्टेकृत्स्नमपिकुलंनष्टंअधर्मोभिभवतितिरस्करोतिउतापिअधर्माभिभवनिवारकधर्मस्याभावादित्यर्थः ४० अधर्मेतिहेकृष्णगोपिकामनःकर्ष
णशीलअधर्माभिभवात् कुलस्त्रियोविशुद्धवंशोद्भवाःप्रदुष्यंतिस्वैरिण्योभवंतितासुस्त्रीषुदुष्टासुहेवार्ष्णेयवृष्णिवंशोद्भववर्णसंकरोजायतेवर्ण

यावदिति अहमेतान्प्रधानवीरान्योद्धुकामान्अवस्थितान्यावन्निरीक्षे निरीक्षणपूर्वकं परीक्षां करोमि ननु त्वं योद्धा न तु युद्धप्रेक्षक इत्याह।
कैरिति अस्मिन्रणसमुद्यमे मया कैः सह योद्धव्यं युद्धं कर्तव्यमित्यर्थः २२ योत्स्यमानानिति अहं योत्स्यमानान् अग्रे युद्धकारिष्यतः अवे
क्षे निरीक्षयामि ये एतेऽत्र मम तव च समागमे दुर्बुद्धेरविचारकारिणो धार्त्तराष्ट्रस्य दुर्योधनस्य युद्धे युद्धस्थले प्रियं चिकीर्षवः प्रियं विजयं कर्तु
कामाः समागताः प्रागल्भ्यातिरेकेण सम्यक्वीरोचितसमारंभेण आगताः ते अप्यविचारकारिण इत्यर्थः तान्यावद्द्रक्ष्यामि तावदुभयोः सेनयो
र्मध्ये रथं स्थापयेत्यन्वयः २३ ततः किं वृत्तमित्यपेक्षायां संजय उवाच एवमिति युग्मं हे भारत धृतराष्ट्र गुडाकानिद्रा तस्या ईशेन जितनिद्रेणार्जुने

यावदेतान्निरीक्ष्येऽहं योद्धुकामानवस्थितान् कैर्मया सह योद्धव्यमस्मिन्रणसमुद्यमे २२ योत्स्यमानानवेक्षेऽहं य एतेऽत्र स।
मागताः धार्त्तराष्ट्रस्य दुर्बुद्धेर्युद्धे प्रियचिकीर्षवः २३ संजय उवाच एवमुक्तो हृषीकेशो गुडाकेशेन भारत सेनयोरुभयोर्मध्ये स्था
पयित्वा रथोत्तमं २४ भीष्मद्रोणप्रमुखतः सर्वेषां च महीक्षितां उवाच पार्थ पश्यैतान्समवेतान्कुरूनिति २५ तत्रापश्यत्स्थि
तान्पार्थः पितॄनथ पितामहान् आचार्यान्मातुलान्भ्रातॄन्पुत्रान्पौत्रान्सखींस्तथा २६ ॥

न्तात तयाऽऽज्ञनोरहित इति द्रोणस्तथा सर्वेषां च महीक्षितां भूमंडलाध्यक्षाणां राज्ञां योधवराणामग्रे इत्युवाच २७ इतीति किं हे पार्थ एतान्समवे
तान्द्रष्टुमभीष्टान् कुरून्पश्येत्युवाच २५ ततः किं वृत्तमित्यत आह तत्रेति अथानंतरं पार्थोऽर्जुनः तत्रोभयोः सेनयोरपि स्थितान्पितॄन्पातीति पि
वंति चुंवंति लालयंतीति तर्पयंति चापत्यानीति पितरः तान्पितॄन् अत्र च पितृकुल्याः पितृव्यादयः पितृव्यानित्यर्थः पितामहान् गांगेयादीन् आचा
र्यान्द्रोणादीन्मातुलान्मात्रा जनन्या साम्यं येषां ते मातुलास्तान् भ्रातॄन्सोदरान्पुत्रान्पुन्नाम्नो नरकात्पितॄणां त्राणात्पुत्राः तत्पुत्राः पौत्रास्तान्
॥

तर्हि तद्धननं मम क्षेमतरं पापस्यानुत्पत्तेर्हेतोरत्यंतं हितं भवेत् पापानिष्पत्तेः ४६ ततः किं वृत्तमित्यपेक्षायामाह संजयः एवमिति अ
र्जुन एवमुक्त्वा संख्ये संग्रामे रथस्योपरि पश्चाद्भागे सशरं चापं विसृज्य उपाविशत् उपविष्टः शोकेन संविग्नं संतप्तं प्रकंपितं मानसं चित्तं
यस्य सः एवंविधः सन् उपविष्ट इत्यर्थः ४७॥ ॥इति श्रीसुबोधिन्यां टीकायां अर्जुनविषादो नाम प्रथमोऽध्यायः॥ ॥१ ततः किं वृत्तमि
त्यपेक्षायां संजय उवाच तं तथेति अश्रुभिः पूर्णे आकुले ईक्षणे यस्य तं तथोक्तप्रकारेण विषीदंतमर्जुनं प्रति मधुसूदन इदं वक्ष्यमाणं वाक्य

धार्त्तराष्ट्रा रणे हन्युस्तन्मे क्षेमतरं भवेत् ४६ संजय उवाच एवमुक्त्वार्जुनः संख्ये रथोपस्थ उपाविशत् विसृज्य सशरं चा
पं शोकसंविग्नमानसः ४७॥ इति श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे अर्जुनविषा
दो नाम प्रथमोऽध्यायः॥ १ संजय उवाच तं तथा कृपयाविष्टमश्रुपूर्णाकुलेक्षणं विषीदंतमिदं वाक्यमुवाच मधुसूदनः॥
१ श्रीभगवानुवाच कुतस्त्वा कश्मलमिदं विषमे समुपस्थितं अनार्यजुष्टमस्वर्ग्यमकीर्त्तिकरमर्जुन २ क्लैब्यं मास्मगमः
पार्थ नैतत्त्वय्युपपद्यते क्षुद्रं हृदयदौर्बल्यं त्यक्त्वोत्तिष्ठ परंतप ३ अर्जुन उवाच कथं भीष्ममहं संख्ये द्रोणं च मधुसूदन॥

मुवाच १ तदेव वाक्यमाह कुत इति कुतो हेतोः त्वा इति त्वां विषमे संग्रामे संकटे इदं कश्मलमुपस्थितं अयं मोहः प्राप्तः यतः आर्यैरसे
वितमस्वर्ग्यमधर्म्यमयशस्करं च २ तस्मात् क्लैब्यमिति हे पार्थ क्लैब्यं कातर्यं मास्मगमः मा प्राप्नुहि यतस्त्वय्येतन्नोपपद्यते योग्यं न भ
वति क्षुद्रं तुच्छं हृदयदौर्बल्यं कातर्यं त्यक्त्वा युद्धाय उत्तिष्ठ हे परंतप शत्रुतापन ३ नाहं कातरत्वेन युद्धादुपरतोस्मि किंतु युद्धस्यान्याय्यत्वा
दिति अर्जुन उवाच कथं भीष्ममिति भीष्मद्रोणौ पुजायामर्हौ पूजायोग्यौ तौ प्रति कथमहं योत्स्यामि तत्रापीषुभिः यत्र वाचापि यो॥

॥०५॥६॥८२०॥

त्स्यामि इति वक्तुमनुचितं तत्र वारौ ॥ कथं प्रोत्स्यामीत्यर्थः हे अरिसूदन शत्रुसूदन ४ नर्हि तव देहयात्रापि न स्यादिति चेत् तत्राह गुरूनि
निगुरून्द्रोणादीन् अहत्वा परलोकविरुद्धं गुरुवधमकृत्वा इहलोके भिक्षान्नमपि भोक्तुं श्रेयउचितं वधपक्षेपि न केवलं परत्र दुःखमिहैव तु
नरकदुःखमनुभवेयमित्याह हत्वेति गुरून्हत्वा इहैव तु रुधिरेण प्रदिग्धान्प्रकर्षेणालिप्तान् अर्थकामात्मकान् भोगान् अहं भुंजीय अश्रीयायद्वा
र्थकामानिति गुरूणां विशेषणं अर्थे तृष्णाकुलत्वादेते तावद्युद्धान्न निवर्तेरन् तस्मादेतद्वधः प्रसज्येतैवेत्यर्थः तथा च युधिष्ठिरं प्रति भीष्मे
णोक्तं अर्थस्य पुरुषो दासो दासस्त्वर्थो न कस्यचित् इति सत्यं महाराज बद्धोस्म्यर्थेन कौरवैरिति ५ किंच यद्यपि अधर्ममंगीकरिष्यामस्तथा

इषुभिः प्रतियोत्स्यामि पूजार्हावरिसूदन ४ गुरूनहत्वा हि महानुभावान् श्रेयो भोक्तुं भैक्ष्यमपीह लोके हत्वार्थकामांस्तु गुरू
निहैव भुंजीय भोगान्रुधिरप्रदिग्धान् ५ न चैतद्विद्मः कतरन्नो गरीयो यद्वा जयेम यदि वा नो जयेयुः यानेव हत्वा न जिजीवि
षामस्तेवस्थिताः प्रमुखे धार्तराष्ट्राः ६ कार्पण्यदोषोपहतस्वभावः पृच्छामि त्वां धर्मसंमूढचेताः यच्छ्रेयः स्यान्निश्चितं ब्रूहि त
न्मे शिष्यस्तेहं शाधि मां त्वां प्रपन्नं ७॥ एपि किमस्माकं जयः पराजयो वा भवेदिति न विद्मः तदेव न ज्ञायत इत्याह न चैतदिति एतत् द्वयोर्मध्ये न॥

अस्माकं कतरत् किं नाम गरीयः अधिकतरं भवतीति न विद्मः तदेव द्वयं दर्शयति यद्वा जयेम एतान्वयं जेष्यामः यदि वा नः अस्मान् एते जयेयुः
जेष्यंतीति किंच अस्माकं जयोपि फलतः पराजय एवेत्याह यानेव हत्वा जीवितुं नेच्छामः त एवैते सन्मुखे अवस्थिताः ६ तस्मात्कार्पण्येति कार्प
ण्यदोषोपहतस्वभाव एतान्हत्वा कथं जीविष्याम इति कार्पण्यदोषः स्वकुलक्षयकृतः ताभ्यामुपहतः अभिभूतः स्वभावः शौर्यादिलक्षणो यस्य सोहं
त्वां पृच्छामि तथा धर्मसंमूढचेतो यस्य सः युद्धं त्यक्त्वा भिक्षाटनमपि क्षत्रियस्य धर्मो वा अधर्मो वेति संदिग्धचित्तः सन्नित्यर्थः अतो मे यन्निश्चितं श्रे

त्वमेवविचार्ययद्युक्तंतत्कुर्वितिचेत्तत्राहनहीतिइंद्रियाणामुच्छोषणमतिशोषकंमदीयंशोकंयत्कर्मापनुद्यात् अपनयेत्तदहंनप्रपश्यामि
यद्यपिभूमौनिष्कंटकंसमृद्धंराज्यंप्राप्स्यामितथासुरेंद्रत्वमपियदिप्राप्स्यामिएवमभीष्टंतत्सर्वमवाप्याषिशोकापनोदनोपायंनप्रपश्यामीत्यन्वयः
८ एवमुक्त्वार्जुनःकिंकृतवानित्यपेक्षायांसंजयउवाचएवमितिं ९ ततःकिंवृत्तमित्यतआहतमुवाचेतिप्रहसन्निवेतिप्रसन्नमुखःसन्नित्यर्थः
१० देहात्मनोरविवेकादस्यैवंशोकोभवतीतितद्विवेकप्रदर्शनार्थंश्रीभगवानुवाच अशोच्यानितिशोकस्याविषयभूतानेवबंधूनत्वमन्वशो
चः अनुशोचितवानसिदृष्ट्वेमंस्वजनंकृष्णयुयुत्सुंसमुपस्थितमित्यादिनातत्रकुतस्त्वाकश्मलमिदंविषमोसमुपस्थितमित्यादिनामयाबोधि

नहिप्रपश्यामिममापनुद्याद्यच्छोकमुच्छोषणमिंद्रियाणां अवाप्यभूमावसपत्नमृद्धंराज्यंसुराणामपिचाधिपत्यं ८ संजयउवा
च एवमुक्त्वाहृषीकेशंगुडाकेशःपरंतप नयोत्स्यइतिगोविंदमुक्त्वातूष्णींबभूवह ९ तमुवाचहृषीकेशःप्रहसन्निवभारतसेनयो
रुभयोर्मध्येविषीदंतमिदंवचः १० श्रीभगवानुवाच अशोच्यानन्वशोचस्त्वंप्रज्ञावादांश्चभाषसे गतासूनगतासूंश्चनानुशो
चंतिपंडिताः ११ नत्वेवाहंजातुनासंनत्वंनेमेजनाधिपाः नचैवनभविष्यामःसर्वेवयमतःपरं १२॥ ए तोपिपुनश्चप्रज्ञावादान्प्रज्ञावतांपंडि

तानांवादानशब्दान्कथंभीष्ममहंसंख्येइत्यादीन्केवलंभाषसेनतुपंडितोसियतःगतासून्गतप्राणानबंधून्अगतासूंश्चजीवतोपिबंधून्बंधुहीना
एतेकथंजीविष्यंतीतिनानुशोचंति ११ अशोचत्वेहेतुमाहनत्वेवाहमितियथाहंपरमेश्वरोजातुकदाचित्लीलाविग्रहस्याविर्भावतिरोभावेष्विना
समितितुनैव अपितुआसमेवानादित्वात्नचत्वंनासीःनाभूः अपितुआसीरेवइमेचजनाधिपानृपानासन्नितिन अपितुआसन्नेवमदंशत्वात्
तथाअतःपरंइतःउपर्यपिनभविष्यामःनस्यास्यामइतिचनैवापितुस्यास्यामःएवंजन्ममरणशून्यत्वादशोच्यइत्यर्थः १२॥ ९ ॥ ९ ।

संकरइति संकरोजातिसंकरः कुलघ्नानांचापरंकुलघ्नकुलस्यचनरकायैवभवति हियस्मात् एषांकुलघ्नानांकुलहंतृणांनकेवलंतेषामेवकु
लेनरकायभवति किंवाएषांकुलघ्नानांस्वर्गाद्दाः पितरःलुप्तपिंडोदकक्रियास्संतोनरकेपतंतिपिंडादिदातृणांविशुद्धापत्यानामभावात्लुप्तपिंडा
लुप्तोदकक्रियाःसंतोनरकेपतंतीत्यर्थः ४२ उक्तंदोषमुपसंहरतिदोषैरितिद्वाभ्यांएतैर्नामअधर्माभिभवादिलक्षणैर्व
र्णसंकरकारकैर्दोषैः कुलघ्नानांजातिधर्माः क्षत्रियजातिप्रयुक्तधर्माः तथाशाश्वताः कुलधर्माः पारंपर्यागतावंशधर्माश्च उत्साद्यंतेलुप्यंतेतेषामा
चरणंनभवतीत्यर्थः चकारादाश्रमधर्मादयोपिगृह्यंते ४३ उत्सन्नेति हेजनार्दन उत्सन्नकुलधर्माणांविनष्टकुलवर्णाश्रमादिधर्माणांनरकेनि

संकरोनरकायैवकुलघ्नानांकुलस्यच पतंतिपितरोह्येषांलुप्तपिंडोदकक्रियाः ४२ दोषैरेतैःकुलघ्नानांवर्णसंकरकारकैः
उत्साद्यंतेजातिधर्माःकुलधर्माश्चशाश्वताः ४३ उत्सन्नकुलधर्माणांमनुष्याणांजनार्दन नरके नियतंवासोभवतीत्यनुशुश्रु
मः ४४ अहोबतमहत्पापंकर्तुंव्यवसितावयं यद्राज्यसुखलोभेनहंतुंस्वजनमुद्यताः ४५ यदिमामप्रतीकारमशस्त्रंशस्त्र

यतंनियमेनवासोभवतीति वयमनुशुश्रुमः अनुवारंवारंव्यासादिभ्यः श्रुतवंतोवयं प्रायश्चित्तमकुर्वाणाः पापेषु पाणयः
नियतानराः अपश्चात्तापिनः कष्टान्निरयान्यांतिदारुणान् इत्यादिवचनेभ्यः ४४ बंधुवधव्यवसायेनतप्यमानआह अहोब
तेति अहोबतकष्टंयत्परमेश्वरसन्निधानेपिवयंमहत्पापंकर्तुंव्यवसिताः व्यवसायंनिश्चयंगताः किंतत्महत्पापंयद्राज्यसुखलो
भेनस्वजनंहंतुमुद्यताइतिउत अतिशयेनयतनायत्नवंतोजाताः ४५ एवंसंतप्तःसन्मृत्युमेवशासनोर्जुनआह यदिमामितियदि
शस्त्रपाणयः धार्त्तराष्ट्राः अकृतप्रतीकारंप्रतियुद्धमकुर्वाणंमामशस्त्रंतुष्णीमुपविष्टंरणेसंग्रामेहन्युः हन्यते॥ ५ ८ ५ ॥

तथासतः सत्स्वभावस्यात्मनः अभावो विनाशो न विद्यते एवमुभयोः सदसतोरंतो निर्णयो दृष्टः कैस्तत्त्वदर्शिभिर्वस्तुयाथात्म्यविद्भिः एवं भूतविवेकेन सहस्वेत्यर्थः १६ तत्र सत्स्वभावमविनाशिवस्तु सामान्येनोक्तं विशेषतो दर्शयति अविनाशीति येन सर्वमिदमागमापायधर्मकं देहादिकं ततं साक्षित्वेन व्याप्तं तत् आत्मस्वरूपमविनाशि विनाशशून्यं विद्धि जानीहि तत्र हेतुमाह विनाशमिति १७ आगमापायधर्मकमसद्दर्शयति अंतवंत इति अतो नाशो विद्यते येषां ते अंतवंतः नित्यस्य सर्वदैकरूपस्य शरीरिणः शरीरवतः अत एवानाशिनः अप्रमेयस्यापरिच्छिन्नस्यात्मनः इमे सुखदुःखादिधर्मका देहा उक्तास्तत्त्वदर्शिभिः यस्मादेवमात्मनो न विनाशः न च सुखदुःखादिसंबंधः तस्मात्मोहजं शोकं त्यक्त्वा युध्यस्व स्वधर्मं मा त्याक्षीरित्यर्थः १८ तदेवं भीष्मादिमृत्युनिमित्तः शोको निवारितः यच्चात्मनो हंतृत्वनिमित्तं दुःखमुक्तं एता

उभयोरपि दृष्टोंतस्त्वनयोस्तत्त्वदर्शिभिः १६ अविनाशि तु तद्विद्धि येन सर्वमिदं ततं विनाशमव्ययस्यास्य न कश्चित्कर्तुमर्हति १७ अंतवंत इमे देहा नित्यस्योक्ताः शरीरिणः अनाशिनोऽप्रमेयस्य तस्माद्युध्यस्व भारत १८ य एनं वेत्ति हंतारं यश्चैनं मन्यते हतं उभौ तौ न विजानीतो नायं हंति न हन्यते १९ न जायते म्रियते वा कदाचिन्नायं भूत्वा भविता वा न भूयः॥ ९ ॥

न्न हंतुमिच्छामीत्यादिना तदपि तद्वदेव निर्निमित्तमित्याह य एनमिति य एनमात्मानं हननक्रियायाः कर्तारं कर्मभूतं च वेत्ति कर्मवत्कर्तृत्वमपि नास्तीत्यर्थः तत्र हेतुः नायमिति १९ न हन्यत इत्येतदेव षड्भावविकारशून्यत्वेन द्रढयति नेति न जायत इति जन्मप्रतिषेधः न म्रियत इति विनाशप्रतिषेधः वाशब्दौ चार्थे न चायं भूत्वा उत्पद्य भविता भवति अस्तित्वं भजते किंतु प्रागेव स्वतः सद्रूप इति जन्मानंतरास्तित्वलक्षणो द्वितीयविकारप्रतिषेधः तत्र हेतुः यस्मादजः यो हि जायते स जन्मानंतरमस्तित्वं भजते न तु यः स्वयमेवास्ति स भूयोपि अन्यदस्तित्वं भजत इत्यर्थः नित्यः सर्वदैकरूप इति वृद्धिप्रतिषेधः शाश्वतः शश्वद्भव इत्यपक्षयप्रतिषेधः पुराण इति विपरिणामप्रतिषेधः पुरापि नव एव।

नतुपरिणामतोरूपांतरंप्राप्यनवोभवतीत्यर्थः यद्वानभवितेत्यस्यानुषंगंकृत्वाभूयः अधिकंयथाभवति तथानभवतीतिवृद्धिप्रतिषेधः अजोनित्यइतिचोभयंवृद्ध्यभावेहेतुरित्यपौनरुक्त्यंपतदेवंजायतेअस्तिवर्द्धतेविपरिणमतेऽपक्षीयतेविनश्यतीत्येवंयास्कादिभिरुक्ताः षड्भावविकारानिरस्ताः यदर्थमेतेविकारानिरस्ताः तंप्रस्तुतंविनाशाभावमुपसंहरतिनहन्यतेहन्यमानशरीरइति २० अतएवहंतृत्वाभावोपि पूर्वोक्तःसिद्धइत्याहवेदेतिनित्यंवृद्धिशून्यमव्ययमपक्षयशून्यमजमविनाशिनंचयोवेदसपुरुषः कंहंतिकथंवाहंति एवंभूतस्यवधेसाधनाभावात् तथास्वयंप्रयोजकोभूत्वाअन्येनकंघातयतिकथंवाघातयतिनकथंचिदपीत्यर्थः अनेनमय्यपिप्रयोजकत्वदोषदृष्टिमाका।

अजोनित्यःशाश्वतोयंपुराणोनहन्यतेहन्यमानेशरीरे २० वेदाविनाशिनंनित्यंयएनमजमव्ययं कथंसपुरुषःपार्थकंघातयतिहंतिकं २१ वासांसिजीर्णानियथाविहायनवानिगृह्णातिनरोपराणि तथाशरीराणिविहायजीर्णान्यन्यानिसंयातिनवानिदेही २२ नैनंछिंदंतिशस्त्राणिनैनंदहतिपावकः नचैनंक्लेदयंत्यापोनशोषयतिमारुतः २३॥ अच्छेद्योयमदाह्योयमक्लेद्योशोष्यएवच॥

र्षीरित्युक्तंभवति २१ ननुआत्मनअविनाशेपितदीयशरीरनाशंपर्यालोच्यशोचामीतिचेत्तत्राहवासांसीतिकर्मनिबंधनानांनूतनानांदेहानामवश्यंभावित्वान्नजीर्णदेहनाशेशोकावकाशइत्यर्थः २२ कथंहंती। त्यनेनोक्तंवधसाधनाभावंदर्शयन् अविनाशित्वमात्मनःस्फुटीकरोति नैनमिति आपोनैनंक्लेदयंतिमृदुकरणेनशिथिलंनकुर्वंतिमारुतोप्येनंनशोषयतिनिरवयवत्वात् २३ तत्रहेतूनाह अच्छेद्यइत्यादिसार्धेननिरवयवत्वात् अच्छेद्योयं अक्लेद्यश्चामूर्तित्वात् अदाह्यः द्रवत्वाभावादशोष्यइति इतश्चच्छेदादियोग्योनभवतियतोनित्यः अविनाशीसर्वत्रगतःस्थाणुः॥ ६॥

गी० स्थिरस्वभावः रूपांतरपतिशून्यः अचलः पूर्वरूपापरित्यागी सनातनः अनादिः २४ किंच अव्यक्त इति अव्यक्तश्चक्षुराद्यविषयः अचिं
टी० श्री० त्योमनसोप्यविषयः अविकार्यः कर्मेन्द्रियाणामपि अगोचर इत्यर्थः उच्यत इति नित्यत्वादावभियुक्तोक्तिं प्रमाणयति उपसंहरति त
द्वि० स्मादिति एवमात्मनो जन्मविनाशाभावात् न शोकः कार्य इत्युक्तं इदानीं देहेन सहात्मनो जन्म तद्विनाशेन विनाशमंगीकृत्यापि शोको
१० न कार्य इत्याह अथ चेति अथ यद्यपि एनमात्मानं नित्यं सर्वदा तत्तद्देहे जाते जातं मन्यसे तथा तत्तद्देहे मृते मृतं मन्यसे पुण्यपापयोस्तत्फल
भूतयोश्च जन्ममरणयोरात्मगामित्वात् तथापि त्वं शोचितुं नार्हसि २६ कुत इत्यत आह जातस्येति हि यस्मात् जातस्य स्वारंभककर्म

नित्यः सर्वगतः स्थाणुरचलोयं सनातनः २४ अव्यक्तोयमचिंत्योयमविकार्योयमुच्यते तस्मादेवं विदित्वैनं ना
नुशोचितुमर्हसि २५ अथ चैनं नित्यजातं नित्यं वा मन्यसे मृतं तथापि त्वं महाबाहो नैनं शोचितुमर्हसि २६ ॥
जातस्य हि ध्रुवो मृत्युर्ध्रुवं जन्म मृतस्य च तस्मादपरिहार्येर्थे न त्वं शोचितुमर्हसि २७ अव्यक्तादीनि भूतानि व्यक्त
मध्यानि भारत अव्यक्तनिधनान्येव तत्र का परिदेवना २८॥ क्षये मृत्युः ध्रुवो निश्चितः मृतस्य तत्तद्देहे न कृतेन कर्मणा ज
न्मापि ध्रुवमेव तस्मादेवमपरिहार्येर्थे अवश्यंभाविनि जन्ममरणलक्षणेर्थे त्वं विद्वान् शोचितुं नार्हसि योग्यो न भवसि २७ किंच
देहानां स्वभावं पर्यालोच्य तदुपाधिके आत्मनो जन्ममरणे शोको न कार्य इत्याह अव्यक्तादीनीति अव्यक्तं प्रधानं तदेवादिः उत्पत्तेः पूर्वं राम
रूपं येषां तानि अव्यक्तादीनि भूतानि शरीराणि कारणात्मना स्थितानामेवोत्पत्तेः तथा व्यक्तमभिव्यक्तं मध्यं जन्ममरणांतरालस्थिति १०
लक्षणं येषां अव्यक्ते निधनं लयो येषां तानि इमान्येवंभूतान्येव तत्र तेषु का परिदेवना कः शोकनिमित्तो विलापः प्रतिबुद्धस्य स्वप्नदृष्ट

ननुईश्वरस्यतवजन्मादिशून्यत्वंसत्यमेवजीवानांतुजन्ममरणेप्रसिद्धेइत्यत्राहदेहिनइतिदेहिनोदेहाभिमानिनोजीवस्ययथास्मिन्स्थूलेदेहेकौ
माराद्यवस्थादेहनिबंधनाएवनतुस्वतःपूर्वावस्थानाशेअवस्थांतरोत्पत्तावपिसएवाहमितिप्रत्यभिज्ञानात् तथैवएतद्देहनाशेदेहांतरप्राप्तिरपि
लिंगदेहनिबंधना ननुतावदात्मनोनाशःजातमात्रस्यपूर्वसंस्कारेणस्तनपानादौप्रवृत्तिदर्शनात् अतोधीरोधीमान् तत्रतयोर्देहनाशोत्पत्त्योर्न
मुह्यति आत्मैवमृतोजातश्चेतिनमन्यते १३ ननुगतासून्गतासूंश्चनहंनशोचामिकिंतुतद्वियोगादिदुःखभाजंमामेवेतिचेत् तत्राहमात्रास्प
र्शाइतिमीयंतेविषयाआभिरितिमात्राइंद्रियवृत्तयःतासांस्पर्शाःविषयैःसंबंधाःतेशीतोष्णादिप्रदाभवंतितेत्वागमापायित्वादनित्याअस्थि

देहिनोस्मिन्यथादेहेकौमारंयौवनंजरा तथादेहांतरप्राप्तिर्धीरस्तत्रनमुह्यति १३ मात्रास्पर्शास्तुकौंतेयशीतोष्णसुखदुःख
दाःआगमापायिनोनित्यास्तांस्तितिक्षस्वभारत १४ यंहिनव्यथयंत्येतेपुरुषंपुरुषर्षभ समदुःखसुखंधीरंसोमृतत्वाय
कल्पते १५ नासतोविद्यतेभावोनाभावोविद्यतेसतः ॥

राः अतस्तांस्तितिक्षस्वसहस्वयथाजलातपादिसंपर्काःतत्तत्का
लकृताःस्वभावतःशीतादिप्रयच्छंतिएवमिष्टसंयोगवियोगाअपिसुखदुःखादिप्रयच्छंति तेषांचास्थिरत्वात्सहनंतवधीरस्योचि
तंननुतन्निमित्तहर्षविषादादिपारवश्यमित्यर्थः १४ तत्प्रतीकारप्रयत्नादपितत्सहनमेवोचितंमहाफलत्वादित्याहयंहीतिएते
मात्रास्पर्शापुरुषंनव्यथयंतिनाभिभवंतिसमेसुखदुःखेयस्यतंसततैरविक्षिप्यमाणोधर्मज्ञानद्वाराअमृतत्वायमोक्षायकल्पतेयोग्यो
भवति १५ ननुतथापिशीतोष्णादिकमतिदुःखसहंकथंसोढव्यमन्यततत्सहनेचकदाचिदात्मनाशस्यापिसंभवादित्याशंक्यतत्त्व
विचारतःसर्वंसोढुंशक्यमित्याशयेनाहनासतइति असतःअनात्मधर्मत्वादविद्यमानस्यशीतोष्णादेरात्मनिभावःसत्तानविद्यते॥

किंचअकीर्तिमिति अव्ययांशाश्वतींसंभावितस्यबहुमानितस्याकीर्तिर्मरणादतिरिच्यतेअधिकाभवति ३४ किंचभयादितियेषांब
हुगुणत्वेनत्वंपूर्वंसमतोभूःतएवभयेनसंग्रामात्त्वांनिवृत्तंमन्येरन्ततश्चपूर्वंबहुमतोभूत्वालाघवंयास्यसि ३५ किंचअवाच्येति अ
वाच्यानवचनानर्हान्शब्दान्तवाऽहितास्त्वच्छत्रवोवदिष्यंति ३६ यच्चोक्तं नचैतद्विद्मःकतरन्नोगरीयोयद्वाजयेमयदिवानोजयेयु
रिति तत्राह हतोवेति पक्षद्वयेपितवलाभएवेत्यर्थः ३७ यदप्युक्तंपापमेवाश्रयेदस्मानितितत्राह सुखदुःखेइति सुखदुःखेसमेकृत्वा
तथातयोःकारणभूतौलाभालाभावपितयोरपिकारणभूतौजयाजयावपिसमौकृत्वा एतेषांसमत्वेकरणंहर्षविषादराहित्यंयुज्यस्वसन्न

अकीर्तिंचापिभूतानिकथयिष्यंतितेव्ययां संभावितस्यचाकीर्तिर्मरणादतिरिच्यते ३४ भयाद्रणादुपरतंमं
स्यंतेत्वांमहारथाःयेषांचत्वंबहुमतोभूत्वायास्यसिलाघवं ३५ अवाच्यवादांश्चबहून्वदिष्यंतितवाहिताः नि
दंतस्तवसामर्थ्यंततोदुःखतरंनुकिं ३६ हतोवाप्राप्स्यसिस्वर्गंजित्वावाभोक्ष्यसेमहीं तस्मादुत्तिष्ठकौंतेययु
द्धायकृतनिश्चयः ३७ सुखदुःखेसमेकृत्वालाभालाभौजयाजयौ ततोयुद्धाययुज्यस्वनैवंपापमवाप्स्यसि ३८ एषा
तेभिहितासांख्येबुद्धिर्योगेत्विमांशृणु बुद्ध्यायुक्तोययापार्थकर्मबंधंप्रहास्यसि ३९ ।। द्धाभवसुखाभिलाषंहित्वास्वधर्मबुद्ध्या

युध्यमानःपापं ——— नप्राप्स्यसीत्यर्थः ३८ उपदिष्टंज्ञानयोगमुपसंहरन्तत्साधनंकर्मयोगंप्रस्तौति एषेति सम्यक्ख्यायतेप्रकाश्यते
वस्तुतत्त्वमनयेतिसंख्यासम्यक्ज्ञानंतस्मिन्प्रकाशमान मात्मतत्त्वंसांख्यंतस्मिन्करणीयाबुद्धिरेषातवाभिहिता एवमभिहिता
यामपिसांख्यबुद्धौतवचेदात्मतत्त्वमपरोक्षंनसंभवतितर्ह्यंतःकरणशुद्धिद्वारात्मतत्त्वापरोक्षार्थंकर्मयोगेत्विमांबुद्धिंशृणुययाबुद्ध्यायु
क्तःपरमेश्वरार्पितकर्मयोगेनशुद्धांतःकरणःसन्तत्प्रसादप्राप्तापरोक्षज्ञानेनकर्मात्मकंबंधंप्रकर्षेणहास्यसित्यक्ष्यसि ३९ ।।

ननु कृष्यादिवत्कर्मणां कदाचिद्विघ्नबाहुल्येन फलव्यभिचारात् मंत्राद्यंगवैगुण्येन च प्रत्यवायसंभवात् कुतः कर्मयोगेन कर्मबंधप्र-
हाणं तत्राह नेहेति इह निष्कामकर्मयोगे अभिक्रमस्य प्रारंभस्य नाशो निष्फलत्वं नास्ति प्रत्यवायश्च न विद्यते ईश्वरोद्देशेनैव विघ्नवैगु-
ण्याद्यसंभवात् किंच अस्य धर्मस्य स्वल्पमपि उपक्रममात्रमपि कृतं महतो भयात् संसारात् त्रायते रक्षति ननु काम्यकर्मवत् किंचिद्वैगुण्या-
दिना नैष्फल्यमस्येत्यर्थः ४० कुत इत्यपेक्षायामुभयोर्वैषम्यमाह व्यवसायेति इह ईश्वराराधनलक्षणे कर्मयोगे व्यवसायात्मिका परमेश्वरभ-
क्त्यैव ध्रुवं तरिष्यामीति निश्चयात्मिका एकैव एकनिष्ठैव बुद्धिर्भवति अव्यवसायिनां तु बहिर्मुखानां कामिनां कामानामानंत्यादनंतास्तत्रापि

नेहाभिक्रमनाशोस्ति प्रत्यवायो न विद्यते स्वल्पमप्यस्य धर्मस्य त्रायते महतो भयात् ४० व्यवसायात्मिका बुद्धिरे-
केह कुरुनंदन बहुशाखा ह्यनंताश्च बुद्धयोऽव्यवसायिनां ४१ यामिमां पुष्पितां वाचं प्रवदंत्यविपश्चितः वेद-
वादरताः पार्थ नान्यदस्तीति वादिनः ४२ ॥ च हि कर्मफलगुणफलादिप्रकारभेदात् बहुशाखा बुद्धयो भवंति ईश्वराराधना- गी॰

र्थे हि नित्यनैमित्तिके कर्मणि इदं हि किंचिदंगवैगुण्येनापि न नश्यति यथाशक्त्या तत्तथा कुर्यादिति हि तद्विधीयते न च वैगुण्यं ईश्वरोद्देशेनैव वैगुण्योप- टी॰
रमात् न तु तथा काम्यं कर्म अतो महद्वैषम्यमिति भावः ४१ ननु कामिनोऽपि कस्मात् कामार्थान् विहाय व्यवसायात्मिकामेव बुद्धिं किं न कुर्वंति त-
त्राह यामिमामिति पुष्पितां विषलतावदापातरमणीयां प्रकृष्टां परमार्थफलपरामेव वदंति वाचं स्वर्गादिफलश्रुतिं ये तेषां तया वाचाऽपहृत- २३
चेतसां व्यवसायात्मिका बुद्धिर्न विधीयत इति तृतीयेनान्वयः किमिति तथा वदंति यत अविपश्चितो मूढास्तत्र हेतुः वेदे ये वादाः अर्थवादाः अक्ष-
य्यं ह वै चातुर्मास्ययाजिनः सुकृतं भवति अपाम सोमममृता अभूमेत्याद्यास्तेष्वेव रताः प्रीताः अत एवातः परमन्यदीश्वरतत्वं प्राप्यं नास्तीति व-

अतएवकामात्मानइतिकामात्मानःकामाकुलचित्ताःअतःस्वर्गएवपरःपुरुषार्थोयेषांतेजन्मचतत्रकर्माणिचतत्फलानिचप्रददातीतितथातां
भोगैश्वर्ययोर्गतिंप्राप्तिंप्रतिसाधनभूतायेक्रियाविशेषास्तैर्वहुलायस्यांतांप्रवदंतीत्यनुषंगः ४३ ततश्चभोगैश्वर्येतिभोगैश्वर्ययोःप्रसक्तानां
अभिनिष्टानांतयापुष्पितयावाचाऽपहृतमाकृष्टंचेतोयेषांतेषांसमाधिश्चित्तैकाग्र्यंपरमेश्वराभिमुखत्वंतस्मिन्निश्चयात्मिकाबुद्धिर्नविधी
यते कर्मकर्त्तरिप्रयोगःनोत्पद्यतइत्यर्थः ४४ ननुयदिस्वर्गादिकंपरमंफलंनभवतितर्हिकिमितिवेदैस्तत्साधनतयाकर्माणिविधीयंतेतत्राह
त्रैगुण्येति त्रिगुणात्मकाःसकामायेधिकारिणस्तद्विष यास्तेषांकर्मफलसंबंधप्रतिपादकावेदाःत्वंतुनिस्त्रैगुण्योनिष्कामोभवतत्रोपायमाह

कामात्मानःस्वर्गपराजन्मकर्मफलप्रदां क्रियाविशेषवहुलांभोगैश्वर्यगतिंप्रति ४३ भोगैश्वर्यप्रसक्तानांतयापहृ
तचेतसां व्यवसायात्मिकाबुद्धिःसमाधौनविधीयते ४४ त्रैगुण्यविषयावेदानिस्त्रैगुण्योभवार्जुन निर्द्वंद्वोनित्यस
त्वस्थोनिर्योगक्षेमआत्मवान् ४५ यावानर्थउदपानेसर्वतःसंप्लुतोदकेतावान्सर्वेषुवेदेषुब्राह्मणस्यविजानतः ४६॥ ९

निर्द्वंद्वःसुखदुःखशीतोष्णादियुगलानिद्वंद्वानितद्रहितोभवतानिसहस्वेत्यर्थःकथमित्यतआहनित्यसत्वस्थःसन्धैर्यमवलंब्येत्यर्थःतथानि
र्योगक्षेमःअप्राप्तस्वीकारोयोगःप्राप्तपरिपालनंक्षेमस्तद्रहितआत्मवान्अप्रमत्तःनहिद्वंद्वाकुलस्ययोगक्षेमव्यापृतचित्तस्यचप्रमादिनस्त्रैगुण्या
तिक्रमसंभवतीति ४५ ननुवेदोक्तनानाफलपरित्यागेननिष्कामतयेश्वराराधनविषयाव्यवसायात्मिकाबुद्धिःकुबुद्धिरेवेत्याशंक्याहयावानर्थइतिउ
दकंपीयतेयस्मिन्नितिउदपानंवापीकूपादितस्मिन्स्वल्पोदकेएकत्रकृत्स्नस्यार्थस्यासंभवात् तत्रतत्रपरिभ्रमणेनविभागशोयावान्स्नानपानादिरर्थः
प्रयोजनंभवतितावान्सर्वोप्यर्थःसर्वतःसंप्लुतोदकेमहाह्रदेएकत्रैवयथाभवतिएवंयावान्सर्वेषुवेदेषुतत्तत्कर्मफलरूपोर्थःतावान्सर्वोपिविजानतोव्य

कुतस्तर्हि विद्वांसोपि लोके शोचंति आत्माज्ञानादेवेत्याशयेनात्मनो दुर्विज्ञेयतामाह आश्चर्यवदिति कश्चिदेनमात्मानं शास्त्राचार्यो
पदेशाभ्यां पश्यन् आश्चर्यवत्पश्यति तत्र हेतुः सर्वगतस्य नित्यज्ञानानंदस्वभावस्यात्मनो अलौकिकत्वादैंद्रजालिकवदघट
मानं पश्यन्निव विस्मयेन पश्यति तत्र हेतुः असंभावनाभिभूतत्वात् तथा आश्चर्यवदेवान्यो वदति शृणोति चान्यः कश्चित्तु विपरीतभा
वनाभिभूतः श्रुत्वापि नैव वेद चशब्दादुक्त्वापि दृष्ट्वापि न सम्यक् वेदेति द्रष्टव्यं २९ तदेवं दुर्बोधमात्मतत्त्वं संक्षेपेणोपदिशन् अशोच्य
त्वमुपसंहरति देहीति ३० यच्चोक्तमर्जुनेन वेपथुश्च शरीरे मे रोमहर्षश्च जायते इति तदप्ययुक्तमित्याह स्वधर्ममिति आत्मनो नाशा

आश्चर्यवत्पश्यति कश्चिदेनमाश्चर्यवद्वदति तथैव चान्यः आश्चर्यवच्चैनमन्यः शृणोति श्रुत्वाप्येनं वेद न चैव कश्चि
त् २९ देही नित्यमवध्योयं देहे सर्वस्य भारत तस्मात्सर्वाणि भूतानि न त्वं शोचितुमर्हसि ३० स्वधर्ममपि चावेक्ष्य न
विकंपितुमर्हसि धर्म्याद्धि युद्धाच्छ्रेयोन्यत्क्षत्रियस्य न विद्यते ३१ यदृच्छया चोपपन्नं स्वर्गद्वारमपावृतं सुखिनः क्ष
त्रियाः पार्थ लभंते युद्धमीदृशं ३२ अथ चेत्त्वमिमं धर्म्यं संग्रामं न करिष्यसि ततः स्वधर्मं कीर्तिं च हित्वा पापमवाप्स्यसि ३३

भावादेवैतेषां हनने पि विकंपितुं नार्हसि किंच स्वधर्ममपि अवेक्ष्य विकंपितुं नार्हसीति संबंधः यच्चोक्तं न च श्रेयोनुपश्यामि हत्वा स्वज
नमाहाव इत्यादि तत्राह धर्म्यादिति धर्मादनपेतात् न्याय्याद्युद्धादन्यत् ३१ किंच महति श्रेयसि स्वयमेवोपयोगे आगते सति कुतो
विकंपसे इत्याह यदृच्छयेति यदृच्छया अप्रार्थितमेवोपपन्नं प्राप्तमीदृशं युद्धं सुखिनः सभाग्या एव लभंते यतो निरावरणं स्वर्गद्वारमेवैतत् यद्वा एए १८
वंविधं युद्धं लभंते त एव सुखिन इत्यर्थः एतेन स्वजनं हि कथं हत्वा सुखिनः स्याम इति यदुक्तं तन्निरस्तं भवति ३२ विपक्षे दोषमाह अथ चेत्त्वमिमं मि

अ·२

गी·टी· तस्माद्योगायतदर्थायकर्मयोगाययुज्यस्वघटस्वयतोयोगः कर्मसुकौशलंयद्बंधकानामपितेषामीश्वराराधनेनमोक्षपरत्वसंपादनेचातु

श्री· र्यंसएवयोगः ५० कर्मणांमोक्षसाधनत्वप्रकारमाहकर्मजमिति कर्मजंफलंत्यक्त्वाकेवलमीश्वराराधनार्थंकर्मकुर्वाणाः मनीषिणो॥

१३ ज्ञानिनोभूत्वाजन्मरूपेणबंधेनविनिर्मुक्ताःसंतः अनामयंसर्वोपद्रवरहितंविष्णोःपदंमोक्षाख्यंगछंति ५१ कदातत्पदमहंप्राप्स्यामीत्य

पेक्षायामाह यदेतिद्वाभ्यां मोहोदेहादिष्वात्मबुद्धिस्तदेवकलिलंगहनंपापंविदुरित्यभिधानंततश्चायमर्थः एवंपरमेश्वराराधनेक्रियमा

णेयदातत्प्रसादेनतवबुद्धिर्देहाभिमानलक्षणंमोहमयंगहनंदुर्गंविशेषेणअतितरिष्यति तदाश्रोतव्यस्यश्रुतस्यचार्थस्यनिर्वेदंवैरा॥

तस्माद्योगाययुज्यस्वयोगः कर्मसुकौशलम् ५० कर्मजंबुद्धियुक्ताहिफलंत्यक्त्वामनीषिणः जन्मबंधविनिर्मुक्ताः

पदंगछंत्यनामयं ५१ यदातेमोहकलिलंबुद्धिर्व्यतितरिष्यति तदागंतासिनिर्वेदंश्रोतव्यस्यश्रुतस्यच ५२ श्रुति

विप्रतिपन्नातेयदास्थास्यतिनिश्चलासमाधावचलाबुद्धिस्तदायोगमवाप्स्यसि ५३ अर्जुनउवाच स्थितप्रज्ञ

स्यकाभाषासमाधिस्थस्यकेशव॥ ग्यंगतासिप्राप्स्यसि तयोरनुपादेयत्वेनजिज्ञासांनकरिष्यसीत्यर्थः ५२ ततश्चश्रुतिवि

प्रतिपन्नेति श्रुतिभिर्नानावैदिकलौकिकार्थश्रवणैर्विप्रतिपन्नाइतः पूर्वंविक्षिप्तासतीतवबुद्धिर्यदासमाधौस्थास्यति समाधीय

तेचित्तमस्मिन्इतिसमाधिः परमेश्वरःतस्मिन्निश्चला विषयांतरैरनाकृष्टा अतएवअचलाअभ्यासपटुत्वेनतत्रैवस्थिराचसतित राम

दायोगंयोगफलंतत्त्वज्ञानमवाप्स्यसिप्राप्स्यसि ५३ पूर्वश्लोकोक्तस्यात्मतत्त्वज्ञस्यलक्षणजिज्ञासुरर्जुनउवाच स्थितेतिस्वाभाविके १३

समाधौस्थितस्यातएवस्थितानिश्चलाप्रज्ञाबुद्धिर्यस्यतस्यकाभाषाभाष्यतेअनयेति भाषालक्षणमितियावत्केनलक्षणेनस्थि

तप्रज्ञ उच्यते इत्यर्थः तथा स्थितधीः कथं भाषणमासनं व्रजनं च कुर्यादित्यर्थः ५४ अत्र च साधकस्य यानि ज्ञानसाधनानि तान्येव
स्वाभाविकानि सिद्धस्य लक्षणानि अतः सिद्धस्य लक्षणानि कथयन्नेवांतरंगानि ज्ञानसाधनान्याह यावदध्यायसमाप्तिः तत्र प्रथ
मं प्रश्नोत्तरं प्रजहातीति द्वाभ्यां श्रीभगवानुवाच मनसि स्थितान् सर्वान् कामान् यदा प्रकर्षेण जहाति त्यागे हेतुः आत्मन्येव स्वस्मिन्नेव प
रमानंदरूपे आत्मना स्वयमेव तुष्ट इति आत्मारामः सन् यदा क्षुद्रविषयाभिलाषांस्त्यजति तदा तेन लक्षणेन मुनिः स्थितप्रज्ञ इत्युच्यत इ

स्थितधीः किं प्रभाषेत किमासीत व्रजेत किं ५४ श्रीभगवानुवाच प्रजहाति यदा कामान्सर्वान्पार्थ मनोगता
न् आत्मन्येवात्मना तुष्टः स्थितप्रज्ञस्तदोच्यते ५५ दुःखेष्वनुद्विग्नमनाः सुखेषु विगतस्पृहः वीतरागभयक्रोधः स्थि
तधीर्मुनिरुच्यते ५६ यः सर्वत्रानभिस्नेहस्तत्तत्प्राप्य शुभाशुभं नाभिनंदति न द्वेष्टि तस्य प्रज्ञा प्रतिष्ठिता ५७ यदा संहर
ते चायं कूर्मोऽङ्गानीव सर्वशः इन्द्रियाणीन्द्रियार्थेभ्यस्तस्य प्रज्ञा प्रतिष्ठिता ५८॥

त्यर्थः ५५ किं च दुःखेष्विति दुःखेषु प्राप्तेष्वपि अनुद्वि
ग्नमक्षुभितं मनो यस्य सः सुखेषु विगता स्पृहा यस्य सः तत्र हेतुः वीता अपगता रागभयक्रोधा यस्मात् तत्र रागः प्रीतिः स मुनिः स्थितप्रज्ञ
इत्युच्यते ५६ कथं भाषेत इत्यस्योत्तरमाह य इति यः सर्वत्र पुत्रमित्रादिष्वपि अनभिस्नेहः स्नेहशून्यः अत एव बाधितानुवृत्त्या तत्तच्छु
भमनुकूलं प्राप्य नाभिनंदति न प्रशंसति अशुभं प्रतिकूलं प्राप्य न द्वेष्टि न निंदति किंतु केवलमुदासीन एव भाषते तस्य प्रज्ञा प्रतिष्ठितेत्यर्थः
५७ किं च यदेति यदा चायं योगी इंद्रियार्थेभ्यः शब्दादिभ्यः सकाशादिंद्रियाणि संहरते प्रत्याहरति अनायासेन संहारे दृष्टांतः अंगानि करचरणा

अ०२
गी०टी० ननुनेंद्रियाणांविषयेष्वप्रवृत्तिः स्थितप्रज्ञस्यलक्षणंभवितुमर्हतिजडानामातुराणामुपवासपराणांचविषयेष्वप्रवृत्तेरविशेषातत।
श्री० त्राह विषयाइति इंद्रियैर्विषयाणामाहरणंग्रहणमाहारः निराहारस्येंद्रियैर्विषयग्रहणमकुर्वतोदेहिनोदेहाभिमानिनोऽज्ञस्यजीवा।
१४ स्यविषयाविनिवर्त्तंतेतदनुभवोनिवर्त्ततइत्यर्थः किंतुरसोरागोभिलाषस्तद्वर्जमभिलाषस्तुननिवर्त्ततइत्यर्थः रसोपिरागोपिपरंपरमात्मा
नंदृष्ट्वास्यस्थितप्रज्ञस्यसतोनिवर्त्ततेनश्यतीत्यर्थः यद्वानिराहारस्योपवासपरस्यविषयाः प्रायशोनिवर्त्तंतेक्षुधासंतप्तस्यशब्दस्पर्शाद्यपे
क्षाभावात परंतुरसवर्जंरसापेक्षातुननिवर्त्तत इत्यर्थः ५९ इंद्रियसंयमंविनातुस्थितप्रज्ञतानसंभवतिअतः साधकावस्थायांतत्रमहान्यत्नः

विषयाविनिवर्त्तंतेनिराहारस्यदेहिनः रसवर्जंरसोप्यस्यपरंदृष्ट्वानिवर्त्तते ५९ यततोह्यपिकौंतेयपुरुषस्यविपश्चितः
इंद्रियाणिप्रमाथीनिहरंतिप्रसभंमनः ६० तानिसर्वाणिसंयम्ययुक्तआसीतमत्परः वशेहियस्येंद्रियाणितस्यप्र
ज्ञाप्रतिष्ठिता ६१ ध्यायतोविषयान्पुंसः संगस्तेषूपजायते संगात्संजायतेकामः कामात्क्रोधोभिजायते ६२ क्रोधा
द्भवतिसंमोहः संमोहात्स्मृतिविभ्रमः॥ ९ कर्त्तव्यइत्याह यततोपीतिद्वाभ्यां यततोमोक्षेप्रयत्नमानस्यापिविपश्चितोविवेकिनो

पिमनइंद्रियाणिप्रसभंबलाद्धरंति यतः प्रमाथीनिप्रमथनशीलानिक्षोभकानि ६० यस्मादेवंतस्मात्तानीति युक्तोयोगीतानिइंद्रिया
णिसंयम्यमत्परः सन्आसीत यस्यवशेवशवर्त्तीनि एतेनकथमासीतेतिप्रश्नस्यवशीकृतेंद्रियः सन्नासीतेउत्तरमुक्तंभवति ६१ बाह्येंद्रिय राम
संयमाभावेदोषमुक्त्वामनः संयमाभावेदोषमाह ध्यायतइतिद्वाभ्यां गुणबुद्ध्याविषयान्ध्यायतः पुरुषस्यतेषुसंगआसक्तिर्भवतिआस १४
क्त्याचतेष्वधिकः कामोभवतिकामाच्चकेनचित्प्रतिहतात्क्रोधोभवति ६२ किंचक्रोधादिति क्रोधात्संमोहः कार्याकार्यविवेकाभावः॥

तर्हिसर्वकर्मफलानिपरमेश्वराराधनादेवभविष्यंतीतर्हिममापिपरमेश्वराराधनमेवकर्तव्यं नतुकर्माणीत्याशंक्यतद्वारयन्न
हृत्यभिसंधायप्रवर्तितेत्याशंक्यतद्वारयन्नाह कर्मण्येवेति तेतवतत्त्वज्ञानार्थिनः कर्मण्येवाधिकारः तत्फलेषुबंधहेतुष्वनधिकारः
कामोमास्तु ननुकर्मणिकृते तत्फलंस्यादेवभोजनेकृतेतृप्तिवदित्याशंक्याह माकर्मफलहेतुर्भूः कर्मफलप्रवृत्तिहेतुर्यस्सतथाभूतोमाभूः
कामितस्यैवस्वर्गादेर्नियोज्यविशेषणत्वेनफलत्वादकामितेफलंनस्यादितिभावः अतएव तेफलंबंधकंभविष्यतीतिभयात् अकर्मणि
कर्माकरणेतवसंगोनिष्ठामास्तु ४७ किंतर्हियोगस्थइति योगःपरमेश्वरैकपरता तत्रस्थितःकर्माणिकुरु तथासंगंकर्तृत्वाभिनिवेशंत्य

कर्मण्येवाधिकारस्तेमाफलेषुकदाचन माकर्मफलहेतुर्भूर्मातेसंगोस्त्वकर्मणि ४७ योगस्थःकुरुकर्माणिसं
गंत्यक्त्वाधनंजय सिद्ध्यसिद्ध्योःसमोभूत्वासमत्वंयोगउच्यते ४८ दूरेणह्यवरंकर्मबुद्धियोगाद्धनंजय बुद्धौशरणम
न्विच्छकृपणाःफलहेतवः ४९ बुद्धियुक्तोजहातीहउभेसुकृतदुष्कृते॥

क्त्वाकेवलमीश्वराश्रयेणैवकुरु तत्फलस्यापिज्ञान
स्यसिद्ध्यसिद्ध्योःसमोभूत्वाकेवलमीश्वरार्पणमेवकुरुयतएवंभूतंसमत्वमेवयोगउच्यतेसद्भिश्चित्तसमाधानरूपत्वात् ४८ काम्यंतु
कर्मातिनिकृष्टमित्याह दूरेणेति बुद्ध्याव्यवसायात्मिकयाकृतः कर्मयोगोबुद्धियोगः बुद्धिसाधनभूतोवातस्मात्सकाशादन्यत्काम्यंक
र्मदूरेणावरमत्यंतमपकृष्टं हियस्मादेवंतस्माद्बुद्धौज्ञानेशरणमाश्रयंकर्मयोगमन्विच्छानुतिष्ठयद्वाबुद्धौशरणंत्रातारमीश्वरमाश्रये
त्यर्थःफलहेतवस्तुसकामानराःकृपणादीनाः योवाएतदक्षरमविदित्वागार्ग्यस्माल्लोकात्प्रैतिसकृपणइतिश्रुतेः ४९ बुद्धियोगयुक्त
स्तुश्रेष्ठइत्याहबुद्धियुक्तइति सुकृतंस्वर्गादिप्रापकंदुःकृतंनिरयप्रापकंतेउभेइहैवजन्मनिपरमेश्वरप्रसादेनजहातित्यजति॥ ९ ॥

अनुविधीयते अवशीकृतं सत् इंद्रियेण सह गच्छति तदेवेंद्रियं मनः अस्य पुरुषस्य प्रज्ञां बुद्धिं हरति विषयविक्षिप्तां करोति किमुत व
त्व्यं वह्र् निप्रज्ञां हरतीति यथा प्रमत्तस्य कर्णधारस्य नावं वायुः समुद्रे सर्वतः परिभ्रमयति तद्वत् ६७ इंद्रियसंयमस्य स्थितप्रज्ञत्वे साधन
त्वं लक्षणत्वं चोक्तमुपसंहरति तस्माद्यस्येति तस्य प्रज्ञा प्रतिष्ठितेत्यस्यार्थः लक्षणत्वोपसंहारे तस्य प्रज्ञा प्रतिष्ठिता ज्ञातव्या इत्यर्थः महाबा
हो इति संबोधयन् महति वैरिनिग्रहे समर्थस्य तवात्रापि सामर्थ्यं भवेदिति सूचयति ६८ ननु कश्चिदपि प्रसुप्त इव दर्शनादिव्यापारशून्यः सा
र्वात्मना निगृहीतेंद्रियो लोके न हि दृश्यते अतोऽसंभावितमिदं लक्षणमित्याशंक्याह या निशेति सर्वेषां भूतानां या निशा निशेव निशा आत्म

तदस्य हरति प्रज्ञां वायुर्नावमिवांभसि ६७ तस्माद्यस्य महाबाहो निगृहीतानि सर्वशः इंद्रियाणींद्रियार्थेभ्यस्तस्य प्रज्ञा
प्रतिष्ठिता ६८ या निशा सर्वभूतानां तस्यां जागर्ति संयमी यस्यां जाग्रति भूतानि सा निशा पश्यतो मुनेः ६९ आपूर्य
माणमचलप्रतिष्ठं समुद्रमापः प्रविशंति यद्वत् तद्वत्कामा यं प्रविशंति सर्वे स शांतिमाप्नोति न कामकामी ७०॥ (निष्ठा आ

त्माज्ञानध्वांतावृतमतीनां तस्यां दर्शनादिव्यवहाराभावात् तस्यामात्मनिष्ठायां संयमी निगृहीतेंद्रियो जागर्त्ति प्रविबुध्यते यस्यां तु विष
यनिष्ठायां भूतानि जाग्रति प्रतिबुध्यंते सा आत्मतत्वं पश्यतो मुनेर्निशा तस्यां दर्शनादिव्यापारस्तस्य नास्तीत्यर्थः एतदुक्तं भवति यथा दिवांधा
नामुलूकादीनां रात्रावेव दर्शनं न तु दिवसे एवं ब्रह्मज्ञस्योन्मीलिताक्षस्यापि ब्रह्मण्येव दृष्टिर्न तु विषयेषु अतो नासंभावितमिदं लक्षणमिति ६९
ननु विषयेषु दृश्यमानेषु कथमसौ तान् भुंक्ते इत्यपेक्षायामाह आपूर्यमाणमिति नानानदीभिरापूर्यमाणमपि अचलप्रतिष्ठमनतिक्रांतमर्याद
मेव समुद्रं पुनरपि अन्या आपो यथा प्रविशंति न क्षोभयन्ति तथा कामा विषया यं मुनिमंतर्दृष्टिं भोगैरविक्रियमाणमेव प्रारब्धकर्मभिराक्षिप्ताः सं

यस्मादेवंतस्माद्विहायेति प्राप्तान्कामान्विहायत्यक्त्वोपेक्ष्याप्राप्तेषुचनिःस्पृहःयतोनिरहंकारःअतएवतद्भोगसाधनेषुनिर्ममःसन्नंतर्दृष्टिःभूत्वा
यश्चरतिप्रारब्धवशेनभोगान्भुंक्तेयत्रक्वापिगच्छतीतिवासशांतिंप्राप्नोति ७१ उक्तांज्ञाननिष्ठांस्तुवन्नुपसंहरतिएषेति ब्राह्मीस्थितिर्ब्रह्मज्ञाननिष्ठाए
षाएवंविधाएनांपरमेश्वराराधनेनविशुद्धांतःकरणःपुमान्प्राप्यनमुह्यतिपुनःसंसारमोहंनप्राप्नोतियतःअंतकालेमृत्युसमयेपिअस्यांक्षणमा
त्रंस्थित्वाब्रह्मनिर्वाणमृच्छतिप्राप्नोतिकिंपुनर्वक्तव्यंबाल्यमारभ्यस्थित्वाप्राप्नोतीति ७२ इतिश्रीसुबोधिन्यांटीकायांद्वितीयोऽध्यायः २ ॐशोका
पंकनिमग्नंयःसांख्ययोगोपदेशतःउज्जहारार्जुनंभक्तंसकृष्णःशरणंमम १ एवंतावदशोच्यानन्वशोचस्त्वमित्यादिनाप्रथमंमोक्षसाधनत्वेनदे

विहायकामान्यःसर्वान्पुमांश्चरतिनिःस्पृहः निर्ममोनिरहंकारःसशांतिमधिगच्छति ७१ एषाब्राह्मीस्थितिःपार्थनैनां
प्राप्यविमुह्यति स्थित्वास्यामंतकालेपिब्रह्मनिर्वाणमृच्छति ७२ इतिश्रीभगवद्गीतासूपनिषत्सुब्रह्मविद्यायांयोग
शास्त्रेश्रीकृष्णार्जुनसंवादेसांख्ययोगोनामद्वितीयोऽध्यायः २ अर्जुनउवाच ज्यायसीचेत्कर्मणस्तेमताबुद्धिर्जनार्द
न तत्किंकर्मणिघोरेमांनियोजयसिकेशव १॥

हात्मविवेकबुद्धिरुक्तातदनंतरंएषातेभिहितासांख्येबुद्धिर्योगेत्विमांशृ
एवित्यादिनाकर्मचोक्तंनचतयोर्गुणप्रधानभावःस्पष्टंदर्शितःतत्रबुद्धियुक्तस्यस्थितप्रज्ञस्यनिष्कामत्वनियतेंद्रियत्वनिरहंकारत्वाद्य
भिधानात्एषाब्राह्मीस्थितिःपार्थेतिसप्रशंसमुपसंहाराच्चबुद्धिकर्मणोर्मध्येबुद्धेःश्रैष्ठ्यंभगवतोभिमतंमत्वार्जुनउवाचज्यायसीतिक
र्मणःसकाशात्मोक्षांतरंगत्वेनबुद्धिर्ज्यायसीअधिकतराश्रेष्ठाचेत्तवसंमतातर्हिकिमर्थंतस्माद्युध्यस्वेतितस्मादुत्तिष्ठेतिचवारंवारंवदन्॥
घोरेहिंसात्मकेकर्मणिमांनियोजयसिप्रवर्तयसि १॥

ननुधर्म्याद्धियुद्धाच्छ्रेयोन्यत्क्षत्रियस्यनविद्यतेइत्यादिनाकर्मणोपिश्रेष्ठत्वमुक्तमेवेत्याशंक्याह व्यामिश्रेणेति क्वचित्कर्मप्रशंसा क्वचिज्ज्ञा
नप्रशंसाइत्येवंव्यामिश्रेणसंदेहोत्पादकमिववाक्यंतेनमेबुद्धिंमतिमुभयत्रदोलायितांकुर्वन्मोहयसीवपरमकारुणिकस्यतवमोहकत्वं
नास्त्येवतथापिभ्रांत्याममैवमाभाति अतउभयोर्मध्येयद्भद्रंतदेकंनिश्चित्यवदेतियद्वा इदमेवश्रेयःसाधनमितिनिश्चित्ययेनानुष्ठितेनश्रेयोमो
क्षमाप्नुयांप्राप्स्यामितदेवैकंवदेत्यर्थः २ अत्रोत्तरं श्रीभगवानुवाच लोकइति अयमर्थः यदिमयापरस्परंनिरपेक्षंमोक्षसाधनत्वेनकर्मज्ञानयो
गरूपंनिष्ठाद्वयमुक्तंस्यात् तर्हितयोर्द्वयोर्मध्येयद्भद्रंतदेकंवदेतित्वदीयःप्रश्नःसंगच्छेत नतुमयातथोक्तं किंतुद्वाभ्यामेकैवब्रह्मनिष्ठोक्तागुणप्र

व्यामिश्रेणेव वाक्येन बुद्धिं मोहयसीव मे तदेकं वद निश्चित्य येन श्रेयोहमाप्नुयां २ श्रीभगवानुवाच लोकेस्मिन् द्वि
विधा निष्ठा पुरा प्रोक्ता मयानघ ज्ञानयोगेन सांख्यानां कर्मयोगेन योगिनां ३ न कर्मणामनारंभान्नैष्कर्म्यं पुरुषो

धानभूतयोस्तयोःस्वातंत्र्यानुपपत्तेः एकस्यैवतुप्रकारभेदमात्रमुक्तमधिकारभेदेनेति अस्मिन् [illegible] शुद्धांतःकर **ऽश्नुते ॥**
णतयाद्विविधेलोके अधिकारिजनेद्वेविधेप्रकारौयस्याःसाद्विविधानिष्ठामोक्षपरतापुरापूर्वाध्यायेमयासर्वज्ञेनप्रोक्तास्पष्टमेवोक्ताप्र
कारद्वयमेवदर्शयति सांख्यानांशुद्धांतःकरणानांज्ञानभूमिकामारूढानांज्ञानपरिपाकार्थेज्ञानयोगेनध्यानादिनानिष्ठाब्रह्मपरतो
क्ता तानिसर्वाणिसंयम्ययुक्तआसीतमत्परइत्यादिनासांख्यभूमिकामारुरुक्षूणांत्वंतःकरणशुद्धिद्वारातदारोहार्थंतदुपायभूतकर्म
योगाधिकारिणांयोगिनांकर्मयोगेननिष्ठोक्ता धर्म्याद्धियुद्धाच्छ्रेयोन्यत्क्षत्रियस्यनविद्यतेइत्यादिना अतएवचित्तशुद्ध्यशुद्धिरूपावस्थाभेदे
नैवद्विविधापिनिष्ठोक्ता एषातेभिहितासांख्येबुद्धियोगेत्विमांशृण्विति ३ अतःसम्यक्चित्तशुद्ध्याज्ञानोत्पत्तिपर्यंतंवर्णाश्रमोचितानिकर्मा

ततःशास्त्राचार्योपदिष्टार्थस्मृतेर्विभ्रमो विचलनं विभ्रंशः ततो बुद्धेश्चेतनाया विनाशः वृक्षादिष्विवाभिभवः ततः प्रणश्यति मृततुल्यो भव
ति ६३ ननु इंद्रियाणां विषयप्रवणस्वभावानां निरोद्धुमशक्यत्वात् अयं दोषो दुष्परिहर इति स्थितप्रज्ञत्वं कथं स्यादित्याशंक्याह रागेति
द्वाभ्यां रागद्वेषरहितैर्विगतदर्पैरिंद्रियैर्विषयांश्चरन् उपभुंजानोपि प्रसादं शांतिं प्राप्नोति रागद्वेषराहित्यमेवाह आत्मनो मनसो वश्यैर्विधे
यो वशवर्त्ती आत्मा मनो यस्येति अनेनैव कथं व्रजेत भुंजीतेत्यस्य चतुर्थप्रश्नस्य स्वाधीनैरिंद्रियैर्विषयानधिगच्छतीत्युत्तरमुक्तं भवति ६४
प्रसादे सति किं स्यादित्यत्राह प्रसादे सति सर्वदुःखनाशः पापनाशः ततश्च प्रसन्नचेतसो बुद्धिः प्रतिष्ठितेत्यर्थः ६५ इंद्रियनिग्रहस्य स्थि

स्मृतिभ्रंशाद्बुद्धिनाशो बुद्धिनाशात्प्रणश्यति ६३ रागद्वेषवियुक्तैस्तु विषयानिंद्रियैश्चरन् आत्मवश्यैर्विधेयात्मा प्र
सादमधिगच्छति ६४ प्रसादे सर्वदुःखानां हानिरस्योपजायते प्रसन्नचेतसो ह्याशु बुद्धिः पर्यवतिष्ठते ६५ नास्ति बु
द्धिरयुक्तस्य न चायुक्तस्य भावना न चाभावयतः शांतिरशांतस्य कुतः सुखं ६६ इंद्रियाणां हि चरतां यन्मनोनुविधीय

तप्रज्ञतासाधनत्वं व्यतिरेकमुखेनोपपादयति नास्तीति अयुक्तस्यावशीकृतेंद्रियस्य नास्ति बुद्धिः शास्त्राचार्योपदेशाभ्यामा(ते॥
त्मविषया बुद्धिः प्रज्ञैव नोत्पद्यते कुतस्तस्याः प्रतिष्ठितावार्त्ता कुत इत्यत्राह न चायुक्तस्य भावना ध्यानं भावनया हि बुद्धेरात्मनि प्रति
ष्ठा भवति सा चायुक्तस्य यतो नास्ति न चाभावयतः आत्मध्यानमकुर्वतः शांतिरात्मनि चित्तोपरतिः अशांतस्य च कुतः सुखं मोक्षा
नंद इत्यर्थः ६६ नास्ति बुद्धिरयुक्तस्येत्यत्र हेतुमाह इंद्रियाणामिति इंद्रियाणां अवशीकृतानां स्वैरं विषयेषु चरतां मध्ये यदेवैकमिंद्रि

अकरणात्सकाशात्कर्मज्यायः अधिकतरं अन्यथाऽकर्मणः सर्वकर्मशून्यस्यतवशरीरनिर्वाहोपिनप्रसिद्ध्येत्नभवेत् ८ सांख्यास्तुसर्वमपि
ननुप्रियविषयभोगानामपिनिवृत्तेः कथंमोक्षः पुरुषार्थः स्यात् तत्राह येहीति संस्पृश्यंतइति संस्पर्शाविषयास्तेभ्योजाताये
भोगाः सुखानितेहिवर्तमानकालेपिस्पर्द्धासूयादिव्याप्तत्वात् दुःखस्यैवयोनयःकारणभूताःआदिमंतोंतवंतश्चातोविवेकीतेषु
नरमते २२ तस्मान्मोक्षएवपरः पुरुषार्थः तस्यचकामक्रोधवेगःअतिप्रतिपक्षः अतस्तत्सहनसमर्थएवमोक्षभाक् इत्याह शक्नोतीति
कामात्क्रोधाच्चोद्भवतियोवेगः मनोनेत्रक्षोभादिलक्षणःतमिहैवतदुद्भवसमयएवयोनरःसोढुंप्रतिरोद्धुंशक्नोतितदपिनक्षणमात्रंकिंतु
शरीरविमोक्षणात्प्राक् यावद्देहपातमित्यर्थः यएवंभूतः सएवयुक्तः समाहितः सुखीचभवतीनान्यः यद्वामरणादूर्द्ध्वंविलपंतीभिर्युव

ये हि संस्पर्शजा भोगा दुःखयोनय एव ते आद्यंतवंतः कौंतेय न तेषु रमते बुधः २२ शक्नोतीहैव यः सोढुं प्रा
क्छरीरविमोक्षणात् कामक्रोधोद्भवं वेगं स युक्तः स सुखी नरः २३ योंतः सुखोंतरारामस्तथांतर्ज्योति
रेव यः स योगी ब्रह्मनिर्वाणं ब्रह्मभूतोधिगच्छति २४ ॥ ६ ॥ ॥ ६ ॥ ६ ॥ ६ ६ ६ ॥ ६ ॥

तीभिरालिंग्यमानोपिपुत्रादिभिर्दह्यमानोपियथाप्राणशून्यः कामक्रोधवेगंसहतेतथामरणात्प्रागपिजीवन्नेवयः सहेतसए
वयुक्तः सुखीचेत्यर्थः तदुक्तंवशिष्ठेन प्राणेगतेयथादेहः सुखंदुःखंनविंदति तथाचेत्प्राणयुक्तोपिसकैवल्याश्रयोभवेदिति २३॥
नकेवलंकामक्रोधवेगसंहरणमात्रेणमोक्षंप्राप्नोति अपितुयोंतइति अंतःआत्मन्येवसुखंयस्यनविषयेषुअंतरेवआरामःक्रीडा
यस्यनचहि अंतरेवज्योतिर्दृष्टिर्यस्यनगीतनृत्यादिषुयः सएवंब्रह्मणिभूतः स्थितः सन्ब्रह्मणिनिर्वाणंलयमधिगच्छतिप्राप्नोति २४॥

गी० तत्रेति तस्मिन्नासने उपविश्य एकाग्रं विक्षेपरहितं मनः कृत्वा योगं युंज्यादभ्यसेत् यताउपरताश्चित्तस्येंद्रियाणां च क्रिया यस्यात्मनो
टी० श्री० मनसो विशुद्धये उपशांतये १२ चित्ते काग्र्योपयोगिनीं देहादिधारणां दर्शयन्नाह द्वाभ्यां सममिति काय इति देहमध्यभागो विवक्षितः
३३ कायश्च शिरश्च ग्रीवा च कायशिरोग्रीवं मूलाधारादारभ्य मूर्द्धांत पर्यंतं सममवक्रं अचलं निश्चलं धारयन् स्थिरो दृढप्रयत्नो भूत्वेत्यर्थः।
स्वीयं नासिकाग्रं संप्रेक्ष्येति अर्धनिमीलितनेत्र इत्यर्थः इतस्ततो दिशश्चानवलोकयन्नित्यासीतेत्युत्तरेणान्वयः १३ प्रशांतेति प्रशांत।
आत्मा चित्तं यस्य विगता भीर्भयं यस्य ब्रह्मचारिव्रते ब्रह्मचर्ये स्थितः सन् मनः संयम्य प्रत्याहृत्य मय्येव चित्तं यस्याहमेव परः पुरुषार्थो यस्य

तत्रैकाग्रं मनः कृत्वा यतचित्तेंद्रियक्रियः उपविश्यासने युंज्याद्योगमात्मविशुद्धये १२ समं कायशिरोग्रीवं धारयन्नच
लं स्थिरः संप्रेक्ष्य नासिकाग्रं स्वं दिशश्चानवलोकयन् १३ प्रशांतात्मा विगतभीर्ब्रह्मचारिव्रते स्थितः मनः संयम्य मच्चि
त्तो युक्त आसीत मत्परः १४ युंजन्नेवं सदात्मानं योगी नियतमानसः शांतिं निर्वाणपरमां मत्संस्थामधिगच्छति १५॥
नात्यश्नतस्तु योगोऽस्ति न चैकांतमनश्नतः न चातिस्वप्नशीलस्य जाग्रतो नैव चार्जुन १६ युक्ताहारविहारस्य युक्तचेष्टस्य क राम

समत्परः एवं युक्तो भूत्वा आसीत न तिष्ठेत् १४ योगाभ्यासफलमाह युंजन्निति एवमुक्तेन प्रकारेण सदात्मानं मनः युंजन्स॥ ((र्मसु॥ ३३
माहितं कुर्वन् नियतं चित्तं निरुद्धं मानसं यस्य स शांतिं संसारोपरमं प्राप्नोति कथंभूतां निर्वाणपरमं प्राप्ये यस्यां तां मत्संस्थां मद्रूपेणावस्थितिं १५
योगाभ्यासनिष्ठस्याहारादीनां नियममाह द्वाभ्यां नेति अत्यंतमधिकं भुंजानस्यैकांतमत्यंतमभुंजानस्यापि योगः समाधिर्न भवति तथाति
निद्राशीलस्यातिजाग्रतश्च योगो नैवास्ति १६ नर्हि कथंभूतस्य योगो भवतीत्यत आह युक्तेति युक्तो नियत आहारो विहारश्च गतिर्यस्य कर्मसु का
॥

यषुनियता चेष्टायस्ययुक्तौनियतौस्वप्नाववोधौनिद्राजागरौयस्यतस्यदुःखनिवर्तकोयोगः सिद्ध्यति १७ कदानिष्पन्नयोगःपुरुषोभवतीत्य
पेक्षायामाह यदेति विनियतंसंयतंचित्तमात्मन्येवनिश्चलंतिष्ठति तदाप्राप्तयोगइत्युच्यते १८ आत्मैक्याकारतयावस्थितस्यचित्त
स्योपमानमाह यथेति वातशून्येदेशे स्थितोदीपोयथानेंगतेनविचलतिसाउपमादृष्टांतः कस्यात्मविषयंयोगमभ्यसतोयोगिनःयतंनि
यतंचित्तंयस्यनिष्कंपतयाप्रकाशकतयाचचित्तंतद्वत्तिष्ठतीत्यर्थः १९ यंसंन्यासमितिप्राहुर्योगंतंविद्धिपांडवेत्यादौ कर्मैवयोगशब्देनोक्तं
नात्यश्नुतस्तु योगोस्तीत्यादौतुसमाधिर्योगशब्देनोक्तः तत्रमुख्योयोगःकइत्यपेक्षायांसमाधिमेवस्वरूपतःफलतश्चलक्षयन्स्एवमु
युक्तस्वप्नाववोधस्ययोगोभवतिदुःखहा १७ यदाविनियतंचित्तमात्मन्येवावतिष्ठते निःस्पृहःसर्वकामेभ्योयुक्तइत्यु
च्यतेतदा १८ यथादीपोनिवातस्थोनेंगतेसोपमास्मृता योगिनोयतचित्तस्ययुंजतोयोगमात्मनः १९ यत्रोपरमतेचि
त्तंनिरुद्धंयोगसेवया यत्रचैवात्मनात्मानंपश्यन्नात्मनितुष्यति २० सुखमात्यंतिकंयत्तद्बुद्धिग्राह्यमतींद्रियं वेत्तियत्रन
चैवायंस्थितश्चलतितत्त्वतः २१॥ एवंयोयोगइत्याहसार्द्धैस्त्रिभिः यत्रेतियत्रयस्मिन्नवस्थाविषयेयोगाभ्यासेननिरुद्धंचित्तमुपरतंभव
त्यविषयेआत्मनाशुद्धेनमनसाआत्मानमेवपश्यति देहादिपश्यंश्चात्मन्येवतुष्यतिनतुविषयेषुयत्रेत्यादीनांयच्छब्दानांतंयोगसंज्ञि
तंविद्यादितिचतुर्थेनान्वयः २० आत्मन्येवतोषहेतुमाह सुखमितियत्रयस्मिन्नवस्थाविशेषेयत्तत्किमपिनिरतिशयंअत्यंतिकंनित्यं
सुखंवेत्ति ननुतदाविषयेंद्रियसंबंधाभावात् कुतःसुखंस्यात् तत्राहअतींद्रियंविषयेंद्रियसंबं धातीतंकेवलंबुद्ध्यैवात्माकारतयाग्राह्य

अचलनमेवोपपादयतियमिति यमात्मसुखरूपंलाभंलब्ध्वाततोधिकमपरंलाभंम न्यतेतस्यैवनिरतिशयसुखत्वात् यस्मिंश्चस्थितो
महताशीतोष्णादिदुःखेनन विचाल्यतेनाभिभूयतेएतेनानिष्टनिवृत्तिफलेनापियोगस्यलक्षणमुक्तंद्रष्टव्यं २२ यएवंभूतोवस्थाविशेषस्तमाह
तमित्यर्धेन दुःखशब्देनदुःखमिश्रत्वाद्वैषयिकंसुखमपिगृह्यतेदुःखस्यसंयोगेनसंस्पर्शमात्रेणापिवियोगोयस्मिंस्तंअवस्थाविशेषंयोगसंज्ञितं।
योगशब्दवाच्यंजानीयात्परमात्मनाक्षेत्रज्ञस्यसंयोजनंयोगःयद्वादुःखसंयोगेनवियोगएवशूरेकातरशब्दवद्विरुद्धलक्षणयायोगउच्यतेकर्मणि
तुयोगशब्दस्तदुपायत्वादौपचारिकएवेतिभावःयस्मादेवंमहाफलोयोगस्तस्मात्सएवयत्नतःअभ्यसनीयइत्याह सइतिसार्द्धेनसयोगोनिश्च

यंलब्ध्वाचापरंलाभंमन्यतेनाधिकंततः यस्मिन्स्थितेनदुःखेनगुरुणापिविचाल्यते २२ तंविद्याद्दुःखसंयोगवियोगंयो
गसंज्ञितं सनिश्चयेनयोक्तव्योयोगोनिर्विण्णचेतसा २३ संकल्पप्रभवान्कामांस्त्यक्त्वासर्वानशेषतः मनसैवेंद्रियग्रामंवि
नियम्यसमंततः २४ शनैःशनैरुपरमेद्बुद्ध्याधृतिगृहीतया आत्मसंस्थंमनःकृत्वानकिंचिदपिचिंतयेत् २५॥ एयेनशास्त्राचा
र्योपदेशजनितेनयोक्तव्यःअभ्यसनीयःशीघ्रंनसिद्ध्यतितथापिअनिर्विण्णेननिर्वेदरहितेनचेतसायोक्तव्यःदुःखबुद्ध्याप्रयत्नशैथिल्यंनिर्वे
दः २३ किंच संकल्पेति संकल्पात्प्रभवोयेषांतान् योगप्रतिकूलान्सर्वान्कामान् अशेषतः सर्वतस्त्यक्त्वामनसाविषयदोषदर्शिनासर्वतः राम
प्रसरंतमिंद्रियसमूहंविशेषेणनियम्ययोक्तव्यइतिपूर्वेणान्वयः २४ यदितुप्राक्तनकर्मसंस्कारेणमनोविचलेत् तर्हिधारणयास्थिरी ३४
कुर्यादित्याह शनैरिति धृतिर्धारणातयावगृहीतयावशीकृतयाबुद्ध्याआत्मसंस्थंआत्मन्येवसम्यक्स्थितंनिश्चलंमनःकृत्वाउपरमेत्
तच्चशनैःशनैरभ्यासक्रमेणनतुसहसाउपरमस्वरूपमाहनकिंचिदपिचिंतयेत् निश्चलेमनसिस्वयमेवप्रकाशमानपरमानंदस्वरूपोभूत्वाआ

योगारूढस्य लक्षणं श्रेष्ठ्यं चोपपादयोपसंहरति ज्ञानेति ज्ञानमौपदेशिकं विज्ञानमपरोक्षानुभवस्ताभ्यां तृप्तो निराकांक्ष आत्मा चित्तं यस्य सः
कूटस्थो निर्विकारः अत एव विजितानींद्रियाणि येन अत एव समानि लोष्ठादीनि यस्य मृत्खंड पाषाण सुवर्णेषु हेयोपादेयबुद्धिशून्यः स युक्तो यो
गारूढ इत्युच्यते ८ सुहृदिति सुहृन्मित्रादिषु समबुद्धियुक्तस्तु ततोपि श्रेष्ठ इत्याह सुहृदिति सुहृत्स्वभावेनैव हिताशंसी मित्रं स्नेहवशेनोपका
रकः अरिर्घातकः उदासीनो विवदमानयोरुभयोरप्युपेक्षकः मध्यस्थो विवदमानयोरुभयोरपि हिताशंसी द्वेष्यः द्वेषविषयः बंधुः संबं
धी साधुः सदाचारः पापा दुराचाराः एतेषु समाराग द्वेषशून्या बुद्धिर्यस्य स तु विशिष्टः ९ एवं योगारूढस्य लक्षणमुक्त्वेदानीं तस्य सांगं योगं

ज्ञानविज्ञानतृप्तात्मा कूटस्थो विजितेंद्रियः युक्त इत्युच्यते योगी समलोष्ठाश्मकांचनः ८ सुहृन्मित्रार्युदासीनमा
ध्यस्थद्वेष्यबंधुषु साधुष्वपि च पापेषु समबुद्धिर्विशिष्यते ९ योगी युंजीत सततमात्मानं रहसि स्थितः एकाकी य
तचित्तात्मा निराशीरपरिग्रहः १० शुचौ देशे प्रतिष्ठाप्य स्थिरमासनमात्मनः नात्युच्छ्रितं नातिनीचं चैलाजिनकुशो

विधत्ते योगीत्यादिना स योगी परमो मत इत्यंतेन ग्रंथेन योगी योगारूढ आत्मानं मनः युंजीत समाहितं कुर्यात् सततं ९ तरं ११
निरंतरं रहसि एकांते स्थितः सन् एकाकी संगशून्यः यतं संयतं चित्तमात्मा देहश्च यस्य निराशीर्निराकांक्षः परिग्रहशून्यश्च १० आ
सननियमं दर्शयन्नाह द्वाभ्यां शुचाविति शुद्धे स्थाने आत्मनः स्वस्यासनं स्थापयित्वा कीदृशं स्थिरमचलं नातीवोन्नतं न चातिनीचं चै
लं वस्त्रमजिनं व्याघ्रादिचर्म चैलाजिनेकुशेभ्य उत्तरे यस्मिन् कुशानामुपरि चर्म तदुपरि वस्त्रमास्तीर्येत्यर्थः ११ ॥ ॥६॥ ॥

गी० सर्वभूतेतिसर्वेषुभूतेषुस्थितंमामभेदमाश्रित्ययोभजतिसयोगीज्ञानीसन्सर्वथाकर्मत्यागेनापिवर्त्तमानोमय्येववर्त्ततेमुच्यतेनतुभ्रश्य
टी० श्री० तीत्यर्थः ३१ एवंमांभजतांयोगिनांमध्येसर्वभूतानुकंपीश्रेष्ठइत्याह आत्मौपम्येनेति आत्मौपम्येनस्वसादृश्येनयथाममसुखंप्रियंदुःख
३५ मप्रियंतथान्येषामपीतिसर्वत्रसमंपश्यन्सुखमेवसर्वेषांयोवांछतिनतुकस्यापिदुःखंसयोगीश्रेष्ठोममाभिमतइत्यर्थः ३२ उक्तलक्षणस्य
योगस्यासंभवंमन्वानोर्जुनउवाच योयमिति साम्येनमनसोलयविक्षेपशून्यतयाकेवलात्माकारावस्थानेनयोयंयोगस्त्वयाप्रोक्तःएतस्य
योगस्यस्थिरांदीर्घकालांस्थितिंनपश्यामिमनसश्चंचलत्वात् ३३ एतत्स्फुटयति चंचलमिति चंचलंस्वभावेनैवचपलंकिंचप्रमाथिप्रमथन

सर्वथावर्त्तमानोपिसयोगीमयिवर्त्तते ३१ आत्मौपम्येनसर्वत्रसमंपश्यतियोर्जुनः सुखंवायदिवादुःखंसयोगीपर
मोमतः ३२ अर्जुनउवाच योयंयोगस्त्वयाप्रोक्तःसाम्येनमधुसूदन एतस्याहंनपश्यामिचंचलत्वात्स्थितिंस्थिरां ३३
चंचलंहिमनःकृष्णप्रमाथिबलवद्दृढं तस्याहंनिग्रहंमन्येवायोरिवसुदुष्करं ३४ श्रीभगवानुवाच असंशयंमहा
बाहोमनोदुर्निग्रहंचलं।। १९ शीलंदेहेंद्रियक्षोभकमित्यर्थः किंचबलवत्विचारेणापिजेतुमशक्यंकिंचदृढंविषयवासनानु।
बद्धतयादुर्भेदंअतोयथाकाशेदोधूयमानस्यवायोःकुंभादिषुनिरोधनमशक्यंतथातस्यमनसोपिनिग्रहंनिरोधंसुदुष्करंसर्वथावशी
कर्त्तुमशक्यंमन्ये ३४ तदुक्तंचंचलत्वादिकमंगीकृत्यैवमनोनिग्रहोपायं श्रीभगवानुवाच असंशयमिति चंचलत्वादिनामनोनि
रोद्धुमशक्यमितियद्वदसितन्निःसंशयमेवतथापितुअभ्यासेनपरमात्माकारप्रत्ययावृत्त्याविषयवैतृष्ण्येनचगृह्यते अभ्यासेनलय राम ३५
प्रतिबंधाद्वैराग्येणचविक्षेपप्रतिबंधादुपरतवृत्तिकंसत्परमात्माकारेणपरिणतंतिष्ठतीत्यर्थः तदुक्तंयोगशास्त्रेमनसोवृत्तिशून्यस्य।

ब्रह्माकारतयास्थितिः याः संप्रज्ञातनामासौसमाधिरभिधीयतेइति ३५ एतावांस्त्विह निश्चयइत्याह असंयतेति उक्तप्रकारेणाभ्यासवै
राग्याभ्यांअसंयतआत्माचित्तंयस्यतेनपुरुषेणायंयोगोदुष्प्रापःप्राप्तुमशक्यः अभ्यासवैराग्याभ्यांवश्योवशवर्त्तीआत्माचित्तंयस्यतेन
पुनस्त्वात्मनैवोपायेनप्रयत्नंकुर्वतायोगःप्राप्तुंशक्यः ३६ अभ्यासवैराग्याभावेनकथंचिदप्राप्तसम्यग्ज्ञानःकिंफलमाप्नोतीत्यर्जुनउवाच
अयतिरिति प्रथमंश्रद्धयोपेतएवयोगेप्रवृत्तःनतुमिथ्याचारतयाततःपरंतुअयतिर्नसम्यग्यततेशिथिलाभ्यासइत्यर्थः तथायोगाच्च
लितंमानसंविषयप्रवणंचित्तंयस्यमंदवैराग्यइत्यर्थः एवमभ्यासवैराग्यशैथिल्याद्योगस्यसंसिद्धिंफलंज्ञानमप्राप्यकांगतिंप्राप्नोति ३७

अभ्यासेनतुकौंतेयवैराग्येणचगृह्यते ३५ असंयतात्मनायोगोदुष्प्रापइतिमेमतिः वश्यात्मनातुयतताशक्योवाप्तुमुपा
यतः ३६ अर्जुनउवाच अयतिः श्रद्धयोपेतोयोगाच्चलितमानसः अप्राप्ययोगसंसिद्धिंकांगतिंकृष्णगच्छति ३७
कच्चिन्नोभयविभ्रष्टश्छिन्नाभ्रमिवनश्यति अप्रतिष्ठोमहाबाहोविमूढोब्रह्मणःपथि ३८ एतन्मेसंशयंकृष्ण
छेत्तुमर्हस्यशेषतः त्वदन्यःसंशयस्यास्यछेत्तानह्युपपद्यते ३९ श्रीभगवानुवाच पार्थनैवेहनामुत्रविनाशस्तस्यविद्यते

प्रश्नाभिप्रायंविवृणोतिकच्चिदिति कर्म्मणामीश्वरेर्पितत्वादननुष्ठानाच्चनतावत्कर्मफलंस्वर्गादिकंप्राप्नोति योगानिष्पत्तेश्चनमोक्षं
प्राप्नोतिएवमुभयस्माद्भ्रष्टोऽप्रतिष्ठोनिराश्रयः अतएवब्रह्मणःप्राप्त्युपायेपथिमार्गेविमूढःसन्कच्चितकिंननश्यति किंवानश्यतीत्यर्थो
नाशेदृष्टांतः यथाछिन्नमभ्रंपूर्वस्मादभ्राद्विश्लिष्टमभ्रांतरंचाप्राप्तसतमध्यएवविलीयतेतद्वदिति ३८ त्वयेवसर्वज्ञेनायंममसंदेहोनिर
सनीयस्त्वत्तोन्यस्तुसंदेहनिवर्त्तकोनास्तीत्यर्थः एतन्मइतिएततएनंछेत्तानिवर्त्तकःस्पष्टमन्यत् ३९ तत्रोत्तरंश्रीभगवानुवाच पार्थनिम्

इहलोकेनाशः उभयभ्रंशात्पातित्वं अमुत्रपरलोकनाशोनरकप्राप्तिःतदुभयंतस्यनास्त्येवयतःकल्याणकृतशुभकारीकश्चिदपिदु
र्गतिंनगच्छति अयंचशुभकारीश्रद्धयायोगेप्रवृत्तत्वात् तातेतिलोकरीत्योपलालयन्संबोधयति ४० तर्हिकिमसौप्राप्नोतीत्यपेक्षा
यामाह प्राप्येति पुण्यकारिणामश्वमेधादियाजिनांलोकान्प्राप्यतत्रशाश्वतीःसमाःबहून्संवत्सरान्उषित्वातत्सुखमनुभूयशुचीनांस
दाचाराणांश्रीमतांयतीनांसयोगभ्रष्टोजन्मप्राप्नोति ४१ अल्पकालाभ्यस्तयोगभ्रंशेगतिरियमुक्ताचिरकालाभ्यस्तयोगभ्रंशेतुपक्षांत
रमाह अथवेति योगनिष्ठानांधीमतांज्ञानिनामेवकुलेजायेतनतुपूर्वोक्तानामनारूढयोगानांकुलेएतज्जन्मस्तौति एतद्धिलोकेदुर्लभ

नहिकल्याणकृत्कश्चिद्दुर्गतिंतातगच्छति ४० प्राप्यपुण्यकृतांल्लोकानुषित्वाशाश्वतीःसमाःशुचीनांश्रीमतांगे
हेयोगभ्रष्टोभिजायते ४१ अथवायोगिनामेवकुलेभवतिधीमतां एतद्धिदुर्लभतरंलोकेजन्मयदीदृशं ४२ तत्रतं
बुद्धिसंयोगंलभतेपौर्वदेहिकं यततेचततोभूयःसंसिद्धौकुरुनंदन ४३ पूर्वाभ्यासेनतेनैवह्रियतेह्यवशोपिसः जिज्ञा
सुरपियोगस्यशब्दब्रह्मातिवर्तते ४४॥ एतरंमोक्षहेतुत्वात् ४२ ततःकिमतआह तत्रेतिसार्द्धेन तत्रहिप्रकारेजन्मनिपूर्वदेहभवंपौर्व
देहिकंतमेवब्रह्मविषययाबुद्ध्यासंयोगंलभतेततश्चभूयोऽधिकंसंसिद्धौमोक्षेधिकंप्रयत्नंकरोतितत्रहेतुःतेनैवपूर्वदेहकृताभ्यासेनअव
शोपिकुतश्चिदंतरायादनिच्छन्नपिसंह्रियतेविषयेभ्यःपरावृत्यब्रह्मनिष्ठःक्रियते ४३ तदेवंपूर्वाभ्यासवशेनप्रयत्नंकुर्वन्शनैर्मुच्यते
इतिसमर्थकैमुत्यन्यायेनस्फुटयतिसार्द्धेनजिज्ञासुरितियोगस्यस्वरूपेजिज्ञासुरेवकेवलंनतुप्राप्तयोगएवंभूतेयोगेप्रतिष्ठमात्रोपि
पापभ्रंशाद्योगभ्रष्टोपिशब्दब्रह्मवेदमतिवर्तते वेदोक्तकर्मफलान्यतिक्रामतितेभ्योधिकंफलंप्राप्यमुच्यतइत्यर्थः ४४॥ ४४४४॥

एवमपिरजोगुणवशाद्यदिमनःप्रचलेत् तर्हिपुनःप्रत्याहारेणस्थिरीकुर्यादित्याहयतइति स्वभावतश्चंचलंधार्यमाणमपिअस्थिरं
मनोयंयंविषयंप्रतिनिर्गच्छति ततस्ततःप्रत्याहृत्यआत्मन्येवस्थिरंकुर्यात् २६ एवंप्रत्याहारादिभिःपुनःपुनर्मनोवशीकुर्वतःरजोगुण
क्षयेसतियोगसुखंप्राप्नोतीत्याह प्रशांतेति एवमुक्तेनप्रकारेणशांतंरजोयस्यतं अतएवप्रशांतंमनोयस्यतंएनंनिष्कल्मषंब्रह्मत्वंप्राप्तं
योगिनमुत्तमंसमाधिसुखंस्वयमेवोपैतिप्राप्नोति २७ ततश्चकृतार्थोभवतीत्याह युंजन्निति एवमनेनप्रकारेणसर्वदाआत्मानंमनोयु
जन्वशीकुर्वन् विशेषेणसर्वात्मनागतंकल्मषंयस्यसयोगीसुखेनानायासेनब्रह्मणःसंस्पर्शःअविद्यानिवर्त्तकःसाक्षात्कारःतदे

यतोयतोनिश्चरतिमनश्चंचलमस्थिरं ततस्ततोनियम्यैतदात्मन्येववशंनयेत् २६ प्रशांतमनसंह्येनंयोगिनंसुख
मुत्तमं उपैतिशांतरजसंब्रह्मभूतमकल्मषं २७ युंजन्नेवंसदात्मानंयोगीविगतकल्मषः सुखेनब्रह्मसंस्पर्शमत्यंतं
सुखमश्नुते २८ सर्वभूतस्थमात्मानंसर्वभूतानिचात्मनि ईक्षतेयोगयुक्तात्मासर्वत्रसमदर्शनः २९ योमांपश्य
तिसर्वत्रसर्वंचमयिपश्यति तस्याहंनप्रणश्यामिसचमेनप्रणश्यति ३० सर्वभूतस्थितंयोमांभजत्येकत्वमास्थितः॥

वात्यंतंसर्वोत्तमंसुखमाप्नोतिजीवन्मुक्तोभवतीत्यर्थः २८ ब्रह्मसाक्षात्कारमेवदर्शयति सर्वभूतस्थमिति योगेनाभ्यस्यमानेनयुक्तात्मा
त्मासमाहितचित्तः सर्वत्रसमंब्रह्मैवपश्यतीतिसमदर्शनःस्वमात्मानमविद्याकृतदेहादिपरिच्छेदशून्यं सर्वभूतेषुब्रह्मादिस्थावरांतेषु
अवस्थितंपश्यति तानिचस्वात्मन्यभेदेनपश्यति २९ एवंभूतात्मज्ञानस्यसर्वभूतात्मतयामदुपासनंमुख्यंकारणमित्याह यइति मांपर
मेश्वरंसर्वत्रभूतमात्रेयःपश्यति सर्वंचप्राणिमात्रंमयियःपश्यति तस्याहंनप्रणश्यामिअदृश्योनभवामिसचममादृश्योनभवतिप्रत्यक्षोभूत्वा

असंशयंयथाभवत्येवंमांसमग्रंविभूतिबलैश्वर्यादिसहितंयथाज्ञास्यसितदिदंमयावक्ष्यमाणंशृणु १ वक्ष्यमाणंज्ञानंस्तौति ज्ञानमिति ज्ञानंशास्त्रीयंविज्ञानमनुभवस्तत्सहितमिदंमद्विषयं अशेषतस्साकल्येनवक्ष्यामियज्ज्ञात्वाइहश्रेयोमार्गेवर्तमानस्यतवपुनरन्यत् ज्ञातव्यमवशिष्टंनभवति तेनैवकृतार्थोभवतीत्यर्थः २ ममभक्तिंविनातुमज्ज्ञानंदुर्लभमित्याहमनुष्याणामिति असंख्यातानांजीवानां मध्येमनुष्यव्यतिरिक्तानांश्रेयसिप्रवृत्तिरेवनास्ति मनुष्याणांचसहस्रेषुमध्येकश्चिदद्दृष्टपुण्यवशात् आत्मनः सिद्धयेआत्मज्ञानाययततेप्रयत्नंकुर्वतामपिसहस्रेषुकश्चिदेवप्रकृष्टपुण्यवशात् आत्मानंवेत्ति तादृशानांच आत्मज्ञानसिद्धानांसहस्रेषुकश्चिदेव मांपरमात्मानंमत्प्रसादेनतत्त्वतोवेत्ति तदेवमतिदुर्लभमपितुभ्यमहंवक्ष्यामीत्यर्थः ३ एवंश्रोतारमभिमुखीकृत्येदानींप्रकृतिद्वारासृष्ट्या

असंशयंसमग्रंमांयथाज्ञास्यसितच्छृणु १ ज्ञानन्तेहंसविज्ञानमिदंवक्ष्याम्यशेषतः यज्ज्ञात्वानेहभूयोन्यज्ज्ञातव्यमवशिष्यते २ मनुष्याणांसहस्रेषुकश्चिद्यततिसिद्धये यततामपिसिद्धानांकश्चिन्मांवेत्तितत्त्वतः ३ भूमिरापोनलोवायुःखंमनोबुद्धिरेवच॥

दिकर्तृत्वेनेश्वरतत्त्वंप्रतिज्ञातंनिरूपयिष्यन्परापरभेदेनप्रकृतिद्वयमाह भूमिरिति द्वाभ्यां भूम्यादिशब्दैः पंचगंधादितन्मात्राण्युच्यंते मनःशब्देनतत्कारणभूतोहंकारः बुद्धिशब्देनतत्कारणंमहत्तत्वं अहंकारशब्देनैतत्कारणमविद्याइत्येवमष्टधाभिन्नायद्वाभूम्यादिशब्दैः पंचभूतानिसूक्ष्मैःसहैकीकृत्यगृह्यते अहंकारशब्देनैवाहंकारः तेनैवतत्कार्याणीद्रियाण्यपिगृह्यंतेबुद्धिरितिमहत्तत्वंमनःशब्देनतुमनसैवोन्नेयमव्यक्तरूपंप्रधानंइत्यनेनप्रकारेणमेप्रकृतिर्मायाख्याशक्तिरष्टधाभिन्नाविभागंप्राप्ताचतुर्विंशतिभेदभिन्नेवेत्यष्टास्वेवान्यांतर्भावविवक्षयाष्टधाभिन्नेत्युक्तंतथावक्ष्यमाणेक्षेत्राध्यायेइमामेवप्रकृतिं॥ ४ ॥

चतुर्विंशतितत्वात्मनाप्रपंचयिष्यति महाभूतान्यहंकारोबुद्धिरव्यक्तमेवच इंद्रियाणिदशैकंचपंचचेंद्रियगोचराइति ४ अपरामिमां
प्रकृतिमुपसंहरन्परांप्रकृतिमाह अपरेति अष्टधोक्तायाप्रकृतिरियमपरानिकृष्टाजडत्वात्परार्थत्वाच्च इतःसकाशात्परांप्रकृष्टाम
न्यांजीवभूतांमेप्रकृतिंजानीहि परत्वेहेतुःययाचेतनयाक्षेत्रज्ञरूपयास्वकर्मद्वारेणेदंजगद्धार्यते ५ अनयोःप्रकृतित्वंदर्शयन्स्वस्य
तद्वारासृष्ट्यादिकारणत्वमाह एतदिति एतेक्षेत्रक्षेत्रज्ञरूपेप्रकृतीयोनीकारणभूतेयेषांतान्येतद्योनीनिस्थावरजंगमात्मकानिस
र्वाणिभूतानिउपधारयबुद्ध्यस्वतत्रजडाप्रकृतिर्देहरूपेणपरिणमते चेतनातुमदंशभूताभोक्तृत्वेनदेहेषुप्रविश्यचस्वकर्मणातानि

अहंकारइतीयंमेभिन्नाप्रकृतिरष्टधा ४ अपरेयमितस्त्वन्यांप्रकृतिंविद्धिमेपरां जीवभूतांमहाबाहोययेदंधार्यते
जगत् ५ एतद्योनीनिभूतानिसर्वाणीत्युपधारय अहंकृत्स्नस्यजगतः प्रभवः प्रलयस्तथा ६ मत्तःपरतरंनान्य
त्किंचिदस्तिधनंजय मयिसर्वमिदंप्रोतंसूत्रेमणिगणाइव ७ रसोहमप्सुकौन्तेयप्रभास्मिशशिसूर्ययोः ॥ ८ ॥

धारयंति तेचमदीयेप्रकृतीमत्तःसंभूते अतोहमेवकृत्स्नस्यसप्रकृतिकस्यजगतःप्रभवःप्रकर्षेणभवत्यस्मादितिप्रभवःपरंकारणमहमि
त्यर्थः तथाप्रलीयतेअनेनेतिप्रलयः संहर्त्तापिअहमेवेत्यर्थः ६ यस्मादेवंतस्मात् मत्तइति मत्तःसकाशात्मत्परतरंश्रेष्ठंजगतःसृ
ष्टिसंहारयोः स्वतंत्रंकारणंकिंचिदपिनास्ति स्थितिहेतुरपिअहमेवइत्याहमयीति मयिसर्वमिदंजगत्प्रोतंग्रथितंआश्रितमित्य
र्थःअत्रदृष्टांतःस्पष्टार्थः ७ जगत्स्थितिहेतुत्वंप्रपंचयतिरसोहमितिपंचभिः अप्सुरसोहंरसतन्मात्ररूपयाविभूत्याआश्रयत्वेना
प्सुस्थितोप्यहमित्यर्थःतथाशशिसूर्ययोःप्रभास्मिचंद्रेर्केचप्रकाशरूपयाविभूत्यातदाश्रयत्वेनस्थितोहमित्यर्थःएवमुत्तरत्रापिद्रष्टव्यम्

गी० टी०का० ३८ षुवैखरीरूपेषुतन्मूलभूतः प्रणवः ॐकारोस्मिखेआकाशेशब्दस्तन्मात्ररूपोस्मिनृषुरूपेषुपौरुषमुद्यमोस्मिउद्यमेहिपुरुषस्तिष्ठ
ति ८ किंचपुण्यइतिपुण्योगंधोऽविकृतः गंधतन्मात्रंपृथिव्याआश्रयभूतमहमित्यर्थः यद्वाविभूतिरूपेणाश्रयत्वस्यविवक्षितत्वात्सुरभि
गंधस्यैवोत्कृष्टतयाविभूतित्वात् पुण्योगंधइत्युक्तं तथाविभावसौअग्नौयत्तेजः सहजादीप्तिः तदहंसर्वभूतेषुजीवनंप्राणधारणमा
युरहमित्यर्थःतपस्विषुवानप्रस्थादिषुद्वंद्वसहनरूपंतपः अहमस्मि ९ किंचबीजमिति सर्वेषांचराचराणांभूतानांबीजंसजातीय
कार्योत्पादनसामर्थ्यंसनातनंनित्यमुत्तरोत्तरसर्वकार्येष्वनुस्यूतंतदेवबीजंमद्विभूतिंविद्धिजानीहिनतुप्रतिव्यक्तिविनश्यत् तथाबुद्धिम

प्रणवः सर्ववेदेषुशब्दः खेपौरुषंनृषु ८ पुण्योगंधः पृथिव्यांचतेजश्चास्मिविभावसौ जीवनंसर्वभूतेषुतपश्चा-
स्मितपस्विषु ९ बीजंमांसर्वभूतानांविद्धिपार्थसनातनं बुद्धिर्बुद्धिमतामस्मितेजस्तेजस्विनामहं १० बलंबलवतांचाहं
कामरागविवर्जितं धर्माविरुद्धोभूतेषुकामोस्मिभरतर्षभ ११ येचैवसात्विकाभावाराजसास्तामसाश्चये गतएवेतितान्-
विद्धिनत्वहंतेषुतेमयि १२॥

एतांबुद्धिःप्रज्ञाहमस्मितेजस्विनांप्रगल्भानांतेजःप्रागल्भ्यमहं १० किंचबलमितिकामः अप्रा
प्तेवस्तुन्यभिलाषोराजसः रागःपुनरभिलषितेर्थेप्राप्तेपिपुनरधिकेर्थेचित्तरंजनात्मकःतृष्णापरपर्यायस्तामसःताभ्यांविवर्जितंब राम
लवतांबलमहमस्मिसात्विकंस्वधर्मानुष्ठानसामर्थ्यमहमित्यर्थःधर्मेणाविरुद्धःस्वदारेषुपुत्रोत्पत्तिमात्रोपयोगीकामोहं ११ किंचयेचे ३८
तियेचान्येसात्विकाभावाः शमदमादयःराजसाश्चहर्षदर्पादयः तामसाश्चयेशोकमोहादयःप्राणिनांस्वकर्मवशाज्जायंतेतान्सर्वा
न्मत्तएवजातानितिविद्धिमदीयप्रकृतिगुणकार्यत्वात् एवमपितेष्वहंनवर्तेजीववत्तदधीनोहंनभवामीत्यर्थः तेतुमदधीनाःसंतोमयि

यदेवंमंदप्रयत्नोपियोगीपरांगतिंयातितदायस्तुयोगीप्रयत्नादुत्तरोत्तरमधिकंयोगंयतमानोयत्नंकुर्वन्योगेनैवसंशुद्धकिल्बिषोविधूतपापः
सन्ननेकेषुजन्मसुउपचितेनयोगेनसंसिद्धः सम्यक्ज्ञानीभूत्वाततः श्रेष्ठांगतिंयातीतिकिंवक्तव्यमित्यर्थः ४५ यस्मादेवंतस्मात्तपस्विभ्यइतिकृ
च्छ्रचांद्रायणादितपोनिष्ठेभ्योज्ञानिभ्यः शास्त्रज्ञानवद्भ्योपिकर्मिभ्यः इष्टापूर्तिकारिभ्योपियोगीश्रेष्ठोभिमतः तस्मात्त्वंयोगीभव ४६ योगिना
मपियमनियमातिशयादिपराणांमध्येमद्भक्तःश्रेष्ठइत्याहयोगिनामितिमद्गतेनमय्यासक्तेनांतरात्मनामनसायोमांपरमेश्वरंश्रद्धया
युक्तःसन्भजतेसयोगयुक्तेषुश्रेष्ठोममसंमतः अतोमद्भक्तोभवेदितिभावः ४७ आत्मयोगमवोचद्योभक्तियोगशिरोमणिंतंवंदेमाध
प्रयत्नाद्यतमानस्तुयोगीसंशुद्धकिल्बिषः अनेकजन्मसंसिद्धस्ततोयातिपरांगतिं ४५ तपस्विभ्योधिकोयोगीज्ञानि
भ्योपिमतोऽधिकः कर्मिभ्यश्चाधिकोयोगीतस्माद्योगीभवार्जुन ४६ योगिनामपिसर्वेषांमद्गतेनांतरात्मनाश्रद्धा
वान्भजतेयोमांसमेयुक्ततमोमतः॥४७॥ ॥इतिश्रीभगवद्गीतासूपनिषत्सुब्रह्मविद्यायांयोगशास्त्रेश्रीकृष्णार्जुन
संवादेआत्मसंयमयोगोनामषष्ठोऽध्यायः ६ ॥ ॥श्रीभगवानुवाच ॥मय्यासक्तमनाःपार्थयोगंयुंजन्मदाश्रयः॥ ॥
वंभक्त्याभक्तकारुण्यशेवधिं इतिसुबोधिन्यांगीताटीकायांअभ्यासयोगोनामषष्ठोऽध्यायः ६ विज्ञेयमात्मनस्तत्त्वंसहयोगमुदाहृतं
भजनीयमथेदानीमैश्वरंरूपमीर्यते १ पूर्वाध्यायांतेमद्गतेनांतरात्मनायोमांभजतेसमेयुक्ततमोमतइत्युक्तंतत्रकीदृशस्त्वंयस्य
भक्तिः कर्तव्येत्यपेक्षायांस्वस्वरूपं निरूपयिष्यन्श्रीभगवानुवाच मयीतिमयिपरमेश्वरेआसक्तमभिनिविष्टंमनोयस्यसः मदाश्र
यः अहमेवाश्रयोयस्यानन्यशरणः सन्योगंयुंजन् अभ्यसन् ॥

गी॰टी॰ तेषांमध्येज्ञानीश्रेष्ठइत्याह तेषामिति तेषांमध्येज्ञानीविशिष्टः तत्रहेतवः नित्ययुक्तः सदानिष्ठः एकस्मिन्नेवभक्तिर्यस्यसः ज्ञानिनोदेहाद्यभि
श्री॰ मानाभावेनचित्तविक्षेपाभावान्नित्ययुक्तत्वमेकांतभक्तिश्चसंभवति नान्यस्य अतएवहितस्याहमत्यंतंप्रियः सचममतस्मादेतैर्नित्ययुक्तत्वादि
३९ भिश्चतुर्भिर्हेतुभिः सउत्तमइत्यर्थः १७ तर्हिकिमितरेत्रयस्त्वद्भक्ताः संसरंति नहिनहीत्याह उदाराइति सर्वेप्येतेउदाराःमहांतः मोक्षभाजएवेत्य
र्थः ज्ञानीपुनरात्मैवेति मेमतंनिश्चयः हियस्मात्सज्ञानीयुक्तात्मामदेकचित्तः सन्नविद्यतेउत्तमायस्मात्तामनुत्तमांसर्वोत्तमांगतिंमामेवास्थि
तआश्रितवान्मद्व्यतिरिक्तमन्यत्फलंनमन्यतइत्यर्थः १८ एवंभूतोभक्तोतिदुर्लभइत्याह बहूनामिति बहूनांजन्मनांमध्ये किंचित्किंचित्पु

तेषांज्ञानीनित्ययुक्तएकभक्तिर्विशिष्यते प्रियोहिज्ञानिनोत्यर्थमहंसचममप्रियः १७ उदाराःसर्वएवैतेज्ञानीत्वात्मैवमेम
तं आस्थितःसहियुक्तात्मामामेवानुत्तमांगतिं १८ बहूनांजन्मनामंतेज्ञानवान्मांप्रपद्यते वासुदेवःसर्वमितिसमहात्मासुदु
र्लभः १९ कामैस्तैस्तैर्हृतज्ञानाःप्रपद्यंतेन्यदेवताः तंतंनियममास्थायप्रकृत्यानियताःस्वया २० ॥ ण्योपचयेनअंतेचरमेजन्म

निज्ञानवान्सर्वमिदंचराचरंवासुदेवएवेतिसर्वात्मदृष्ट्यामांप्रपद्यतेभजति अतःसमहात्मा। परिच्छिन्नदृष्टिःसुदुर्लभः १९ तदेवंकामिनोपिसंतः
कामप्राप्तयेपरमेश्वरमेवयेभजंति तेकामान्प्राप्यपश्चान्मुच्यंतेइत्युक्तं येत्वत्यंतंराजसास्तामसाश्चकामाभिभूताःक्षुद्रदेवताःसेवंतेतेसंसरंती। रामः
त्याह कामैरितिचतुर्भिः येतुतैस्तैःपुत्रकीर्तिशत्रुजयादिविषयैःकामैरपहृतविवेकाःसंतःअन्याःक्षुद्राःभूतप्रेतयक्षादिदेवताभजंतिकिंकृत्वा ३९
तत्तद्देवताराधनेयोयोनियमउपवासादिलक्षणःतंतंनियमस्वीकृत्यतत्रापिस्वकीययाप्रकृत्यापूर्वाभ्यासवासनयानियतावशीकृताःसंतोदेवताविशेषं

योयइति योयोभक्तः यांयांतनुंदेवतारूपांमदीयामेवमूर्तिंश्रद्धयार्चितुंप्रवर्त्तते तस्यतस्यभक्तस्यतन्मूर्तिविषयांतामेवश्रद्धामचलांदृढामहमंत
र्यामीविदधामिकरोमि २१ सतयेति सभक्तस्तयादृढयाश्रद्धयातस्यास्तनोराराधनमीहतेकरोति ततश्चयेसंकल्पितास्तान्कामान्तस्यादेव
ताविशेषाल्लभंते किंतुमयैवतत्तद्देवतांतर्यामिणाविहितान्निर्मितान्हिस्फुटमेनत्देवतानामपिमदधीनत्वात्मन्मूर्तित्वाच्चेत्यर्थः २२ तदेवंयद्य
पिसर्वाअपिदेवताममैवमूर्त्तयः अतस्तदाराधनमपिवस्तुतोमदाराधनमेवअहमेवच तत्रफलदातापितथापितुसाक्षात्मद्भक्तानांचतेषांचफ
लवैषम्यंभवतीत्याह अंतवदिति अल्पमेधसांपरिच्छिन्नदृष्टीनांमयादत्तमपितत्फलंअंतवत्विनाशिभवति तदेवाह देवान्यजंतीतिदेवय:

योयोयांयांतनुंभक्तः श्रद्धयार्चितुमिच्छति तस्यतस्याचलांश्रद्धांतामेवविदधाम्यहं २१ सतयाश्रद्धयायुक्तस्तस्याराधनमीहते
लभतेचततः कामान्मयैवविहितान्हितान् २२ अंतवत्तुफलंतेषांतद्भवत्यल्पमेधसां देवान्देवयजोयांति मद्भक्तायांतिमाम
पि २३ अव्यक्तंव्यक्तिमापन्नंमन्यंतेमामबुद्धयः परंभावमजानंतोममाव्ययमनुत्तमं २४ ॥ जः तेदेवान् अंतवंतोयांति मद्भक्तास्तुमा
मनाद्यंतंपरमानंदंप्राप्नुवंति २३ ननुचसमानेप्रयासेमहतिचफलविशेषे सतिकिमितिदेवतांतरंहित्वात्वामेवनभजंति तत्राह अव्यक्तमिति अव्य
क्तंप्रपंचातीतंमांव्यक्तिंमनुष्यमत्स्यकूर्मादिभावंप्राप्तंअल्पबुद्धयोमन्यंतेतत्रहेतुः ममपरंभावंस्वरूपमजानंतः कथंभूतमव्ययंनित्यंनविद्यते उत्त
मोयस्मात्तंभावं अतोजगद्रक्षार्थंलीलयाविष्कृतनानाविशुद्धोर्जितसत्त्वमूर्तिंमांपरमेश्वरंचस्वकर्मनिर्मितंभौतिकंदेहंचदेवतांतरंसमंपश्यंतोमं
दमतयोमांनभजंतिप्रत्युतक्षिप्रफलददेवतांतरमेवभजंतीति तेचोक्तप्रकारेणांतवत्फलंप्राप्नुवंतीत्यर्थः २४ ६ ॥ ६ ॥ ॥

गी·टी· तेषांत्वाज्ञाने हेतुमाह नाहमिति सर्वस्य लोकस्य नाहं प्रकाशः प्रकटो न भवामि किंतु मद्भक्तानामेव यतो योगमायया समावृतः योगो युक्तिर्मदीयः कोपि
श्री· अचिंत्यप्रज्ञाविलासः स एव माया ऽघटमानघटनपटीयस्त्वात्तया संछन्नः अत एव मत्स्वरूपाज्ञाने मूढः सन्नयं लोको ऽजमव्ययं च मां न जानाति २५ सर्वो
४० त्तममत्स्वरूपमजानं तद्युक्तं तदेव स्वस्य सर्वोत्तमत्वमनावृतज्ञानशक्तित्वेन दर्शयन्नन्येषामज्ञानमाह वेदेति समतीतानि विनष्टानि वर्त्तमानानि
च भावीनि त्रिकालवर्त्तीनि भूतानि स्थावरजंगमानि सर्वाण्यहं वेद जानामि मायाश्रयत्वान्मम तस्याः स्वाश्रयव्यामोहकत्वाभावात् मां तु न कोपि वे
त्ति मन्मायामोहितत्वात् प्रसिद्धं हि लोके मायायाः स्वाश्रयाधीनत्वमन्यमोहकत्वं च २६ तदेवं मायाविषयत्वेन जीवानां परमेश्वराज्ञानमुक्तं तस्यैवा

नाहं प्रकाशः सर्वस्य योगमायासमावृतः मूढोयं नाभिजानाति लोको मामजमव्ययं २५ वेदाहं समतीतानि वर्त्तमानानि चार्जु
न भविष्याणि च भूतानि मां तु वेद न कश्चन २६ इच्छाद्वेषसमुत्थेन द्वंद्वमोहेन भारत सर्वभूतानि संमोहं सर्गे यांति परंतप २७
येषां त्वंतगतं पापं जनानां पुण्यकर्मणां ते द्वंद्वमोहनिर्मुक्ता भजंते मां दृढव्रताः २८ ॥ ज्ञानस्य दृढत्वे कारणमाह इच्छाद्वेषेति सच्च

तदिति सर्गः सर्गे स्थूलदेहोत्पत्तौ सत्यां तदनुकूले इच्छा तत्प्रतिकूले च द्वेषः ताभ्यां समुत्थितो यः शीतोष्णसुखदुःखादिद्वंद्वनिमित्तो मोहो विवेकभ्रंशः तेन स
र्वभूतानि संमोहं अहमेव सुखी दुःखी चेति गाढतरमभिनिवेशं प्राप्नुवंति अतस्तानि मज्ज्ञानाभावान्न मां भजंतीति भावः २७ कुतस्तर्हि केचन त्वां भ
जंतीत्यपेक्षायां तत्राह येषामिति येषां तु पुण्याचरणशीलानां सर्वप्रतिबंधकं पापमंतगतं नष्टं ते द्वंद्वनिमित्तेनैव मोहेन निर्मुक्ता दृढव्रताः एकांतिनः संतो

॥ रामः ४०

एवंभूतंत्वांपरमेश्वरमयंजनः किमितिनजानातीत्यतआह त्रिभिरिति त्रिभिस्त्रिविधैरेभिः पूर्वोक्तैः कामलोभादिभिर्गुणविकारैर्भावैः स्वभावैर्मोहितमिदंजगत् अतोमांनाभिजानातिकथंभूतमेभ्योभावेभ्यः परमेभिरसंस्पृष्टमेतेषानियंतारमतएवाव्ययंनिर्विकारमित्यर्थः १३ केतर्हित्वांजानंतीत्यतआह दैवीति दैवीअलौकिकीअत्यद्भुतेत्यर्थः गुणमयीसत्त्वादिगुणविकारात्मिकाममपरमेश्वरस्यशक्तिर्मायादुरत्ययादुस्तराहिप्रसिद्धमेतत् तथापिये मामेवाव्यभिचारिण्याभक्त्याप्रपद्यंतेभजंतिमायामेतांदुस्तरामपितेतरंति ततोमांजानंतीतिभावः १४ किमितितर्हिसर्वेत्वामेवनभजंतितत्राह नमामिति नरेषुयेअधमाः तेमांनभजंति अधमत्वेहेतुः मूढाः विवेकशून्याः तत्कुतः दुष्कृतिनः पापशीलाअतोमामयाप हृतंनिरस्तंज्ञा

त्रिभिर्गुणमयैर्भावैरेभिः सर्वमिदंजगत् मोहितंनाभिजानातिमामेभ्यःपरमव्ययं १३ दैवीह्येषागुणमयीममायादुरत्यया मा
मेवयेप्रपद्यंतेमायामेतांतरंतिते १४ नमांदुष्कृतिनोमूढाः प्रपद्यंतेनराधमाः माययापहृतज्ञानाआसुरंभावमाश्रिताः १५
चतुर्विधाभजंतेमांजनाःसुकृतिनोऽर्जुन आर्त्तोजिज्ञासुरर्थार्थी ज्ञानीचभरतर्षभ १६ ॥ नंशास्त्राचार्योपदेशाभ्यांजातमपिज्ञानंयेषां

ते अतएव दंभोदर्पोभिमानश्चक्रोधः पारुष्यमेवचेत्यादिनावक्ष्यमाणमासुरंस्वभावंप्राप्ताः संतोनभजंति १५ सुकृतिनस्तुमांभजंतितेचसुकृततारतम्येनचतुर्विधाइत्याह चतुर्विधाइति पूर्वजन्मसुयेकृत पुण्याजनास्तेमांभजंति तेचचतुर्विधाः आर्त्तोरोगाद्यभिभूतः सयदिपूर्वेकृतपुण्यस्तर्हिमांभजंति अन्यथाक्षुद्रदेवताभजनेनसंसरंति एवमुत्तरत्रापिद्रष्टव्यंजिज्ञासुरात्मज्ञानेच्छुः अर्थार्थीअत्रवापरत्रवाभोगसाधन

प्रश्नक्रमेणैवोत्तरं श्रीभगवानुवाच अक्षरमिति त्रिभिः नक्षरति न नश्यतीत्यक्षरं परमं यदक्षरं जगतो मूलकारणं तद्ब्रह्म एतद्वै तदक्षरं गार्गि ब्राह्मणा अभिवदंतीति श्रुतेः तस्यैव ब्रह्मण एवांशतो जीवरूपेण भवनं स्वभावः स एवात्मानं देहमधिकृत्य भोक्तृत्वेन वर्तमानोध्यात्मशब्देनोच्यत इत्यर्थः भूतानां जरायुजादीनां भावोत्पत्तिः उद्भवश्च आदित्याज्जायते वृष्टिर्वृष्टेरन्नं ततः प्रजा इत्युक्तक्रमेण वृद्धिस्तौ भावोद्भवौ करोतीति यो विसर्गः देवतोद्देशेन द्रव्यत्यागरूपो यज्ञः सर्वकर्मणामुपलक्षणमेतत् स कर्मशब्दवाच्यः ३ किंच अधिभूतमिति क्षरो भावो विनश्वरो देहादिपदार्थो भूतं

श्रीभगवानुवाच अक्षरं परमं ब्रह्म स्वभावोध्यात्ममुच्यते भूतभावोद्भवकरो विसर्गः कर्मसंज्ञितः ३
अधिभूतं क्षरो भावः पुरुषश्चाधिदैवतं अधियज्ञोहमेवात्र देहे देहभृतां वर ४ ४ ॥

प्राणिमात्रं अधिकृत्य भवतीत्यधिभूतमित्युच्यते पुरुषो वैराजः सूर्यमंडलमध्यवर्ती स्वांशभूतसर्वदेवतानामधिपतिरधिदैवतमुच्यते स वै शरीरी प्रथमः स वै पुरुष उच्यते आदिकर्त्ता स भूतानां ब्रह्माग्रे समवर्त्ततेति स्मृतेः अत्रास्मिन् देहे अंतर्यामित्वेन स्थितोहमेवाधियज्ञः यज्ञादिकर्मप्रवर्तकस्तत्फलदाता च कथमित्यस्योत्तरमनेनैवोक्तं द्रष्टव्यं अंतर्यामिणोऽसंगत्वादिभिर्गुणैः जीववैलक्षण्येन देहांतर्वर्तित्वस्य प्रसिद्धत्वात् तथा च श्रुतिः द्वा सुपर्णा सयुजा सखाया समानं वृक्षं परिषस्वजाते तयोरन्यः पिप्पलं स्वाद्वत्त्यनश्नन्नन्यो अभिचाकशीति देहभृतां मध्ये श्रेष्ठेति संबोधयन् त्वमप्येवंभूतमंतर्यामिणं पराधीनस्वप्रवृत्तिनिवृत्त्यन्वयव्यतिरेकाभ्यां बोद्धुमर्हसीति सूचयति ४ ॥

प्रयाणकालेचकथंज्ञेयोसीत्यनेनपृष्टमंतकालेज्ञानोपायतत्फलंचदर्शयति अंतकालइति मामेवोक्तलक्षणमंतर्यामिरूपंपरमेश्वरंस्मरन्देहं त्यक्त्वायःप्रकर्षेणार्चिरादिमार्गेणयातिसमद्रूपतांयाति अत्रचसंशयोनास्तिस्मरणंज्ञानोपायोमद्भावापत्तिश्चफलमित्यर्थः ५ नकेवलंमांस्मरन् मद्भावंप्राप्नोतीतिनियमः किंतर्हि यंयमिति यंयंभावंदेवतांतरंवाअन्यमपिअंतकालेस्मरन्देहंत्यजति तंतमेवस्मर्यमाणंभावंप्राप्नोति अंतकालेभा वविशेषस्मरणेहेतुः सर्वदातस्यभावोभावनानुचिंतनंतेनभावितोवासितचित्तः ६ यस्मात्पूर्ववासनैवांतकालेस्मृतिहेतुः नतुतदाविवशस्यस्मर

अंतकालेचमामेवस्मरन्मुक्त्वाकलेवरम् यःप्रयातिसमद्भावंयातिनास्त्यत्रसंशयः ५ यंयंवापिस्मरन्भावंत्यजत्यंतेकलेव
रं तंतमेवैतिकौन्तेयसदातद्भावभावितः ६ तस्मात्सर्वेषुकालेषुमामनुस्मरयुध्यचमय्यर्पितमनोबुद्धिर्मामेवैष्यस्यसंशयः
७ अभ्यासयोगयुक्तेनचेतसानान्यगामिना परमंपुरुषंदिव्यंयातिपार्थानुचिन्तयन् ८ ॥

णोद्यमःसंभवति तस्मादिति तस्मात्सर्वे दामामनुस्मरचिंतय सततंस्मरणंचचित्तशुद्धिंविनानभवति अतोयुध्यचस्वचित्तशुद्ध्यर्थंयुद्धादिकंस्वधर्मंचानुतिष्ठेत्यर्थः एवंमयिअर्पितमनः संकल्पात्मकंबुद्धिश्चव्यवसायात्मिकायेनत्वयासत्वंमामेवप्राप्स्यसि असंशयःसंशयोत्रनास्ति ७ सततंस्मरणस्यचाभ्यासोतरंगंसाधनमितिद र्शयन्नाह अभ्यासइति अभ्यासःसजातीयप्रत्ययप्रवाहःसएवयोगउपायःतेनयुक्तेनएकाग्रेणअतएवनान्यविषयंगंतुंशीलंयस्यतेनचेत सादिव्यंद्योतनात्मकंपरमेश्वरमनुचिंतयन्हेपार्थतमेवयाति ८ ॥

गी॰टी॰ पुनस्तस्यानुचिंतनीयं पुरुषं विशिनष्टि द्वाभ्यां कविमिति कविं सर्वज्ञं पुराणमनादिसिद्धमनुशासितारं नियंतारं अणोः सूक्ष्मादपि अणीयांसं अतिसूक्ष्मं
श्री॰ सर्वस्य धातारं पोषकं अपरिमितमहिमत्वादचिंत्यरूपं आदित्यवत् स्वप्रकाशात्मको वर्णः स्वरूपं यस्य तं तमसः प्रकृतेः परस्ताद्वर्तमानं ९ एवंभूतं पुरुष
४२ मंतकाले भक्तियुक्तेनानिश्चलेन यो नुस्मरेत् मनोनैश्चल्ये हेतुः योगबलेन सम्यक् सुषुम्नामार्गेण भ्रुवोर्मध्ये प्राणमावेश्येति स तं परं पुरुषं द्योतनात्मकं
प्राप्नोति १० केवलादभ्यासयोगादपि प्रणवाधारमभ्यासमंतरंगं विधित्सुः प्रतिजानीते यदक्षरमिति यदक्षरं वेदांतज्ञा वदंति एतस्यैवै अक्षरस्य प्र

कविं पुराणमनुशासितारमणोरणीयांसमनुस्मरेद्यः सर्वस्य धातारमचिंत्यरूपमादित्यवर्णं तमसः परस्तात् ९ प्रयाणकाले मन
सा चलेन भक्त्या युक्तो योगबलेन चैव भ्रुवोर्मध्ये प्राणमावेश्य सम्यक् स तं परं पुरुषमुपैति दिव्यम् १० यदक्षरं वेदविदो वदंति
विशंति यद्यतयो वीतरागाः यदिच्छंतो ब्रह्मचर्यं चरंति तत्ते पदं संग्रहेण प्रवक्ष्ये ११ सर्वद्वाराणि संयम्य मनो हृदि निरुध्य च मू
र्ध्न्याधायात्मनः प्राणमास्थितो योगधारणां १२ ओमित्येकाक्षरं ब्रह्म व्याहरन्मामनुस्मरन् ॥ शासने गार्गि सूर्याचंद्रमसौ विधृतौ तिष्ठ

त इति श्रुते वीतरागो येभ्यस्ते यतयः प्रयत्नवंतो यद्विशंति यत् ज्ञातुमिच्छंतो गुरुकुले ब्रह्मचर्यं चरंति तत्ते तुभ्यं पद्यते गम्यत इति पदं प्राप्यं संक्षेपेण प्र
वक्ष्ये तत्प्राप्त्युपायं कथयिष्यामीत्यर्थः ११ प्रतिज्ञातमुपायं सांगमाह द्वाभ्यां सर्वेति सर्वाणींद्रियद्वाराणि संयम्य प्रत्याहृत्य चक्षुरादिभिर्बाह्यविषय ग्रामः
ग्रहणमकुर्वन्नित्यर्थः मनश्च हृदि निरुध्य बाह्यस्मरणमकुर्वन्नित्यर्थः मूर्ध्नि भ्रुवोर्मध्ये प्राणमाधाय योगस्य धारणां स्थैर्यमास्थित आश्रितवान् सन् ४२
१२ ओमिति ओमित्येकं यदक्षरं तदेव ब्रह्मवाचकत्वाद्ब्रह्मप्रतिमादि ॥

एवंचमांभजंतः सर्ववित्रेयंविज्ञायकृतार्थाभवंतीत्याहजरेति जरामरणयोर्मोक्षायनिरासार्थंमामाश्रित्ययेप्रयतंते तेतत्परंब्रह्मविदुः कृत्स्नमध्यात्मं
चविदुः येनतत्प्राप्तयंदेहादिव्यतिरिक्तंशुद्धमात्मानंचजानंतीत्यर्थः तत्साधनभूतमखिलंसरहस्यंकर्मचजानंति २९ नचैवंभूतानांयोगभ्रंशःशंका
पीत्याह साधिभूतेति अधिभूतादि शब्दानांअर्थंश्रीभगवानेवाननतराध्याये व्याख्यास्यति अधिभूतेनाधिदैवेनचमहाधियज्ञेनचस
हितं येमांजानंतितेयुक्तचेतसः मय्यासक्तमनसः प्रयाणकालेपिमरणसमयेपिमांविदुः नतुतदापिव्याकुलीभूयमांविस्मरयंति अतोमद्भक्ता

जरामरणमोक्षायमामाश्रित्ययतंतिये तेब्रह्मतद्विदुःकृत्स्नमध्यात्मंकर्मचाखिलं २९ साधिभूताधिदैवंमांसाधियज्ञंचयेवि
दुः प्रयाणकालेपिचमांतेविदुर्युक्तचेतसः ३० इतिश्रीभगवद्गीतासूपनिषत्सुब्रह्मविद्यायांयोगशास्त्रे श्रीकृष्णार्जुनसंवादेवि
ज्ञानयोगोनामसप्तमोऽध्यायः ७ अर्जुनउवाच किंतद्ब्रह्मकिमध्यात्मंकिंकर्मपुरुषोत्तम अधिभूतंचकिंप्रोक्तमधिदैवंकि
मुच्यते १ अधियज्ञःकथंकोत्रदेहेस्मिन्मधुसूदन प्रयाणकालेचकथंज्ञेयोसिनियतात्मभिः २ ॥ नानयोगभ्रंशःशंकेत्यर्थः ३०

कृष्णभक्तैर्यत्नेनब्रह्मज्ञानमवाप्यतेइतिविज्ञानयोगाख्येसप्तमेतंप्रकाशितं ३० इतिश्रीसुबोधिन्यांटीकायांसप्तमोऽध्यायः ७ ब्रह्मकर्माधिभूता
दिविदुःकृष्णैकचेतसः इत्युक्तंब्रह्मकर्मादिस्पष्टमष्टमउच्यते १ पूर्वाध्यायांतेभगवतोपक्षिप्तानांब्रह्माध्यात्मादिसप्तानांपदार्थानांतत्त्वंजिज्ञासुरर्जुन
उवाच किंतद्ब्रह्मकिमध्यात्ममित्यादिद्वाभ्यांस्पष्टार्थः १ किंचअधियज्ञेति अत्रदेहेयोयज्ञोनिवर्ततेतेनतस्मिन्कोधियज्ञः अधिष्ठाताप्रयोजकःफल
दाताचकइत्यर्थः सरूपंपृष्टाऽधिष्ठानप्रकारंपृच्छतिकथंकेनप्रकारेणासावस्मिन्देहेस्थितोयज्ञमधितिष्ठतीत्यर्थः यज्ञग्रहणंसर्वकर्मणामुपलक्ष

ननुचतपस्विनोदानशीलावीतरागास्तितिक्षवः त्रिलोक्याउपरिस्थानंलभंतेशोकवर्जितमित्यादिपुराणवाक्यैस्त्रिलोक्याउपरिस्थानं
लभंतेशोकवर्जित मित्यादिपुराणवाक्यैस्त्रिलोक्याःसकाशात् महर्लोकादीनामुत्कृष्टत्वंगम्यते विनाशित्वेचसर्वेषामविशिष्टेकथमसौ
विशेषःस्यादित्याशंक्यबह्वल्पकालावस्थायित्वनिमित्तोसौविशेषइत्याशयेनस्वमानेनशतवर्षायुर्ब्रह्मणोऽहन्यहनित्रिलोक्याउत्पत्तिर्निशि
निशिचप्रलयोभवतितिदर्शयिष्यन्ब्रह्मणःअहोरात्रयोःप्रमाणमाह सहस्रेति सहस्रंयुगानिपर्यंतोवसानंयस्यतद्ब्रह्मणोयदहःतद्येविदुः
युगसहस्रमंतोयस्यास्तांरात्रिंचयोगबलेनयेविदुस्तएवसर्वज्ञाजनाःअहोरात्रविदः येषांतुकेवलंचंद्रार्कगत्यैवज्ञानंतेनतथाहोरात्रविदः
नभवंति अल्पदर्शित्वात्युगशब्देनात्रचतुर्युगमभिप्रेतं चतुर्युगसहस्रंतुब्रह्मणोदिनमुच्यतेइत्यादिपुराणोक्तेःब्रह्मणइतिमहर्लोकादि

सहस्रयुगपर्यंतमहर्यद्ब्रह्मणोविदुः रात्रिंयुगसहस्रांतांतेहोरात्रविदोजनाः १७
अव्यक्ताद्व्यक्तयःसर्वाःप्रभवंत्यहरागमे रात्र्यागमेप्रलीयंतेतत्रैवाव्यक्तसंज्ञके १८ ॥

वासिनामप्युपलक्षणार्थं तत्रायंकालगणनाप्रकारःमनुष्याणांयद्वर्षंदेवानांतदहोरात्रंतादृशैरहोरात्रैःपक्षमासादिकल्पनयाद्वादशभिर्व
र्षसहस्रैश्चतुर्युगंभवति चतुर्युगसहस्रंतुब्रह्मणोदिनंतावत्प्रमाणैवरात्रिःतादृशैश्चाहोरात्रैःपक्षमासादिक्रमेणवर्षशतंब्रह्मणःपरमायु
रिति १७ ततःकिमतआह अव्यक्तादितिकार्यस्याव्यक्तंरूपंकारणात्मकंतस्मादव्यक्तात्कारणरूपात् व्यज्यंते अभिव्यज्यंतेइतिव्यक्तयः
चराचराणिभूतानिप्रादुर्भवंतिकदाअहरागमेब्रह्मणोदिनस्योपक्रमेतथारात्र्यागमेतस्मिन्नेवाव्यक्तसंज्ञकेकारणरूपेप्रलयंयांतियद्वाते
होरात्रविदइत्येतन्नविधीयतेकिंतुतेप्रसिद्धाहोरात्रविदोजनाःयद्ब्रह्मणोहर्विदुस्तस्याह्नआगमे अव्यक्ताद्व्यक्तयः प्रभवंति यांचरात्रिंविदुः
तस्यारात्र्यागमेप्रलीयंतेइतिद्वयोरन्वयः १८॥

तत्र चक्रंतनाशाक्रंताभ्यागमशंकांवारयन् वैराग्यार्थंसृष्टिप्रलयप्रवाहस्याविच्छेदंदर्शयति भूतग्रामेति भूतानांचराचरप्राणि
नांग्रामः समूहोयःप्रागासीत्सएवायंअहरागमे भूत्वाभूत्वारात्र्यागमेप्रलीयतेपुनरपिअहरागमेवशः कर्मादिपरतंत्रःप्रभवतिनान्यइत्य
र्थः १९ लोकानामनित्यत्वंप्रपंच्यपरमेश्वरस्वरूपस्यनित्यत्वंप्रपंचयति परइतिद्वाभ्यां तस्मात्चराचरकारणभूताव्यक्तात्परस्तु भ
स्यापिकारणभूतोयोन्यस्तद्विलक्षणोव्यक्तश्चक्षुराद्यगोचराभावः सनातनः अनादिः सतुसर्वेषुकार्यकारणलक्षणेषुभूतेषुनश्यत्
स्वपिनविनश्यति २० अविनाशेप्रमाणंदर्शयन्नाह अव्यक्तइति योभावः अतींद्रियोक्षरः प्रदेशनाशशून्यइति तथाक्षरात्संभ

भूतग्रामः सएवायंभूत्वाभूत्वाप्रलीयते रात्र्यागमेवशः पार्थप्रभवत्यहरागमे १९ परस्तस्मात्तुभावोन्योव्यक्तोव्य
क्तात्सनातनः यःससर्वेषुभूतेषुनश्यत्सुनविनश्यति २० अव्यक्तोक्षरइत्युक्तस्तमाहुःपरमांगतिंयंप्राप्यननिवर्त्तं
तेतद्धामपरमंमम २१ पुरुषःसपरः पार्थभक्त्यालभ्यस्त्वनन्यया यस्यांतःस्थानिभूतानियेनसर्वमिदंततं २२

वतीदंविश्वमित्यादिश्रुतिष्वक्षरइत्युक्तः तंपरमांगतिंगम्यंपुरुषार्थमाहुः पुरुषान्नपरंकिंचित्साकाष्ठासापरागतिरित्यादिश्रु
तयः परमगतित्वमेवाह यंप्राप्यननिवर्त्तंतइतितच्चममैवधामस्वरूपं अतोहमेवपरमागतिरित्यर्थः २१ तत्प्राप्तौचभक्तिरंतरं
गोपायइत्युक्तमेवेत्याह पुरुषइति सएवाहंपरः पुरुषः अनन्ययाएकांतभक्त्यैवलभ्योनान्यथा परत्वमेवाह यस्यकारणभू
तस्यअंतर्मध्येभूतानिस्थितानियेनचकारणभूतेनसर्वमिदंजगत्ततंव्याप्तम् २२ ॥ ६ ॥ ❀ ॥ ५६ ॥ ❀ ॥ ६ ॥

मावृतिं॰ ८

ततएवंपरमेश्वरोपासकास्तत्पदंप्राप्यननिवर्त्तंते अन्येतुनिवर्त्तंतेइत्युक्तं तत्रकेनमार्गेणगतानवर्त्तंतेकेनवागताश्चावर्त्तंतइत्य
पेक्षायामाह यत्रेति यत्रयस्मिनकालेप्रयातायोगिनोऽनावृत्तिंयांति यस्मिंश्चकालेआवृत्तिंयांतितंकालंवक्ष्यामीत्यन्वयअत्रच
रश्म्यनुसारीअतश्चायनेपिदक्षिणइतिसूत्रितन्यायेनउत्तरायणादिकालविशेषमरणस्याविवक्षितत्वात् कालशब्देनकालाभि
मानिनीभिरातिवाहिकाभिर्देवताभिः प्राप्योमार्गउपलक्ष्यते अतोयमर्थःयस्मिन्कालाभिमानिनीदेवतोपलक्षितेमार्गेप्रयातायोगि
नःउपासकाः कर्मिणश्चयथाक्रममनावृत्तिमावृत्तिंचयांति तंकालाभिमानिनीदेवतोपलक्षितंमार्गंकथयिष्यामीति अग्निर्ज्योति।

यत्रकालेत्वनावृत्तिंचैवयोगिनः प्रयातायांतितंकालंवक्ष्यामिभरतर्षभ २३ अग्निर्ज्यो
तिरहः शुक्लःषण्मासाउत्तरायणं तत्रप्रयातागच्छंतिब्रह्मब्रह्मविदोजनाः ॥ २४ ॥अग्नि

षोः कालाभिमानित्वाभावेपिभूयसामहरादिशब्दोक्तानांकालाभिमानित्वात्तत्साहचर्यादाम्रवणमित्यादिवत्कालशब्देनोपल
क्षणमविरुद्धं २३ तत्रानावृत्तिमार्गमाह अग्निरिति अग्निर्ज्योतिःशब्दाभ्यांतेर्चिषमभिसंभवंतीतिश्रुत्युक्तार्चिरभिमानिनीदेव
तोपलक्ष्यते अहरिति दिवसाभिमानिनीशुक्लइतिशुक्लपक्षाभिमानिनीउत्तरायणरूपाःषण्मासाइत्युत्तरायणाभिमानिनी एतच्चा
न्यासामपिश्रुत्युक्तानांसर्वासांदेवलोकादिदेवतानामुपलक्षणार्थं एवंभूतोयोमार्गस्तत्रप्रयातागताभगवदुपासकाजनाब्रह्मप्राप्नुवंति
तथाचश्रुतिः तेर्चिषमभिसंभवंतिअर्चिषोहरह्नआपूर्यमाणपक्षमापूर्यमाणपक्षाद्यान्षडुदङ्ङेतिमासांस्तानमासेभ्योदेवलो

॥ श्रीहरिः ॥

ब्रह्मप्रतीकत्वाद्वाब्रह्मतद्व्याहरन्नुच्चारयन्तद्वाच्यंचमामनुस्मरन्नेवदेहंत्यजन्यः प्रकर्षेणयाति अर्चिरादिमार्गेणसपरमांश्रेष्ठांगतिंस
द्गतियातिप्राप्नोति १३ एवमन्तकालेधारणयामत्प्राप्तिर्नित्याभ्यासवतएवभवति नान्यस्येतिपूर्वोक्तमेवानुसारयति अनन्येति नास्तिअ
न्यस्मिन्चेतोयस्यतथाभूतः सन् योमांसततंनिरंतरंनित्यशः प्रतिदिनंस्मरति तस्यनित्ययुक्तस्यसमाहितस्याहंसुखेनलभ्योस्मि।
नान्यस्य १४ यद्येवंत्वंसुलभोसि ततः किमतआहमामिति उक्तलक्षणामहात्मानोमद्भक्तामांप्राप्यपुनर्दुःखालयंअनित्यंचजन्मनप्रा

यःप्रयातित्यजंदेहंसयातिपरमांगतिं १३ अनन्यचेताःसततंयोमांस्मरतिनित्यशः तस्याहंसुलभः पार्थनि
त्ययुक्तस्ययोगिनः १४ मामुपेत्यपुनर्जन्मदुःखालयमशाश्वतं नाप्नुवंतिमहात्मानः संसिद्धिंप
रमांगताः १५ आब्रह्मभुवनाल्लोकाः पुनरावर्तिनोर्जुन मामुपेत्यतुकौंतेयपुनर्जन्मनविद्यते १६ ॥

प्नुवंतियतस्तेपरमांसम्यक्सिद्धिंमोक्षमेवप्राप्ताः पुनर्जन्मनोदुःखानांचालयंस्थानंनेमामुपेत्यनप्राप्नुवंतीतिवा १५ एतदेवस
र्वेष्वपिलोकेषुपुनरावृत्तिंदर्शयन्निर्द्धारयति आब्रह्मेति ब्रह्मणोभुवनंवासस्थानंब्रह्मलोकस्तमभिव्याप्यसर्वेलोकाः पुनराव
र्तनशीलाः ब्रह्मलोकस्यापिविनाशित्वात्तत्रत्यानामनुत्पन्नज्ञानानामवश्यंभावि पुनर्जन्मयएवंक्रममुक्तिफलाभिरुपासनाभि
र्ब्रह्मलोकप्राप्तास्तेषांतत्रोत्पन्नज्ञानानांब्रह्मणासहमोक्षोनान्येषांमामुपेत्यवर्तमानानांपुनर्जन्मनास्त्येवेत्यर्थः ॥ १६ ॥ ॐ ॥

गी० इतिश्रीसुबोधिन्यांटीकायांअष्टमोऽध्यायः ८ परेशःप्राप्यतेशुद्धभक्त्येतिनिश्चितमष्टमेनवमेतुतदैश्वर्यमत्याश्चर्यंप्रपंच्यते १ एवंतावत्सप्तमाष्टम
टी० श्री० योःस्वकीयपरमेश्वरतत्त्वंभक्त्यैवसुलभंनान्यथेत्युक्तम्इदानीमचिंत्यंस्वकीयपरमैश्वर्यंभक्तेश्चासाधारणप्रभावंप्रपंचयिष्यन्श्रीभगवानुवाच
८५ इदंत्विति विशेषेणज्ञायतेनेनेतिविज्ञानमुपासनंतत्सहितंज्ञानमीश्वरविषयमिदंतु अनसूयवेपुनःपुनःस्वमाहात्म्यमेवोपदिशती
त्येवंपरमकारुणिकेमयिदोषदृष्टिरहितायतुभ्यंवक्ष्यामि तुशब्दोवैशिष्ट्येतदेवाह गुह्यतममित्यादिनागुह्यंधर्मज्ञानंततोदेहादिव्यतिरि
क्तमात्मज्ञानंगुह्यतरं ततोपिपरमात्मज्ञानमतिरहस्यत्वाद्गुह्यतमंयत्ज्ञात्वा अशुभात्संसाराद्यएवमुक्तोभविष्यसिकिंचराजविद्येतिद्वं

इतिश्रीभगवद्गीतासूपनिषत्सुब्रह्मविद्यायांयोगशास्त्रेश्रीकृष्णार्जुनसंवादेमहापुरुषयोगोनामाष्टमोऽध्यायः
८ श्रीभगवानुवाच इदंतुतेगुह्यतमंप्रवक्ष्याम्यनसूयवे ज्ञानंविज्ञानसहितंयज्ज्ञात्वामोक्ष्यसेशुभात् १ राजविद्या
राजगुह्यंपवित्रमिदमुत्तमं प्रत्यक्षावगमंधर्म्यंसुसुखंकर्तुमव्ययं २ अश्रद्दधानाःपुरुषाधर्मस्यास्यपरंतप अप्रा
प्यमांनिवर्तंतेमृत्युसंसारवर्त्मनि ३॥ ९ ज्ञानंराजविद्याविद्यानांराजागुह्यानांचराजाराजविद्यासुगोप्येषुश्रतिश्रेष्ठमित्यर्थः रा
जदंतादित्वादुपसर्जनस्यपरत्वंउत्तमंपवित्रमिदमत्यंतंपावनंइदंप्रत्यक्षावगमंचदृष्टफलंधर्म्यंधर्मादनपेतंसर्वधर्मफलत्वात्कर्तुंसु
सुखंचकर्तुंसुखेनकर्तुंशक्यमित्यर्थः अव्ययंचाक्षयफलत्वात् २ नन्वेवमतिसुकरत्वेकेनामसंसारिणःस्युस्तत्राह अश्रद्दधानाइति॥ राम
अस्यभक्तिसहितज्ञानलक्षणस्य धर्मस्येतिकर्मणिषष्ठीइमंधर्ममश्रद्दधानाआस्तिक्येनअस्वीकुर्वंतःउपायांतरेणमत्प्राप्त ८५
येकृतप्रयत्नाअपिमामप्राप्यमृत्युयुक्तेसंसारवर्त्मनिनिमित्तेनिवर्तंतेमृत्युव्याप्तेसंसारमार्गेपरिभ्रमंतीत्यर्थः ३॥ ९॥ ❀ ॥ ९॥

तदेवंवक्तव्यतयाप्रस्तुतस्यज्ञानस्यस्तुत्याश्रोतारमभिमुखीकृत्यतदेवज्ञानंकथयति मयेतिद्वाभ्यां अव्यक्ता अतींद्रियामूर्तिःस्वरूपंयस्यता
दृशेनमयाकारणभूतेनसर्वमिदंजगत्ततंव्याप्तं अतएवकारणभूतेमयितिष्ठंतीतिमत्स्थानिसर्वाणिचराचराणिभूतानि एवमपिघटपटा
दिषुसर्वकार्येषुमृत्तिकेवतेषुभूतेषुनाहमवस्थितः असंगत्वात् ४ किंच नचेति नचमयिस्थितानिभूतानिअसंगत्वादेवमम ननुतर्हिव्याप
कत्वमाश्रयत्वंचपूर्वोक्तंविरुद्धमित्याशंक्याह मेऐश्वरमसाधारणंयोगंयुक्तिमघटितघटनाचातुर्यमिदंपश्यमदीययोगमायावैभवस्या
वितर्क्यत्वात्नकिंचिद्विरुद्धमित्यर्थः अन्यदपिआश्चर्यंपश्येत्याह भूतानिबिभर्तिधारयतीतिभूतभृत् भूतानिभावयतीपालयतीतिभूतभा

मयाततमिदंसर्वंजगदव्यक्तमूर्त्तिना मत्स्थानिसर्वभूतानिनचाहंतेष्ववस्थितः ४ नचमत्स्थानिभूतानिपश्यमेयो
गमैश्वरं भूतभृन्नचभूतस्थोममात्माभूतभावनः ५ यथाकाशस्थितोनित्यंवायुःसर्वत्रगोमहान् तथासर्वाणिभू
तानिमत्स्थानीत्युपधारय ६ सर्वभूतानिकौंतेयप्रकृतिंयांतिमामिकां कल्पक्षयपुनस्तानिकल्पादौविसृजाम्यहं ७

वनःएवंभूतः अपिममात्मापरस्वरूपंभूतस्थोनभवति अयंभावःयथाजीवोबिभ्रत्पालयंश्चदेहमहंकारेणतत्संश्लिष्टस्तिष्ठति एवंभू
तःअहंभूतानिधारयन्पालयन्अपिनतेषुतिष्ठामिनिरहंकारत्वादिति ५ असंश्लिष्टयोरपिआधाराधेयभावंदृष्टांतेनाह यथेति अवका
शंविनावस्थानानुत्पत्तेर्नित्यमाकाशेस्थितोवायुःसर्वगतोपिमहानपिनाकाशेनसंश्लिष्यतेनिरवयवत्वेनसंश्लेषायोगात् तथासर्वाणिभू
तानिमयिस्थितानीतिजानीहि ६ तदेवमसंगस्यैवयोगमाययास्थितिहेतुत्वमुक्तंतथैवसृष्टिलयहेतुत्वंचाहसर्वभूतानीति कल्पक्षयेप्र
लयकालेसर्वाणिभूतानिमदीयांप्रकृतिंयांतित्रिगुणात्मिकायांमायायांलीयंतेपुनःकल्पादौसृष्टिकालेतानिविशेषेणसृजामि ७॥ ९॥

नन्वसंगो निर्विकारश्च त्वं कथं सृजसीत्यपेक्षायामाह स्वीयां स्वाधीनां प्रकृतिमवष्टभ्याधिष्ठाय प्रलये लीनं सन्तं चतुर्विधमिमं सर्वं भूतग्रामं कर्मा
दिपरवशं पुनश्चतुर्विधं सृजामि कथं प्रकृतेर्वशात् प्राचीनकर्मनिमित्ततत्स्वभावबलात् ८ ननु एवं नानाविधानि कर्माणि कुर्वतस्तव जीववद्बं
धः कथं न स्यादित्याशंक्याह नचेति तानि सृष्ट्यादीनि कर्माणि मां न निबध्नंति कर्मासक्तिर्हि बंधहेतुः सा च आप्तकामत्वान्मम नास्ति अत उदासी
नवद्वर्त्तमानस्य मे बंधं नापादयंति उदासीनत्वे कर्तृत्वानुपपत्तेः कर्तृत्वे चोदासीनत्वानुपपत्तेः उदासीनवत् स्थितमित्युक्तं ९ तदेवोपपादयति
मयेति मयाध्यक्षेणाधिष्ठात्रा निमित्तभूतेन प्रकृतिः सचराचरं विश्वं सूयते जनयति अनेन मदधिष्ठानेन हेतुना इदं जगद्विपरिवर्त्तते पुनः

प्रकृतिं स्वामवष्टभ्य विसृजामि पुनः पुनः भूतग्राममिमं कृत्स्नमवशं प्रकृतेर्वशात् ८ नच मां तानि कर्माणि निबध्नंति ध
नंजय उदासीनवदासीनमसक्तं तेषु कर्मसु ९ मयाध्यक्षेण प्रकृतिः सूयते सचराचरं हेतुनानेन कौंतेय जगद्विपरिवर्त्त
ते १० अवजानंति मां मूढा मानुषीं तनुमाश्रितं परं भावमजानंतो मम भूतमहेश्वरं ११ मोघाशा मोघकर्माणो मोघज्ञाना
विचेतसः राक्षसीमासुरीं चैव प्रकृतिं मोहिनीं श्रिताः १२॥ पुनर्जायते सन्निधिमात्रेणाधिष्ठातृत्वात् कर्तृत्वमुदासीनत्वं चाविरुद्धमिति भा
वः १० नन्वेवंभूतं परमेश्वरं त्वां किमिति केचिन्नाद्रियंते तत्राह द्वाभ्यां अवजानंतीति सर्वभूतमहेश्वरं रूपं मदीयं परं तत्त्वमजानंतः मूर्खाः सुखोपं
स्नीयमिति मामवमन्यंते अज्ञाने हेतुः शुद्धसत्त्वमयीमपि तनुं स्वभक्तेच्छावशात् मनुष्याकारमाश्रितवंतं ११ किंच मोघाशा इति मत्तः अन्य
देवतांतरं क्षिप्रं फलं सास्यतीत्येवंभूताः मोघा निष्फलैव आशा येषां ते अत एव मद्विमुखत्वात् मोघानि व्यर्थानि कर्माणि येषां ते मोघमेव नाना
कुतर्काश्रितं शास्त्रज्ञानं येषां ते अत एव विचेतसो विक्षिप्तचित्ताः सर्वत्र हेतुः राक्षसीं तामसीं हिंसादिप्रचुरां आसुरीं च कामदर्पादिबहुलां मोहनीं

आवृत्तिमार्गमाह धूमइति धूमाभिमानिनीदेवतारात्र्यादिशब्दैश्चपूर्ववद्देवरात्रिकृष्णपक्षदक्षिणायनरूपेणषण्मासाभिमानिन्यस्तिस्रोदेवतालक्ष्यंते एताभिर्देवताभिरुपलक्षितोयोमार्गस्तत्रप्रयाताःकर्मयोगीचांद्रमसंज्योतिस्तदुपलक्षितंस्वर्गलोकंप्राप्यतत्रेष्टापूर्त्तकर्मफलंभुक्त्वापुनरावर्त्तते तत्रापिश्रुतिः तेधूममभिसंभवंतीत्यादितदेवंनिवृत्तिकर्मसहितोपासनयाक्रममुक्तिः काम्यकर्मभिःस्वर्गभोगानंतरमावृत्तिर्निषिद्धकर्मभिस्तुनरकभोगानंतरमावृत्तिः क्षुद्रकर्मणांजंतूनामत्रैवपुनःपुनर्जन्मेतिद्रष्टव्यं २५ उक्तौमार्गावुपसंहरति शुक्लेति शुक्लार्चिरादिगतिःप्रकाशमयत्वात् कृष्णाधूमादिगतिस्तमोमयत्वात् एतेगतीमार्गौज्ञानिकर्माधिकारिणोजगतःशाश्वतेअना॥

धूमोरात्रिस्तथाकृष्णःषण्मासादक्षिणायनं तत्रचांद्रमसंज्योतिर्योगीप्राप्यनिवर्त्तते २५ शुक्लकृष्णेगतीह्येतेजगतःशाश्वतेमते एकयायात्यनावृत्तिमन्ययावर्त्ततेपुनः २६ नैतेसृतीपार्थजानन्योगीमुह्यतिकश्चन तस्मात्सर्वेषुकालेषुयोगयुक्तोभवार्जुन २७ वेदेषुयज्ञेषुतपस्सुचैवदानेषुयत्पुण्यफलंप्रदिष्टं अत्येतितत्सर्वमिदंविदित्वायोगीपरंस्थानमुपैतिचाद्यं २८॥

दीसंमतेसंसारस्यानादित्वात् तयोरेकयाशुक्लयाऽनावृत्तिंमोक्षंयाति अन्ययाकृष्णयापुनरावर्त्तते २६ मार्गज्ञानफलंदर्शयन्भक्तियोगमुपसंहरतिनैतेइति एतेसृतीमार्गौहेपार्थमोक्षसंसारप्रापकौजानन्कश्चिदपियोगीनमुह्यति सुखबुद्ध्यास्वर्गादिफलंनकामयेतकिंतुपरमेश्वरनिष्ठएवभवतीत्यर्थःस्पष्टमन्यत् २७ अध्यायार्थमष्टप्रश्नार्थनिर्णयंसफलमुपसंहरतिवेदेष्विति वेदेषुअध्ययनादिभिर्यज्ञेषुअनुष्ठानादिभिःतपस्सुकायशोषणादिभिःदानेषुसत्पात्रार्पणादिभिःयत्पुण्यफलंचोपदिष्टंशास्त्रेषुतत्सर्वमत्येति ततोपिश्रेष्ठंयोगैश्वर्यंप्राप्नोति किंकृत्वाइदमष्टप्रश्नार्थनिर्णयेनोक्तंतत्त्वंविदित्वायोगीज्ञानीभूत्वातच्चपरममुत्कृष्टंयोगैश्वर्यंप्राप्नोति किंचआद्यंजगन्मूलभूतंस्थानंविष्णोःपरंपदंप्राप्नोति २८ अष्टमेष्टविशिष्टेष्टसंदृष्टार्थोष्टनिर्णयैः अक्लिष्टमिष्टधामाप्तिस्पष्टताष्टमवर्त्मना १

भवत्यनेनेतिप्रभवः स्रष्टाप्रलीयतेनेनेतिप्रलयः संहर्त्ताः तिष्ठत्यस्मिन्निति स्थानमाधारः निधीयते अस्मिन्निति निधानं लयस्थानं बीजं कारणं
तथापि अव्ययं अविनाशि नतु व्रीह्यादिवद्विनश्वरमित्यर्थः १८ किंच तपामीति आदित्यात्मना स्थित्वा निदाघसमयेतपामि जगतस्तापं करोमि वृष्टि
समये च वर्षणमुत्सृजामि विमुंचामि कदाचित्तु वर्षं निगृह्णामि आकर्षामि अमृतं च जीवनं मृत्युश्च नाशः सत्स्थूलं दृश्यं असत्च सूक्ष्ममदृश्यमेत
त्सर्वमेवेति मत्वा मामेव बहुधा उपासते इति पूर्वेणैवान्वयः १९ तदेवमवजानंति मां मूढा इति श्लोकद्वयेन क्षिप्रफलाशया देवतांतरं भजंतो मां
नाद्रियंते इत्यभक्ता दर्शिता महात्मानस्तु मां पार्थेत्यादिना च भक्ता उक्ताः तत्रैकत्वेन वा पृथक्त्वेन वा परमेश्वरं ये न भजंति तेषां जन्म मृत्यु प्रवाहो॥

प्रभवः प्रलयः स्थानं निधानं बीजमव्ययं १८ तपाम्यहमहं वर्षं निगृह्णाम्युत्सृजामि च अमृतं चैव मृत्युश्च सदसच्चाहम
र्जुन १९ त्रैविद्या मां सोमपाः पूतपापा यज्ञैरिष्ट्वा स्वर्गतिं प्रार्थयंते ते पुण्यमासाद्य सुरेंद्रलोकमश्नंति दिव्यान्दिवि दे
वभोगान् २० ते तं भुक्त्वा स्वर्गलोकं विशालं क्षीणे पुण्ये मर्त्यलोकं विशंति एवं त्रयीधर्ममनुप्रपन्ना गतागतं कामकामा
लभंते २१॥ दुर्वार इत्याह द्वाभ्यां त्रैविद्या इति ऋग्यजुःसामलक्षणास्तिस्रो विद्या येषां ते त्रिविद्यास्त्रिविद्या एव त्रैविद्याः स्वार्थे तद्धितः तिस्रो
विद्या अधीयते जानंतीति वा त्रैविद्या वेदत्रयोक्तकर्मपरा इत्यर्थः वेदत्रयविहितैर्यज्ञैर्मामिष्ट्वा ममैव रूपं देवतांतरमित्यजानंतोपि वस्तुतः इंद्रादि
रूपेण मामेवेष्ट्वा संपूज्य यज्ञशेषं सोमं पिबंतीति सोमपास्तेनैव पूतपापाः शोधितकल्मषाः संतः स्वर्गतिं स्वर्गप्रतिगतिं ये प्रार्थयंते ते पुण्यफलं
रूपं सुरेंद्रस्य लोकं स्वर्गमासाद्य प्राप्य दिवि स्वर्गे दिव्यानुत्तमान् देवानां भोगानश्नंति भुंजते २० ततश्च ते तं भुक्त्वेति ते स्वर्गकामास्तं प्रार्थितं
विपुलं स्वर्गलोकं तत्सुखं भुक्त्वा भोगप्रापके पुण्ये क्षीणे सति मर्त्यलोकं प्रविशंति पुनरप्येवमेव वेदत्रय्या विहितं धर्ममनुसृताः कामकामा भोगान्का

मद्भक्तास्तुमत्प्रसादेनकृतार्थाभवंतीत्याह अनन्याइति अनन्यानास्तिमद्व्यतिरेकेणान्यत्काम्यंयेषांतेतथाभूतायेजनाःमांचिंतयंतः सेवंते
तेषांनित्याभियुक्तानांसर्वदामदेकनिष्ठानांयोगंधनादिलाभंक्षेमंचतत्पालनंमोक्षाख्यंचतैरप्रार्थितमप्यहमेववहामिप्रापयामि २२ ननु
चत्वद्व्यतिरेकेणवस्तुनोदेवतांतरस्याभावादिंद्रादिसेविनोपित्वद्भक्ताएवेतिकथंतेगतागतंलभेरन् तत्राह येपीति श्रद्धयोपेताभक्ताः संतोपि
येजनायज्ञेनान्य देवताइंद्रादिरूपायजंतेतेपिमामेवयजंतीतिसत्यंकिंतु अविधिपूर्वकंमोक्षप्रापकंविधिंविनायजंतिअतस्तेपुनरावर्तंते २३
एतदेवविवृणोति अहंहीति सर्वेषांयज्ञानांतत्रदेवतारूपेणाहमेवभोक्ताप्रभुश्चस्वामीफलदाताचाहमेवेत्यर्थः एवंभूतंमांतेतत्त्वेनयथावत्

अनन्याश्चिंतयंतोमांयेजनाःपर्युपासते तेषांनित्याभियुक्तानांयोगक्षेमंवहाम्यहं २२ येप्यन्यदेवताभक्तायजंतेश्रद्धया
न्विताः तेपिमामेवकौंतेययजंत्यविधिपूर्वकं २३ अहंहिसर्वयज्ञानांभोक्ताचप्रभुरेवच नतुमामभिजानंतितत्त्वेना-
तश्च्यवंतिते २४ यांतिदेवव्रतादेवान्पितॄन्यांतिपितृव्रताः भूतानियांतिभूतेज्यायांतिमद्याजिनोपिमां २५ पत्रंपु-
ष्पंफलंतोयंयोमेभक्त्याप्रयच्छति॥

नाभिजानंति अतश्च्यवंतिप्रच्यवंतेपुनरावर्तंते २४ येतुसर्वदेवतासुमामेवांतर्यामिणं-
पश्यंतोयजंतेतुनावर्तंते इत्येतदेवोपपादयतियांतीति देवेष्विंद्रादिषुव्रतंनियमोयेषांतेअतवंतोदेवान्यांतीति पितृषुव्रतंयेषांश्राद्धादि
क्रियापराणांतेपितॄन् यांतिभूतेषुविनायकमातृकादिषुइज्यांपूजायेषांतेभूतानियांति मांयष्टुंशीलंयेषांतेमद्याजिनः तेतुमामव्ययं-
परमानंदरूपंनारायणंयांति २५ तदेवंस्वभक्तानामक्षयफलत्वमुक्तं अनायासत्वंस्वभक्तेर्दर्शयति पत्रमितिपत्रपुष्पादिमात्रमपिमे
स्वभक्त्याप्रीत्यायःप्रयच्छतितस्यप्रयतात्मनः शुद्धचित्तस्यनिष्कामभक्तस्यतत् पत्रपुष्पादिकंतेनभक्त्याउपहृतंसमर्पितं॥ ६९६ ॥

महमश्नामिप्रीत्यागृह्णामि नहिमहाविभूतिपतेः परमेश्वरस्यममक्षुद्रदेवतानामिववहुवित्तसाध्ययागादिभिः परितोषः स्यात् किंतुभक्तिमा
त्रेणाऽत्र तोभक्तेनसमर्पितंयत्किंचित्पत्रादिमात्रमपितदनुग्रहार्थमेवाश्नामीतिभावः २६ नचपत्रपुष्पादिकमपियज्ञार्थपशुसोमादिद्रव्यव
ब्यदर्थमेवोद्यमेनापद्यसमर्थणीयंकिंतर्हियदिति स्वभावतोवाशास्त्रतोवायत्किंचित्कर्मकरोषितथायदश्नासियज्जुहोषियद्ददासियत्तपा
स्यसितपः करोषितत्सर्वमपि अर्पितंयथाभवत्येवंकुरुष्व २७ एवंयत्फलंप्राप्स्यसितच्छृणुशुभेति एवंकुर्वन् कर्मबंधनैः कर्मनिमित्तैरिष्टानि
ष्टैःफलैर्मुक्तोभविष्यसिकर्मणामकिंसमर्पितत्वेनतत्फलसंबंधानुपपत्तेः तैश्चमुक्तःसन् संन्यासयोगयुक्तात्मासंन्यासः कर्मणांमदर्पणंसएव

तदहंभक्त्युपहृतमश्नामिप्रयतात्मनः २६ यत्करोषियदश्नासियज्जुहोषिददासियत् यत्तपस्यसिकौंतेयतत्कुरुष्व
मदर्पणं २७ शुभाशुभफलैरेवंमोक्ष्यसेकर्मबंधनैः संन्यासयोगयुक्तात्माविमुक्तोमामुपैष्यसि २८ समो
हंसर्वभूतेषुनमेद्वेष्योस्तिनप्रियः येभजंतितुमांभक्त्यामयितेषुचाप्यहम् २९ अपिचेत्सुदुराचारोभजतो
मामनन्यभाक् ॥ १९, योगस्तेनयुक्तआत्माचित्तंयस्यसतथाभूतस्त्वंमांप्राप्स्यसि २८ यदिभक्तेभ्यएवमोक्षंददासिनाभक्तेभ्यस्तर्हित
वापिरागद्वेषादिकृतंवैषम्यमस्तीतिचेत् नेत्याहसमइति समोहंसर्वेष्वपिभूतेषुअतोममप्रियश्चद्वेष्यश्चनास्त्येव एवंसत्यपियेमां
भजंतितेभक्तामयिवर्तंते अहमपितेषुअनुग्राहकतयावर्ते अयंभावः यथाग्नेःस्वसेवकेष्वेवतमःशीतादिदुःखमपाकुर्वतोपिनवै
षम्यं यथाचकल्पवृक्षस्यतथैवभक्तपक्षपातिनोपिममनास्त्येववैषम्यंकिंतुमद्भक्तेरेवायंमहिमेति २९ अपिचमद्भक्तेरवितर्क्यः
प्रभावइतिदर्शयन्नाह अपिचेदिति अत्यंतदुराचारोपिनरोयदिपृथक्त्वेनदेवतांतरभक्तिमकुर्वन् मामेवश्री॥ ७ ७ ७॥ राम ४८

केतर्हि त्वामाराधयंतीत्याह महात्मान इति केमहात्मानः कामाद्यनभिभूतचित्ताः यतः अभयं चित्तसंशुद्धिरित्यादिना वक्ष्यमाणां दैवीं प्रकृति
माश्रिताः अतएव मद्व्यतिरिक्ते नास्ति अन्यस्मिन् मनो येषां ते भूतादिं जगत्कारणमव्ययं नित्यं च ज्ञात्वा मां भजंति १३ तेषां भजनप्रकारानाह द्वाभ्यां
सततमिति सर्वदा स्तोत्रमंत्रादिभिः कीर्तयंतः केचिन्मामुपासते सेवंते दृढानि व्रतानि नियमा नियेषां ते तादृशाः संतो यतंतश्चेंद्रियोपसंहारादिषु प्रय
त्नं कुर्वंतश्च केचिद्भक्त्या नमस्यंतः प्रणमंतश्च अन्ये नित्ययुक्ता अवहिताः सेवंते भक्त्येति नित्ययुक्ता इति कीर्तनादिष्वपि द्रष्टव्यं १४ किंच ज्ञानेति वा
सुदेवः सर्वमित्येवं सर्वात्मत्वदर्शनं ज्ञानं तदेव यज्ञस्तेन यज्ञेन मां यजंतः पूजयंतः अन्येपि उपासते तत्रापि केचिदेकत्वेन अभेदभावनया केचि

महात्मानस्तु मां पार्थ दैवीं प्रकृतिमाश्रिताः भजंत्यनन्यमनसो ज्ञात्वा भूतादिमव्ययं १३ सततं कीर्तयंतो मां यतंतश्च दृढ
व्रताः नमस्यंतश्च मां भक्त्या नित्ययुक्ता उपासते १४ ज्ञानयज्ञेन चाप्यन्ये यजंतो मामुपासते एकत्वेन पृथक्त्वेन बहुधा वि
श्वतोमुखम् १५ अहं क्रतुरहं यज्ञः स्वधाहमहमौषधं मंत्रोहमहमेवाज्यमहमग्निरहं हुतं १६ पितामहस्य जगतो माता धा
ता पितामहः वेद्यं पवित्रमोंकार ऋक्साम यजुरेव च १७ गतिर्भर्ता प्रभुः साक्षी निवासः शरणं सुहृत्॥ त्पृथक्त्वेन दासोहमिति के।

चित्तु विश्वतोमुखं सर्वात्मकं मां बहुधा ब्रह्मरुद्रादिरूपेणोपासते १५ सर्वात्मतां प्रपंचयति अहमिति चतुर्भिः क्रतुः श्रौतोग्निष्टोमादिः यज्ञस्तु स्मा
र्तः पंचयज्ञादिः औषधमौषधिप्रभवमन्नं भेषजं वा मंत्रो याज्यपुरोहितानामनुवाक्यादिः आज्यं होमादिसाधनं अग्निराहवनीयादिः हुतं
होमः एतत्सर्वमहमेव १६ किंच पितेति धाता कर्मफलविधाता वेद्यं ज्ञेयं पवित्रं शोधकं ऋग्वेदादयो वेदाश्चाहमेव स्पष्टमन्यत् १७ किंच।
गतिरिति गम्यत इति गतिः फलं भर्ता पोषणकर्ता प्रभुर्नियंता साक्षी शुभाशुभद्रष्टा निवासः भोगस्थानं शरणं रक्षकः सुहृत् हितकर्ता प्रकर्षेण॥

गी० भजनप्रकारंदर्शयन्नुपसंहरति मन्मनाइति मय्येवमनोयस्यसमन्मनास्त्वंभव तथामद्भक्तः मत्सेवकोभवमद्याजीमद्यजनशीलोभवमामे
टी०श्री० वनमस्कुरु एवमेभिः प्रकारैर्मत्परायणः सन् आत्मानंमनोमयियुक्त्वासमाधाय मामेवपरमानंदरूपमेष्यसि ३४ निजमैश्वर्यमाश्चर्यंभ
४९ क्तेश्चाद्भुतवैभवंनवमेराजगुह्याख्येकृपयावोचदच्युतः १ इतिश्रीसुबोधिन्यांटीकायांनवमोऽध्यायः ९ उक्ताः संक्षेपतः पुनः पूर्वसप्तमादौ
विभूतयः दशमेताविततन्यंतेसर्वत्रेश्वरदृष्टये १ एवंतावत्सप्तमादि भिस्त्रिभिरध्यायैर्जीवनीयपरमेश्वररूपंनिरूपितं तद्विभूतयश्चसप्तमेर
सोहमप्सुकौंतेयेत्यादिनासंक्षेपतो दर्शिताः नवमेच अहंक्रतुरहंयज्ञइत्यादिना अथेदानींताएवविभूतीः प्रपंचयिष्यन् स्वभक्तेश्चावश्यंक

मन्मनाभवमद्भक्तोमद्याजीमांनमस्कुरु मामेवैष्यसियुक्त्वैवमात्मानंमत्परायणः ३४ इतिश्रीभगवद्गीतासूपनि
षत्सुब्रह्मविद्यायांयोगशास्त्रेश्रीकृष्णार्जुनसंवादेराजविद्या —— राजगुह्ययोगोनामनवमोऽध्यायः ९ ॥९
श्रीभगवानुवाच भूयएवमहाबाहोशृणुमेपरमंवचः यत्तेहं प्रीयमाणायवक्ष्यामिहितकाम्यया १ नमेविदुः
सुरगणाः प्रभवंनमहर्षयः अहमादिर्हिदेवानांमहर्षीणांचसर्वशः २ ॥ ((रणीयत्वंवर्णयिष्यन् श्रीभगवानुवाच भूयएवेतिम

हातोयुद्धादिस्वधर्मानुष्ठानेमहत्परिचर्यायांचकुशलोबाहूयस्यहेमहाबाहो भूयएवपुनरपिमेवचः शृणु कथंभूतंपरंमंपरमार्थनि
ष्ठमद्वचसाऽमृतेनेवप्रीतिंप्राप्नुवतेतेतुभ्यंहितकाम्ययाहितेच्छयायदहंवक्ष्यामितत् १ उक्तस्यापिपुनर्वचनेदुर्विज्ञेयत्वंहेतुमाहनमेइ रामः
ति ममप्रकृष्टंभवंजन्मरहितस्यापिनानाविभूतिभिराविर्भावंसुरगणाअपिमहर्षयोभृग्वादयोपिनजानंतितत्रहेतुः अहंहिदेवा ४९
नांमहर्षीणांचादि कारणंसर्वशः सर्वैः प्रकारैरुत्पादकत्वेनबुद्ध्यादिप्रवर्तकत्वेनच अतोमत्तनुग्रहंविनामांकेपिनजानंतीत्यर्थः २ ॥९

एवंभूतात्मज्ञाने फलमाह यइति सर्वकारणत्वादेव न विद्यते आदिः कारणं यस्य तमनादिमतएवाजंजन्मशून्यं लोकानां महेश्वरंचमांयो
वेत्ति समनुष्येषु असंमूढः संमोहरहितः सन् सर्वैः पापैः प्रमुच्यते ३ लोकमहेश्वरतामेव स्फुटयति बुद्धिरिति त्रिभिः बुद्धिः सारासारवि
वेक नैपुण्यंज्ञानमात्मविषयं असंमोहो व्याकुलत्वाभावः क्षमासहिष्णुत्वं सत्यं यथार्थभाषणं दमो वाह्येंद्रियसंयमः शमोंतःकरणसंयमः सुखं
मनुकूलसंवेदनीयं दुःखं तद्विपरीतं भव उद्भवः अभावस्तद्विपरीतः भयंत्रासः अभयं तद्विपरीतं अस्य श्लोकस्योत्तरेणमत्त एव भवंतीत्यनेनैवा
न्वयः ४ किंच अहिंसेति अहिंसा परपीडानिवृत्तिः समता रागद्वेषराहित्यं तुष्टिर्दैवलब्धेन संतोषः तपः शारीरादिव ऌप्यमाणां दानं न्यायार्-

योमामजमनादिंच वेत्ति लोकमहेश्वरं असंमूढः समर्त्येषु सर्वपापैः प्रमुच्यते ३ बुद्धिर्ज्ञानमसंमोहः क्ष
मासत्यंदमः शमः सुखंदुःखंभवोभावोभयंचाभयमेवच ४ अहिंसासमतातुष्टिस्तपोदानंयशोयशः भवंतिभावाभू
तानांमत्तएवपृथग्विधाः ५ महर्षयः सप्तपूर्वेचत्वारोमनवस्तथा मद्भावामानसाजातायेषांलोकइमाःप्रजाः ६ ॥

जितस्य धनादेः पात्रे समर्पणं यशः सत्कीर्तिः अयशो दुष्कीर्तिः एते बुद्धिर्ज्ञानमित्यादयः तद्विपरीताश्च अबुद्धिरज्ञानमित्यादयो नावि
धाभावाः प्राणिनां मत्तः सकाशादेव भवंति ५ किंच महर्षय इति सप्त महर्षयः भृग्वादयः सप्तब्राह्मणाः इत्येते पुराणे निश्चयं गताः इत्यादि पु
राणप्रसिद्धाः तेभ्योपि पूर्वेन्येवचत्वारो महर्षयः सनकादयः तथा मनवः स्वायंभुवादयः मद्भावो मद्भावः प्रभावो येषु ते मद्भावाः हिरण्यगर्भा
त्मनो ममैव मनसः संकल्पमात्राज्जाताः प्रभावमेवाह येषां भृग्वादीनां सनकादीनां च मनूनां च इमा ब्राह्मणाद्या लोके वर्त्तमाना यथा
यथं पुत्रपौत्रादिरूपाः शिष्यप्रशिष्यादिरूपाश्च प्रजाः प्रवर्त्तंते ६ ॥

यथोक्तविभूत्यादितत्त्वज्ञानस्य फलमाह एतामिति एतां भृग्वादिलक्षणां मम विभूतिं योगं चैश्वर्यलक्षणं तत्त्वतो यो वेत्ति स निःसंशयेन योगेन सम्यक्दर्शनेन युक्तो भवति नात्र संशयः ७ यथा विभूतियोगयोर्ज्ञानेन सम्यग्ज्ञानावाप्तिस्तद्दर्शयति अहमिति चतुर्भिः अहं सर्वस्य जगतः प्रभवः भृग्वादिमन्वादिरूपविभूतिद्वारेणोत्पत्तिहेतुः मत्त एव चास्य सर्वस्य बुद्धिर्ज्ञानमसंमोह इत्यादि सर्वं प्रवर्तत इत्येवं मत्वाऽवबुध्य बुधा विवेकिनो भावसमन्विताः प्रीतियुक्ता मां भजंते ८ प्रीतिपूर्वकं भजनमेवाह मच्चित्ता इति मय्येव चित्तं येषां ते मच्चित्ताः मां एव गताः प्राप्ताः

एतां विभूतिं योगं च मम यो वेत्ति तत्त्वतः सोऽविकंपेन योगेन युज्यते नात्र संशयः ७ अहं सर्वस्य प्रभवो मत्तः सर्वं प्रवर्तते इति मत्वा भजंते मां बुधा भावसमन्विताः ८ मच्चित्ता मद्गतप्राणा बोधयंतः परस्परं कथयंतश्च मां नित्यं तुष्यंति च रमंति च ९ तेषां सततयुक्तानां भजतां प्रीतिपूर्वकं ददामि बुद्धियोगं तं येन मामुपयांति ते १० तेषामेवानुकंपार्थमहमज्ञानजं तमः नाशयाम्यात्मभावस्थो ज्ञानदीपेन भास्वता ११॥ मद्गतप्राणाः इंद्रियाणि येषां ते मद्गतप्राणाः मदर्पितजीवना इति वा एवंभूतास्ते बुधाः अन्योन्यं मां न्याययोपेतैः श्रुत्यादिप्रमाणैः बोधयंतः बुद्ध्या च मां कथयंतः संकीर्तयंतः तुष्यंति अनुमोदनेन तुष्टिं यांति विरमंति निवृत्तिं यांति च ९ एवंभूतानां च सम्यक्ज्ञानमहं ददामीत्याह तेषामिति एवं सततयुक्तानां मय्यासक्तचित्तानां प्रीतिपूर्वकं भजतां तेषां बुद्धिरूपं योगमुपायं ददामि तेषां तमिति कं येन ते भक्ता मां प्राप्नुवंति १० बुद्धियोगं दत्वा च तस्मात् भावपर्यंतं तामापाद्याविद्याकृतं संसारं नाशयामीत्याह तेषामिति तेषामनुकंपार्थमनुग्रहार्थमेवाज्ञानाज्जातं तमः संसाराख्यं नाशयामि कुत्र स्थितः सन् केन वा साधनेन तमो नाशयसीत्यत आह आत्मभावस्थः बुद्धिवृत्तौ स्थितः सन् भास्वता विस्फुरता ज्ञानलक्षणेन दीपेन नाशयामि ११॥

नारायणं भजते तर्हि साधुः श्रेष्ठ एव स मंतव्यः यतोसौ सम्यक् व्यवसितः शोभनमध्यवसायं कृतवान् ३० ननु कथं समीचीनाध्यव
सायमात्रेण साधुर्मंतव्यः तत्राह क्षिप्रमिति दुराचारोपि मां भजन् शीघ्रं धर्मचित्तो भवति ततश्च शश्वत् शांतिं परमेश्वरनिष्ठां शाश्वतीमुप
शांतिं निरंतरं गच्छति प्राप्नोति कुतर्ककर्कशवादिनो नैतन्मन्येरन्निति शंकाव्याकुलमर्जुनं प्रोत्साहयति हे कौंतेय पटहकोलाहलादिमहाघो
षपूर्वकं विवदमानानां सभां गत्वा बाहुमुत्क्षिप्य निःशंकं प्रतिजानीहि प्रतिज्ञां कुरु कथमीश्वरस्य भक्तो दुराचारोपि न प्रणश्यति अपि तु कृता
र्थ एव भवतीति ततश्च ते त्वत्प्रौढिविजृंभिविध्वंसितकुतर्का निःसंशयं त्वामेव गुरुत्वेनाश्रयेरन् ३१ आचारभ्रष्टं मद्भक्तिः पवित्री करोती

साधुरेव स मंतव्यः सम्यग्व्यवसितो हि सः ३० क्षिप्रं भवति धर्मात्मा शश्वच्छांतिं निगच्छति कौंतेय प्रतिजानीहि न
मे भक्तः प्रणश्यति ३१ मां हि पार्थ व्यपाश्रित्य येपि स्युः पापयोनयः स्त्रियो वैश्यास्तथा शूद्रास्तेपि यांति परां गतिं ३२
किं पुनर्ब्राह्मणाः पुण्या भक्ता राजर्षयस्तथा अनित्यमसुखं लोकमिमं प्राप्य भजस्व मां ३३ ॥ ९ ॥ ९ ॥ ९ ॥

ति किमत्र चित्रं यतो मद्भक्तिर्दुष्कुलानपि अनधिकारिणोपि संसारान्मोचयतीत्याह मां हीति येपि पापयोनयस्ते निकृष्टजन्मानः ।
अंत्यजादयो भवेयुः येपि वैश्याः केवलं कृष्यादिनिरताः स्त्रियः शूद्रादयश्चाध्ययनादिरहितास्तेपि मां व्यपाश्रित्य संसेव्य परां गतिं
यांति निश्चितं ३२ यद्येवं तदा सत्कुलाः सदाचाराश्च मद्भक्ताः परां गतिं यांतीति किं वक्तव्यमित्याह किमिति पुण्याः सुकृतिनो ब्राह्म
णास्तथा राजानश्च ऋषयश्च क्षत्रिया एवंभूताः परां गतिं यांतीति किं वक्तव्यं अतस्त्वमिमं राजर्षिरूपं लोकं देहं प्राप्य लब्ध्वा मां भज।
स्व किंच अनित्यमध्रुवं सुखरहितं लोकं देहं प्राप्यानित्यत्वाद्विलंबमकुर्वन् असुखत्वाच्च सुखार्थोद्यमं हित्वा मामेव भजस्वेत्यर्थः ३३॥९

कथनप्रयोजनं दर्शयन् प्रार्थयन् आह कथमितिद्वाभ्यां हे योगिन् कथं केन विभूतिभेदेन त्वां परिचिंतयन् त्वामहं विद्यां जानीयां विभूतिभेदे न चिंत्योपि त्वं केषु केषु पदार्थेषु मया चिंतनीयोसि १७ तदेव वहिर्मुखेपि चित्ते तत्र तत्र विभूतिभेदेन त्वच्चिंतैव यथा भवेत् तथा विस्तरेण कथयेत्याह विस्तरेणेति आत्मनस्तव योगं सर्वज्ञत्वं सर्वशक्तिमत्वादि लक्षणं योगमैश्वर्यं विभूतिं च विस्तरेण पुनः कथय हि यस्मात् त्वद्वाक्यममृतरूपं शृण्वतो मम तृप्तिरलं बुद्धिर्नास्ति १८ एवं प्रार्थितः सन् श्रीभगवानुवाच हंतेति हंत ते त्वनुकंपायां संबोधने दिव्या मम या विभूतयः ताः प्राधान्येन तु भ्यं कथयिष्यामि यतो मे वांतर विभूति विस्तरस्य मदीयस्यांतो नास्तीति अतः प्रधानभूताः कतिचिद्वर्णयिष्यामि १९ तत्र प्रथममैश्वररूपं कथ

कथं विद्यामहं योगिंस्त्वां सदा परिचिंतयन् केषु केषु च भावेषु चिंत्योसि भगवन्मया १७ विस्तरेणात्मनो योगं विभूतिं च जनार्दन भूयः कथय तृप्तिर्हि शृण्वतो नास्ति मे मृतं १८ श्रीभगवानुवाच हंत ते कथयिष्यामि दिव्या ह्यात्मविभूतयः प्राधान्यतः कुरुश्रेष्ठ नास्त्यंतो विस्तरस्य मे १९ अहमात्मा गुडाकेश सर्वभूताशयस्थितः अहमादिश्च मध्यं च भूतानामंत एव च २० आदित्यानामहं विष्णुर्ज्योतिषां रविरंशुमान्॥

यति अहमिति हे गुडाकेश सर्वेषां भूतानामाशयेषु अतः करणेषु सर्वज्ञत्वादि गुणैर्नियंतृत्वेनावस्थितः परमात्माहं आदिर्जन्म मध्यं स्थितिः अंतः संहारः सर्वभूतानां जन्मादिहेतुश्चाहमित्यर्थः २० अथेदानीं विभूतीः कथयति आदित्यानामित्यादिना यावदध्याय समाप्तिः आदित्यानामिति आदित्यानां द्वादशानां मध्ये विष्णुर्वामनोहं ज्योतिषां प्रकाशानां मध्ये अंशुमान् विश्वव्यापि रश्मियुक्तो रविः सूर्योहं मरुतां वायूनां मध्ये मरीचिर्नामाहमस्मि यद्वा सप्त मरुद्गणा देवविशेषास्तेषां मध्ये दितिनक्षत्राणां मध्ये चंद्रोहं अत्र चादित्यानामहं विष्णुरित्यादिषु प्रायशो निर्धारणे षष्ठी क्वचिच्च भूतानामस्मि चेतनेत्यादिषु सं

विष्णुरित्यादिष्ववतारेष्वपि प्रभवातिशयमात्रविवक्षया विभूतित्वेन निर्दिश्यते अतः परं चाध्यायसमाप्ति स्पष्टार्थत्वेपि क्वचित्क्वचिद्व्याख्यास्यामः
२१ वेदानामिति वासव इंद्रो भूतानां संबंधिनी चेतना ज्ञानशक्तिरहमस्मि २२ रुद्राणामिति यक्षराक्षसानामति क्रूरत्वादिसामान्याद्यक्षैः सहै
कीकृत्य निर्देशः तेषां मध्ये वित्तेशः कुबेरोस्मि पावकोग्निः शिखरिणां शिखरवतामुच्छ्रितानां मेरुः २३ पुरोधसामिति पुरोधसां मध्ये देवपुरोहि
तत्वात् मुख्यं बृहस्पतिं मां विद्धि सेनानीनां मध्ये देवसेनापतिः स्कंदोहमस्मि सरसां स्थिरजलाशयानां मध्ये समुद्रोस्मि २४ महर्षीणामिति गिरां

मरीचिर्मरुतामस्मि नक्षत्राणामहं शशी २१ वेदानां सामवेदोस्मि देवानामस्मि वासवः इंद्रियाणां मनश्चास्मि भूतानामस्मि
चेतना २२ रुद्राणां शंकरश्चास्मि वित्तेशो यक्षरक्षसां वसूनां पावकश्चास्मि मेरुः शिखरिणामहं २३ पुरोधसां च मुख्यं मां वि
द्धि पार्थ बृहस्पतिं सेनानीनामहं स्कंदः सरसामस्मि सागरः २४ महर्षीणां भृगुरहं गिरामस्म्येकमक्षरं यज्ञानां जपय
ज्ञोस्मि स्थावराणां हिमालयः २५ अश्वत्थः सर्ववृक्षाणां देवर्षीणां च नारदः गंधर्वाणां चित्ररथः सिद्धानां कपिलो मुनिः २६
उच्चैःश्रवसमश्वानां विद्धि माममृतोद्भवं ऐरावतं गजेंद्राणां नराणां च नराधिपं २७ आयुधानामहं वज्रं धेनूनामस्मि कामधुक्
प्रजनश्चास्मि कंदर्पः सर्पाणामस्मि वासुकिः २८॥ वाचां यदात्मिका नां मध्ये एकमक्षरमोंकाराख्यं पदमस्मि २५ अश्वत्थ इति देवा ए

व संतो मंत्रदर्शनेन ये ऋषित्वं प्राप्तास्तेषां मध्ये नारदोस्मि सिद्धानामुत्पत्तित एवाधिगतपरमार्थानां कपिलाख्यो मुनिरस्मि २६ उच्चैःश्रवसमि
ति अमृतार्थं क्षीराब्धिमंथने उद्भूतं उच्चैःश्रवसं नामानमश्वं मद्विभूतिं विद्धि अमृतोद्भवमित्येतदैरावतेपि संबध्यते नराधिपं राजानं मां विद्धि
२७ आयुधानामिति कामान् दोग्धीति कामधुक् प्रजनः प्रजोत्पत्तिहेतुः कंदर्पः कामोस्मि न केवलसंभोगप्रधानः कामो मद्विभूतिः अशास्त्रीय

अनंतइति नागानांनिर्विषाणांराजा अनंतः शेषोस्मि यादसांजलचराणांराजावरुणोहमस्मि पितॄणांराजाअर्यमास्मि संयमतांनियमंकुर्वतां
नामध्येयमोहमस्मि २९ प्रल्हाद इति दैत्यानांराजाप्रह्लादोस्मि कलयतांवशीकुर्वतांगणयतांवामध्येकालःअहमस्मि मृगाणांमृगेंद्रःसिंहः
अहमस्मि ३० पवनइति पवतांपावयितॄणांवेगवतांवावायुरस्मि शस्त्रभृतांवीराणांरामोदाशरथिः झषाणांमत्स्यानांमध्येमकरोहमत्स्यविशेषः
स्रोतसांप्रवाहोदकानांमध्येभागीरथीगंगाहमस्मि ३१ सर्गाणामिति सृज्यंतइतिसर्गाः आकाशादयः तेषामादिरंतश्चमध्यंचाहमस्मि अह
मादिश्चमध्यंचेत्यत्रस्रष्टादिकर्तृत्वंपारमैश्वर्ययुक्तं अत्रतुउत्पत्तिप्रलयस्थितयोमद्विभूतित्वेनध्येयाइत्युच्यतइतिविशेषः अध्यात्मविद्याआ

अनंतश्चास्मिनागानांवरुणोयादसामहं पितॄणामर्यमाचास्मियमःसंयमतामहं २९ प्रह्लादश्चास्मिदैत्यानांका।
लःकलयतामहं मृगाणांचमृगेंद्रोहंवैनतेयश्चपक्षिणां ३० पवनःपवतामस्मिरामःशस्त्रभृतामहं झषाणांमकरश्चा
स्मिस्रोतसामस्मिजान्हवी ३१ सर्गाणामादिरंतश्चमध्यंचैवाहमर्जुन अध्यात्मविद्याविद्यानांवादःप्रवदतामहं ३२ ॥९॥

त्मविद्याप्रवदतांवादिनांसंबंधिन्योवादजल्पवितंडाख्यास्तिस्रःकथाःप्रसिद्धाः तासांमध्येवादोहं यत्रद्वाभ्यामपि प्रमाणतस्तर्कयतश्चस्वपक्षः
स्थापयते परपक्षश्चछलजातिनिग्रहस्थानैर्दूष्यतेसजल्पोनामयत्रत्वेकः स्वपक्षंस्थापयति अन्यश्चछलजातिनिग्रहस्थानैस्तत्पक्षंदूषयति राम
नतुस्वपक्षंसाधयति सावितंडानामकथा यत्रजल्पवितंडेविजिगीषमाणयोर्वादिनोःशक्तिपरीक्षामात्रफलेवादस्तुवीतरागयोःशिष्या ५२
चार्ययोःअन्ययोर्वातत्त्वनिर्णयफलजःअतोसौश्रेष्ठत्वात्मद्विभूतिरित्यर्थः ३२॥

संक्षेपेणोक्ता विभूतीर्विस्तरेण जिज्ञासुर्भगवंतं स्तुवन् अर्जुन उवाच परंब्रह्मेति सप्तभिः परंब्रह्म च परं धाम च आश्रयः परमं च पवित्रं
भवानेव कुत इत्यत आह यतः शाश्वतं नित्यं पुरुषं तथा दिव्यं द्योतनात्मकं स्वप्रकाशकं च आदिश्चासौ देवश्च तं देवानामादिभूतमित्यर्थः तथा
जमजन्मानं विभुं च व्यापकं त्वामेवाहुः १२ आहुस्त्वामिति के ऋषयो भृग्वादयः सर्वे देवर्षिश्च नारदः असितश्च देवलः व्यासश्च स्वयं त्वमेव साक्षा
न्मेमह्यं ब्रवीषि १३ अतो ममेदानीं त्वदैश्वर्ये असंभावनानिवृत्तेत्याह सर्वमिति एतद्भवानेव परंब्रह्मेत्यादि सर्वमपि ऋतं सत्यं मन्ये यन्मां प्रा

अर्जुन उवाच परंब्रह्म परं धाम पवित्रं परमं भवान् पुरुषं शाश्वतं दिव्यमादिदेवमजं विभुं १२ आहुस्त्वामृषयः सर्वे देव
र्षिर्नारदस्तथा असितो देवलो व्यासः स्वयं चैव ब्रवीषि मे १३ सर्वमेतदृतं मन्ये यन्मां वदसि केशव न हि ते भगवन्व्य
क्तिं विदुर्देवा न दानवाः १४ स्वयमेवात्मनात्मानं वेत्थ त्वं पुरुषोत्तम भूतभावन भूतेश देवदेव जगत्पते १५ वक्तुमर्हस्यशेषे
ण दिव्या ह्यात्मविभूतयः याभिर्विभूतिभिर्लोकानिमांस्त्वं व्याप्य तिष्ठसि १६॥

त्ति त्वं कथयसि न मे विदुः सुरगणा इत्यादिना तदपि
सत्यमेव मन्ये इत्याह न हीति हे भगवन् तव व्यक्तिं स्वरूपं देवा न विदुः अस्मदनुग्रहार्थमियमभिव्यक्तिरिति न विदुर्न जानंति दानवाश्चास्म
न्निग्रहार्थमिति न विदुरेव १४ किं तर्हि स्वयमिति स्वयमेव त्वमेवात्मानं वेत्थ जानासि नान्यः तदप्यात्मना स्वेनैव वेत्थ न साधनांतरेण अत्याद
रेण बहुधा संबोधयति हे पुरुषोत्तम पुरुषोत्तमत्वे हेतुगर्भाणि विशेषणानि हे भूतभावन भूतोत्पादक भूतानामीश नियंतः देवानामादित्यानां
देवप्रकाशक जगत्पते विश्वपालक १५ तस्मात्तवापि व्यक्तिं त्वमेव वेत्सि न देवादयः तस्माद्वक्तुमर्हसीति या आत्मनस्तव दिव्या असंख्याता विभू

दंडइतिदमयतांदमकर्तॄणांसंबंधीदंडोस्मियेनासंयता अपिसंयताभवंतिमद्दंडोमद्विभूतिः जेतुमिच्छतांसंबंधिनीसामास्मिपायरूपानीतिर
स्मिगुह्यानांगोप्यानांगोपनहेतुर्मौनमवचनंगुह्यमस्मि नहितूष्णींस्थितस्याभिप्रायोज्ञायते ज्ञानवतांतत्त्वज्ञानिनांयज्ज्ञानंतदहं ३८ यदि
तियदपिचसर्वभूतानांबीजंप्ररोहकारणंतदहंतत्रहेतुः मयाविनायत्स्याद्भवेत् ततचरमचरंचभूतंनास्त्येवेति ३९ प्रकरणार्थमुपसंहरति नांत
इतिअनंतत्वाद्विभूतीनांअंतःसाकल्येनवक्तुंनशक्यते एषतुविभूतेर्विस्तरउद्देशतः संक्षेपतःप्रोक्तः पुनश्चसाकांक्षंप्रतिकथंचित्साकल्येनकथय

दंडोदमयतामस्मिनीतिरस्मिजिगीषतांमौनंचैवास्मिगुह्यानांज्ञानंज्ञानवतामहं ३८ यच्चापिसर्वभूतानांबीजंतदहमर्‌
जुन नतदस्तिविनायत्स्यान्मयाभूतंचराचरं ३९ नांतोस्तिममदिव्यानांविभूतीनांपरंतप एषतूद्देशतःप्रोक्तोविभूतेर्विस्तरो
मया ४० यद्यद्विभूतिमत्सत्त्वंश्रीमदूर्जितमेववा तत्तदेवावगच्छत्वंममतेजोंशसंभवं ४१ अथवाबहुनैतेनकिंज्ञातेनतवार्जु
न विष्टभ्याहमिदंकृत्स्नमेकांशेनस्थितोजगत् ४२ इतिश्रीभगवद्गीतासूपनिषत्सुब्रह्मविद्यायांयोगशास्त्रेश्रीकृष्णार्जुनसंवा
देविभूतियोगोनामदशमोऽध्यायः १०॥ एतियद्यदितिविभूतिमतऐश्वर्ययुक्तंश्रीमत्संपत्तियुक्तंऊर्जितंकेनचित्प्रभावबलादिनागुणेना
तिशयितंयद्यत्सत्त्ववस्तुमात्रंतत्तदेवममतेजसः प्रभावस्यांशेनसंभूतंजानीहि ४१ अथवाकिमनेनपरिच्छिन्नदर्शनेनसर्वत्रममदृष्टिंकुर्वित्याह
अथवेति बहुनापृथक्पृथक्ज्ञातेनकिंकार्ययस्मादिदंसर्वंजगत्एकांशेनैकदेशमात्रेणविष्टभ्यधृत्वाव्याप्यतिवास्थितोहंनमद्व्यतिरिक्तंकिंचि
दस्तिपादोस्यविश्वाभूतानीतिश्रुतेः ४२ इंद्रियद्वारतश्चित्तेबहिर्धावतिसत्यपिईशदृष्टिविधानायविभूतीर्दशमेब्रवीत् १ इतिश्रीसुबोधिन्यांटी

विभूतिवैभवं प्रोच्य कृपया परया हरिः दिदृक्षोरर्जुनस्यार्थे विश्वरूपमदर्शयत् १ पूर्वाध्यायांते विष्टभ्याहमिदं कृत्स्नमेकांशेन स्थितो जगदिति वि
श्वात्मकं परमेश्वररूपमुपक्षिप्तं तद्दिदृक्षुः पूर्वोक्तमभिनंदन् अर्जुन उवाच मदनुग्रहायेति चतुर्भिः ममानुग्रहाय शोकनिवृत्तये परमं परमार्थनिष्ठं गु
ह्यं गोप्यमप्यध्यात्ममिति संज्ञितं आत्मानात्मविवेकविषयं यत्त्वयोक्तं वचः अशोच्यानन्वशोचस्त्वमित्यादि षष्ठाध्यायपर्यंतं यदुक्तं तेनमम
ायं मोहोऽहं हंता एते हंतव्या इत्यादि लक्षणो भ्रमो विगतो विनष्टः आत्मनः कर्तृत्वाद्यभावोक्तेः १ किंच भवाप्ययाविति भूतानां भवाप्ययौ सृष्टिप्रल
यौ त्वत्तः सकाशादेव भवत इति श्रुतौ मया अहं कृत्स्नस्य जगतः प्रभवः प्रलयस्तथेत्यादौ विस्तरशः पुनः पुनः कमलस्य पत्रे इव प्रसन्ने विशाले अक्षिणी

अर्जुन उवाच मदनुग्रहाय परमं गुह्यमध्यात्मसंज्ञितं यत्त्वयोक्तं वचस्तेन मोहोऽयं विगतो मम १ भवाप्ययौ हि भूतानां श्रुतौ विस्तर
शो मया त्वत्तः कमलपत्राक्ष माहात्म्यमपि चाव्ययं २ एवमेतद्यथात्थ त्वमात्मानं परमेश्वर द्रष्टुमिच्छामि ते रूपमैश्वरं पुरुषोत्त
म ३ मन्यसे यदि तच्छक्यं मया द्रष्टुमिति प्रभो ॥ १ ॥ यस्य तव हे कमलपत्राक्ष माहात्म्यमपि चाव्ययमक्षयं श्रुतं विश्वसृष्ट्यादिकर्तृत्वेपि
सर्वनियंतृत्वेपि शुभाशुभकर्मकारयितृत्वेपि बंधमोक्षादि विचित्रफलदातृत्वेपि अविकारा वैषम्यासंगोदासीन्येत्यादिलक्षणमपरिमितं महत्त्वं च श्रुतं
अव्यक्तं व्यक्तिमापन्नं मन्यंते मया ततमिदं सर्वं न च मां तानि कर्माणि निबध्नंति समोऽहं सर्वभूतेष्वित्यादिना अतस्त्वत्परतंत्रत्वादस्मज्जीवानामहं कर्ते
त्यादिमदीयो मोहो विगत इति भावः २ किंच एवमिति भवाप्ययौ हि भूतानामित्यादि मया श्रुतं यथा चेदानीमात्मानं त्वमात्थ विष्टभ्याहमिदं कृत्स्न
मेकांशेन स्थितो जगदित्येवं कथयसि हे परमेश्वर एवमेतत् अत्रापि अविश्वासो मम नास्तीत्यर्थः तथापि हे पुरुषोत्तम तवैश्वर्यं ज्ञानैश्वर्यशक्तिब
लवीर्यतेजोभिः संपन्नं त्वद्रूपं कौतूहलादहं द्रष्टुमिच्छामि ३ न चाहं द्रष्टुमिच्छामीत्येतावतैव त्वया तद्रूपं दर्शयितव्यं किं तर्हि मन्यस इति योगिनः एव ॥

योगास्तेषामीश्वरमयार्जुनेनतद्रूपंद्रष्टुंशक्यमितिमन्यसेततस्तर्हितद्रूपवंतमात्मानंअव्ययंनित्यंममदर्शय ४ एवंप्रार्थितःसन्अत्यद्भुतंरूपंदर्शयिष्य
न्सावधानोभवेत्येवमर्जुनमभिमुखीकरोतिपश्येतिचतुर्भिःरूपस्यैकत्वेपिनानाविधत्वाद्रूपाणीतिवहुवचनंअपरिमितानिअनेकप्रकाराणिअलौ
किकानिममरूपाणिपश्यवर्णाःशुक्लकृष्णादयःआकृतयःअवयवसन्निवेशविशेषानानाअनेकवर्णाआकृतयश्चयेषांतानिनानावर्णाकृतीनिच
५ तान्येवाह पश्येति आदित्यादीन्ममदेहेपश्य मरुतएकोनपंचाशत्देवविशेषाःअदृष्टपूर्वाणित्वयावान्येनवापूर्वमदृष्टानिरूपाणिआश्चर्याणि
अत्यद्भुतानि ६ किंचइहेति तत्रतत्रपरिभ्रमनात्वयावर्षकोटिभिरपिद्रष्टुमशक्यंकृत्स्नमपिचराचरसहितंजगतइहास्मिन्ममदेहेअवयवरूपेणैक

योगेश्वरततोमेत्वंदर्शयात्मानमव्ययं ४ श्रीभगवानुवाच पश्यमेपार्थरूपाणिशतशोथसहस्रशः नानाविधानिदिव्यानि
नानावर्णाकृतीनिच ५ पश्यादित्यान्वसून्रुद्रानश्विनौमरुतस्तथा वहून्यदृष्टपूर्वाणिपश्याश्चर्याणिभारत ६ इहैकस्थंजगत्कृ
त्स्नंपश्याद्यसचराचरं ममदेहेगुडाकेशयच्चान्यद्द्रष्टुमिच्छसि ७ नतुमांशक्यसेद्रष्टुमनेनैवस्वचक्षुषा दिव्यंददामितेचक्षुःपश्यमेयो
गमैश्वरम् ८ संजयउवाच एवमुक्त्वाततोराजन्महायोगेश्वरोहरिः दर्शयामासपार्थायपरमंरूपमैश्वरं ९ त्रैवस्थितंअद्याधुनैवपश्यय

च्चान्यत्जगदाश्रयभूतंकारणस्वरूपंजगतश्चावस्थाविशेषादिकंजयपराजयादिकंयद्यपियच्चान्यद्द्रष्टुमिच्छसितत्सर्वंपश्य ७ यदुक्तमर्जुनेनम
न्यसेयदितच्छक्यमितितत्राह नत्विति अनेनैवतुस्वकीयेनचर्मचक्षुषामांद्रष्टुंनशक्यसेशक्तोनभविष्यसिअतोहंदिव्यमलौकिकंज्ञानात्मकंचक्षु
स्तुभ्यंददामिममैश्वरमसाधारणंयोगंयुक्तिंअघटितघटनासामर्थ्यंपश्य ८ एवमुक्त्वाभगवान्अर्जुनायरूपंदर्शितवानतच्चरूपंदृष्ट्वार्जुनःश्रीकृष्णं
विज्ञापितवानितीममर्थंएवमुक्त्वेत्यादिभिःषड्भिःश्लोकैर्धृतराष्ट्रंप्रतिसंजयउवाचएवमितिराजनहेधृतराष्ट्रमहांश्चासौयोगेश्वरश्चहरिःपरमैश्वरंरूपं

अक्षराणामिति अक्षराणां वर्णानां मध्ये अकारोस्मि तस्य सर्वस्य वाङ्मयत्वेन श्रेष्ठत्वात् तथाच श्रुतिः अकारो वै सर्वा वाक् सैषा स्पर्शोष्मभिर्व्य
ज्यमाना बह्वी नानारूपा भवतीति सामासिकस्य समाहसमूहस्य मध्ये द्वंद्वः रामकृष्णावित्यादिः समासोस्मि उभयपदप्रधानत्वेन श्रेष्ठत्वात् अ
क्षयः प्रवाहरूपः कालोहमेव कालः कलयतामित्यत्रायुर्गणनात्मकः संवत्सरशताद्यायुष्यरूपः काल उक्तः स च तस्मिन् आयुषि क्षीणे सति क्षीयते।
अत्र तु प्रवाहात्मकः अक्षयः काल उच्यत इति विशेषः कर्मफलविधातॄणां मध्ये विश्वतोमुखो धाता सर्वकर्मफलविधाताहमित्यर्थः ३३ मृत्युरिति सं
हारकाणां मध्ये सर्वसंहर्त्ता मृत्युरहं भविष्यतां भाविकल्याणानां प्राणिनामुद्भवः अभ्युदयोहं नारीणां स्त्रीणां मध्ये कीर्त्याद्याः सप्त देवतारूपाः स्त्रियोहं या

अक्षराणामकारोस्मि द्वंद्वः सामासिकस्य च अहमेवाक्षयः कालो धाताहं विश्वतोमुखः ३३ मृत्युः सर्वहरश्चाहमुद्भव
श्च भविष्यतां कीर्तिः श्रीर्वाक्च नारीणां स्मृतिर्मेधा स्मृतिः क्षमा ३४ बृहत्साम तथा साम्नां गायत्री छंदसामहं मासानां मार्गशी
र्षोहमृतूनां कुसुमाकरः ३५ द्यूतं छलयतामस्मि तेजस्तेजस्विनामहं जयोस्मि व्यवसायोस्मि सत्वं सत्ववतामहं ३६ वृष्णी
नां वासुदेवोस्मि पांडवानां धनंजयः मुनीनामप्यहं व्यासः कवीनामुशना कविः ३७॥

यासां समास मात्र योगेन प्राणिनः श्लाघ्या भवंति ताः।
कीर्त्याद्याः स्त्रियो मद्विभूतिः ३४ बृहत्सामेति त्वामिद्धि हवामह इत्यस्यामृचि गीयमानं बृहत्साम तेन चेंद्रः सर्वेश्वरत्वेन स्तूयत इति श्रेष्ठं छंदोविशि
ष्टानां मंत्राणां मध्ये गायत्री मंत्रोहं द्विजत्वापादकेन सोमाहरणेन च श्रेष्ठत्वात् कुसुमाकरो वसंतः ३५ द्यूतमिति छलयतामन्योन्यं वंचनपराणां सं
धि द्यूतमस्मि तेजस्विनां प्रभाववतां तेजः प्रभावोस्मि जेतॄणां जयोस्मि व्यवसानामुद्यमवतां व्यवसायोस्मि सत्ववतां सात्विकानां च सत्वमहं ३६ वृष्णी
नामिति वासुदेवोहं यस्त्वामुपदिशामि धनंजयस्त्वमेव मद्विभूतिः मुनीनां वेदार्थमननशीलानां वेदव्यासोहमस्मि कवीनां क्रांतदर्शिनां मध्ये उशना ना

किंचअनेकेति अनेकानिवाव्हादीनियस्यताद्दशंत्वांपश्यामि अनंतानिरूपाणियस्यतंत्वांसर्वतःपश्यामितवतुअंतंमध्यमादिंचनपश्यामिसर्वगतत्वात्
१६ किंचकिरीटिनमिति किरीटिनंमुकुटवंतं गदिनंगदावंतंचक्रिणंचक्रवंतंचसर्वतोदीप्तिमंतंतेजःपुंजरूपं तथादुर्निरीक्ष्यंद्रष्टुमशक्यं तत्रहेतुःदीप्तयोरन
लार्कयोर्द्युतिरिवद्युतिस्तेजोयस्यतं अतएवाप्रमेयंएवंभूतइतिनिश्चेतुमशक्यंत्वासमंततःपश्यामि १७ यस्मादेवंतवातर्क्यमैश्वर्यं तस्मात्त्वमिति त्वमे
वाक्षरंपरमंब्रह्मकथंभूतंवेदितव्यंमुमुक्षुभिर्ज्ञातव्यं त्वमेवास्यविश्वस्यपरंनिधानंनिधीयतेस्मिन्निति निधानंप्रकृष्टआश्रयःअतएवत्वमव्ययःनित्यःशाश्व

अनेकबाहूदरवक्त्रनेत्रंपश्यामित्वांसर्वतोनंतरूपं नांतंनमध्यंनपुनस्तवादिंपश्यामिविश्वेश्वरविश्वरूपं १६ किरीटिनंगदिनंचक्रिणं
च तेजोराशिंसर्वतोदीप्तिमंतं पश्यामित्वांदुर्निरीक्ष्यंसमंताद्दीप्तानलार्कद्युतिमप्रमेयम् १७ त्वमक्षरंपरमंवेदितव्यंत्वमस्यविश्वस्य
परंनिधानं त्वमव्ययःशाश्वतधर्मगोप्तासनातनस्त्वंपुरुषोमतोमे १८ अनादिमध्यांतमनंतवीर्यमनंतबाहुंशशिसूर्यनेत्रं पश्यामि
त्वांदीप्तहुताशवक्त्रंस्वतेजसाविश्वमिदंतपंतं १९ द्यावापृथिव्योरिदमंतरंहिव्याप्तंत्वयैकेनदिशश्चसर्वाःदृष्ट्वाद्भुतंरूपमुग्रंतवेदंलोकत्रयं

तस्यनित्यस्यधर्मस्यगोप्तापालकःसनातनश्चिरंतनःपुरुषोममसंमतोसि १८ किंच अनादीतिअनादिमध्यांतमुत्पत्तिस्थितिऽप्रव्यथितंमहात्मन् २०
प्रलयरहितं अनंतंवीर्यंप्रभावोयस्यतंअनंतबाहुंअनंतावीर्यवंतोबाहवोयस्यतंशशिसूर्यौनेत्रेयस्यताद्दशंत्वांपश्यामि तथादीप्तोहुताशोऽग्निर्वक्त्रेषुयस्यतं राम
स्वतेजसाइदंविश्वंतपंतंसंतापयंतंपश्यामि १९ किंचद्यावेति द्यावापृथिव्योरिदमंतरम तरिक्षंत्वयैकेनव्याप्तंदिशश्चसर्वाव्याप्ताः अद्भुतमदृष्टपूर्वंत्वदीयमि
दमुग्रंघोरंरूपंदृष्ट्वालोकत्रयंप्रव्यथितंअतिभीतं पश्यामीतिपूर्वस्यैवानुषंगः ॥ ६॥ २०॥ ६॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ५५

किंच अमी तिअमीसुरसंघाभीताःसंतःत्वांविशंतिशरणंप्रविशंति तेषांमध्येकेचिदतिभीतादूरतएवस्थिताःकृतसंपुटकरयुगलाःसंतोगृणंतिजय
जयरक्षेतिप्रार्थयंतेस्वस्त्यमन्यत् २१ किंचरुद्रेतिरुद्राश्चादित्याश्चवसवश्चयेचसाध्यानामदेवाःविश्वेदेवाअश्विनौदेवौमरुतश्चमरुद्गणाःऊष्माणंपिबंतीतिऊष्म
पाःपितरःऊष्मभागाहिपितरइत्यादिश्रुतेःस्मृतिश्चयावदुष्णंभवेदन्नंयावदश्नंतिवाग्यताःपितरस्तावदश्नंतियावन्नोक्ताहविर्गुणाइतिगंधर्वाश्चयक्षाश्चअ
सुराश्चविरोचनादयःसिद्धानांसंघाश्चतेसर्वएवहिविस्मिताःसंतःत्वांवीक्षंतइत्यन्वयः २२ किंचरूपमितिहेमहाबाहोमहत्अत्यूर्जिततवरूपंदृष्ट्वालोकाःसर्वे

अमीहित्वांसुरसंघाविशंति केचिद्भीताःप्रांजलयोगृणंति स्वस्तीत्युक्त्वामहर्षिसिद्धसंघाःस्तुवंतित्वांस्तुतिभिःपुष्कलाभिः २१ रुद्रादि
त्यावसवोयेचसाध्याविश्वेश्विनौमरुतश्चोष्मपाश्चगंधर्वयक्षासुरसिद्धसंघावीक्षंतेत्वांविस्मिताश्चैवसर्वे २२ रूपंमहत्तेबहुवक्त्रनेत्रंम
हाबाहोबहुबाहूरुपादं बहूदरंबहुदंष्ट्राकरालंदृष्ट्वालोकाःप्रव्यथितास्तथाहं २३ नभःस्पृशंदीप्तमनेकवर्णंव्यात्ताननंदीप्तविशालनेत्रं
दृष्ट्वाहित्वांप्रव्यथितांतरात्माधृतिंनविंदामिशमंचविष्णो २४ दंष्ट्राकरालानिचतेमुखानिदृष्ट्वैवकालानलसन्निभानि॥ प्रव्यथिताःतथाहंच

प्रव्यथितोस्मिकीदृशंरूपंदृष्ट्वाबहूनिवक्त्राणिनेत्राणिचयस्मिंस्तत् बहवोबाहवःपादाश्चयस्मिंस्तत्बहून्युदराणियस्मिंस्तत् बह्वीभिर्दंष्ट्राभिःकरालं
विकृतंरौद्रमित्यर्थः २३ नकेवलंभीतोहमित्येतावदेवअपितु नभःस्पृशमिति नभःस्पृशतीतिनभःस्पृक्तमंतरिक्षव्यापिनमित्यर्थःदीप्तंतेजोयुक्तंअ
नेकेवर्णायस्यतंअनेकवर्णंव्यात्तानिविवृतानि आननानियस्यतंएवंभूतंहित्वां दृष्ट्वाप्रव्यथितः अंतरात्मामनोयस्यसोहंधृतिंधैर्यंमुपशमंचनलभे २४
किंच दंष्ट्रेतिभोदेवेशतवमुखानिदृष्ट्वाभयावेशेनदिशोनजानामि शर्मचसुखंनलभे भोजगन्निवासप्रसन्नो॥ १॥ छ॥ छ॥ छ॥ छ॥

भव कीदृशानिमुखानिदंष्ट्राभिः करालानिकालानलःप्रलयाग्निः तत्सदृशानि २४ यच्चान्यद्द्रष्टुमिच्छसीति अनेनास्मिन्संग्रामेभाविजयपराजयादिकंचम
मदेहेपश्यैतियद्भगवतोक्तं तदिदानींपश्यन्नाह अमीचेतिपंचभिः अमीधृतराष्ट्रस्यपुत्राः दुर्योधनादयःसर्वेअवनिपालानांजयद्रथादीनांराज्ञांसंघैःसहैवत
ववक्त्राणिविशंतीत्युत्तरेणान्वयःतथाभीष्मश्चद्रोणश्चअसौसूतपुत्रःकर्णश्चनकेवलंतएवविशंति अपितुप्रतियोद्धारोयेअस्मदीयायोधमुख्याः शिखंडिधृ
ष्टद्युम्नादयस्तैःसह २६ वक्त्राणीति एतेसर्वेत्वरमाणाधावंतस्तवदंष्ट्राभिर्विकृतानिभयंकराणिवक्त्राणिविशंति तेषांमध्येकेचिच्चूर्णीकृतैःशिरोभिरुपल

दिशोनजानेनलभेचशर्मप्रसीददेवेशजगन्निवास २५ अमीचत्वांधृतराष्ट्रस्यपुत्राःसर्वैसहैवावनिपालसंघैःभीष्मोद्रोणःसूतपुत्रस्त
थासौसहास्मदीयैरपियोधमुख्यैः २६ वक्त्राणितेत्वरमाणाविशंतिदंष्ट्राकरालानिभयानकानि केचिद्विलग्नादशनांतरेषुसंदृश्यंतेचूर्णि
तैरुत्तमांगैः २७ यथानदीनांबहवोंबुवेगाःसमुद्रमेवाभिमुखाद्रवंति तथातवामीनरलोकवीराविशंतिवक्त्राण्यभिविज्वलंति २८ यथाप्र
दीप्तंज्वलनंपतंगाविशंतिनाशायसमृद्धवेगाः तथैवनाशायविशंतिलोकास्तवापिवक्त्राणिसमृद्धवेगाः २९ लेलिह्यसेग्रसमानःसमंता

क्षितादंतसंधिषुसंश्लिष्टादृश्यंते २७ प्रवेशमेवदृष्टांतेनाह यथेति नदीनामनेकमार्गप्रवृत्तानांबहवः अंबूनांवारीणांवेगाः प्रवाहाःसमुद्राभिमुखाःसंतोयथासमुद्रमेवद्रवंतिप्रविशंति तथाअमीयेनरलोकवीरास्तेअभितोविज्वलंतिसर्वतःप्रदीप्यमानानितववक्त्राणिप्रविशंति २८
अवशत्वेनप्रवेशेनदीवेगदृष्टांतउक्तः बुद्धिपूर्वकप्रवेशेदृष्टांतमाह यथेतिप्रदीप्तंज्वलनमग्निंपतंगाःशलभाःबुद्धिपूर्वकंसमृद्धोवेगोयेषांतेयथानाशायमरणा
येवविशंति तथैवलोकाएतेजनाअपितवमुखानिप्रविशंति २९ ततःकिमतआहलेलिह्यसइतिग्रसमानोगिलन्समग्रान् लोकान्सर्वानेतान्वीरान् आसमंता
त्सर्वतोलेलिह्यसे अतिशयेनभक्षयसिकैर्ज्वलद्भिर्वदनैःकिंच हेविष्णोतवभासोदीप्तयस्तेजोभिर्विस्फुरणैः॥ ६॥ ६॥ ६॥ ६॥ ६॥ ६॥

कथंभूतंतदितआह अनेकेति अनेकानिवक्त्राणिनयनानिचयस्मिन्तत् अनेकानामद्भुतानांदर्शनंयस्मिंस्तत् अनेकानिदिव्यानिआभरणानियस्मिंस्तत् दिव्यानिअनेकानिउद्यतानिआयुधानिचयस्मिंस्तत् १० किंचदिव्येतिदिव्यानिमाल्यानिअंवराणिधारयतीतितत्तथा दिव्योगंधोयस्यतादृशमनुलेपनंयस्यतत् सर्वाश्चर्यमयं अनेकाश्चर्यप्रायंदेवंद्योतनात्मकंअनंतमपरिछिन्नंविश्वतःसर्वतोमुखानियस्मिंस्तत् ११ विश्वरूपदीप्तीर्निरूपयितुमाह दिवीति दिविआकाशेसूर्यसहस्रस्ययुगपदुत्थितस्ययदियुगपदुत्थिताभाःप्रभाभवेत्तर्हिसातदामहात्मनोविश्वरूपस्यभासःप्रभायाःकथंचित् सदृशीस्यात्तन्नान्योपमास्तीत्यर्थःतथाभूतंरूपंदर्शयामासेतिपूर्वेणैवान्वयः१२ ततःकिंवृत्तमित्यपेक्षायामाहसंजयःतत्रेति अनेकधाप्रविभक्तंनानाविभागेनावस्थितंकृत्स्नंजगत्

अनेकवक्त्रनयनमनेकाद्भुतदर्शनं अनेकदिव्याभरणंदिव्यानेकोद्यतायुधं १० दिव्यमाल्यांवरधरंदिव्यगंधानुलेपनं सर्वाश्चर्यमयंदेवमनंतंविश्वतोमुखं ११ दिविसूर्यसहस्रस्यभवेद्युगपदुत्थिता यदिभाःसदृशीसास्याद्भासस्तस्यमहात्मनः१२ तत्रैकस्थंजगत्कृत्स्नंप्रविभक्तमनेकधा अपश्यद्देवदेवस्यशरीरेपांडवस्तदा १३ ततःसविस्मयाविष्टोहृष्टरोमाधनंजयःप्रणम्यशिरसादेवंकृतांजलिरभाषत १४ अर्जुनउवाच पश्यामिदेवांस्तवदेवदेहेसर्वांस्तथाभूतविशेषसंघान् ब्रह्माणमीशंकमलासनस्थमृषींश्चसर्वानुरगां

देवदेवस्यशरीरेतदवयवत्वेनैकत्रैवपृथक्पृथगवस्थितंतदापांडवोर्जुनःअपश्यत् १३ एवंदृष्ट्वाकिंकृतवानित्यतआह ततइतिततोदर्शनानंतरंविस्मयेनाविष्टोव्याप्तःसन्हृष्टानिउत्पुलकितानिरोमाणियस्यसधनंजयःदेवंतमेवशिरसाप्रणम्यकृतांजलिःसंपुटीकृतहस्तोभूत्वाअभाषतउक्तवान् १४ भाषणमेवाह पश्यामीतिसप्तदशभिःहेदेवतवदेहेदेवादीनादित्यादीन्पश्यामि तथासर्वान्भूतविशेषाणांजरायुजांडजादीनांसंघांश्चतथादिव्यान् ऋषीन्वशिष्ठादीन्उरगांश्चतक्षकादीन् तथातेषांदेवादीनामीशंस्वामिनंब्रह्माणंकथंभूतंचकमलासनस्थंपृथ्वीपद्मकर्णिकायांमेरौस्थितंयद्वात्वन्नाभिकं

त्वंजहिघातय माव्यथिष्ठाः व्यथांभयंमाकार्षीः सपत्नान् शत्रून्रणेयुद्धेनिश्चितंजेतासिजेष्यसि ३४ ततोयद्वृत्तंधृतराष्ट्रंप्रतिसंजयउवाच एतदिति।
एतत्पूर्वश्लोकत्रयात्मकंकेशवस्यवचनंश्रुत्वावेपमानःकंपमानःकिरीटी अर्जुनः कृतांजलिःसंपुटीकृतहस्तःकृष्णंनमस्कृत्यपुनरप्याहउक्तवान्
कथमाहभयहर्षाद्यावेशात् गद्गदेनकंठकंपनेनसहवर्त्ततइतिसगद्गदंयथाभवतितथाकिंचभीताद्पिभीतःसन्प्रणम्यावनतोभूत्वा ३५ स्था
नेइत्येकादशभिरर्जुनस्योक्तिःस्थानइत्यव्ययंयुक्तमित्यस्मिन्नर्थेहेहृषीकेशयद्देवंत्वमद्भुतप्रभावोभक्तवत्सलश्च अतस्तवप्रकीर्त्यामाहात्म्यसंभ

मयाहतांस्त्वंजहिमाव्यथिष्ठायुध्यस्वजेतासिरणेसपत्नान् ३४ संजयउवाच एतच्छ्रुत्वावचनंकेशवस्यकृतांजलिर्वेपमानः
किरीटी नमस्कृत्वाभूयएवाहकृष्णंसगद्गदंभीतभीतःप्रणम्य ३५ अर्जुनउवाच स्थानेहृषीकेशतवप्रकीर्त्याजगत्प्रहृष्यत्य
नुरज्यतेच रक्षांसिभीतानिदिशोद्रवंतिसर्वेनमस्यंतिचसिद्धसंघाः ३६ कस्माच्चतेननमेरन्महात्मन्गरीयसेब्रह्मणोप्यादिकर्त्रेअ
नंतदेवेशजगन्निवासत्वमक्षरंसदसत्तत्परंयत् ३७॥ १९ कीर्त्तनेननकेवलमहमेवप्रहृष्यामि किंतुजगत्सर्वंप्रहृष्यतिप्रकर्षेणहर्षंप्र

प्नोति एतत्तुस्थानेयुक्तमित्यर्थः तथाजगत् अनुरज्यतेऽनुरागंचोपैतिइतियत् तथारक्षांसिभीतानिसंतिदिशःप्रद्रवंतिपलायंतइतियत्सर्वे
योगतपोमंत्रादिसिद्धानांसंघानमस्यंतिप्रणमंतीतियत्एतच्चस्थानेयुक्तमेवनचित्रमित्यर्थः ३६ तत्रहेतुमाह कस्मादिति हेमहात्मन् हेअनं
तदेवेशहेजगन्निवास कस्मात् हेतोस्तेतुभ्यंननमेरन् नमस्कारंनकुर्युः कथंभूतायब्रह्मणोपिगरीयसेगुरुतरायआदिकर्त्रेचब्रह्मणोपिचजनं
कायकिंचसत्व्यक्तंअसदव्यक्तंचताभ्यांपरंमूलकारणंयदक्षरंब्रह्मतत्त्वमेव एतैर्नवभिःत्वांसर्वेनमस्यंतीतिनचित्रमित्यर्थः ३७ ॥

किंचत्वमिति त्वमादिदेवः देवानामादिः यतः पुराणः अनादिः पुरुषस्त्वं अतएवत्वमस्यविश्वस्यपरंनिधानंलयस्थानं तथाविश्वस्यवेत्तावेदिताज्ञा
तात्वंयच्चवेद्यंवस्तुजातंपरंचधाम वैष्णवंपरंतदपित्वमेवासि अतएवहे अनंतरूपत्वयाएवइदंविश्वंततंव्याप्तं एतैश्चसप्तभिर्हेतुभिस्त्वमेवनम
स्कार्य्यइतिभावः ३८ इतश्चत्वमेवसर्वैर्नमस्कार्यः सर्वदेवात्मकत्वादितिस्तुवन्स्वयमपिनमस्करोति वायुरिति वाय्वादिरूपस्त्वमितिसर्वदेवात्म
कत्वोपलक्षणार्थमुक्तं प्रजापतिःपितामहः तस्यापिजनकत्वात् प्रपितामहस्त्वं अतस्तेतुभ्यंसहस्रकृत्वःसहस्रशोपिनमोस्तुभूयोपिपुनरपिसह

त्वमादिदेवः पुरुषः पुराणस्त्वमस्यविश्वस्यपरंनिधानं वेत्तासिवेद्यंचपरंचधामत्वयाततंविश्वमनंतरूप ३८ वायुर्यमोग्निर्वरु
णः शशांकः प्रजापतिस्त्वंप्रपितामहश्च नमोनमस्तेस्तुसहस्रकृत्वः पुनश्चभूयोपिनमोनमस्ते ३९ नमः पुरस्तादथपृष्ठतस्तेनमो
स्तुतेसर्वतएवसर्व अनंतवीर्यामितविक्रमस्त्वंसर्वंसमाप्नोषिततोसिसर्वः ४० सखेतिमत्वाप्रसभंयदुक्तं हेकृष्णहेयादवहेसखे

स्रकृत्वोनमोनमइति भक्तिश्रद्धाभरातिरेकेणनमस्कारेषु तृप्तिमनधिगच्छन् वहुशः प्रणमति ३९ किंच नमइतिहेसर्वसर्वात्मन् सर्वास्वपिदिक्षुतुभ्यं
नमोस्तुसर्वात्मकत्वमुपपादयन्नाह अनंतवीर्यंसामर्थ्यंयस्यतथाअमितोविक्रमः पराक्रमोयस्यसएवंभूतस्त्वंसर्वविश्वंसम्यक्अंतर्वहिश्च
व्याप्नोषिसुवर्णमिवकटककुंडलादिस्वकार्यंव्याप्यवर्त्तसेततः सर्वस्वरूपोसि ४० इदानींभगवंतंक्षमापयति सखेतिद्वाभ्यां त्वंमाकृतः सखेमे
वंमत्वाप्रसभंहठेनतिरस्कारेणयदुक्तंततक्षामयेत्वामित्युत्तरेणान्वयः किंतत्हेकृष्णहेयादव॥

हेसखेतिसंधिरार्षःप्रसभोक्तौहेतुःतवमहिमानमिदंचविश्वरूपमजानतामयाप्रमादात्प्रणयेनस्नेहेनापिवायदुक्तमिति ४१ किंचयदितिहेअच्युतयच्च
परिहासार्थंक्रीडादिषुअसत्कृतोसिएकएकलःसखीन्विनारहसिस्थितइत्यर्थः अथवातत्समक्षंतेषांपरिहसतांसखीनांसमक्षंपुरतोपितत्सर्वमपराध
जातंत्वामप्रमेयमचिंत्यप्रभावंक्षामयेक्षमांकारयामि ४२ अचिंत्यप्रभावमेवाहपितेतिनविद्यतेप्रतिमाउपमायस्यसःअप्रतिमस्तथाविधःप्रभावोयस्यत
वहेअप्रतिमप्रभावत्वमस्यचराचरस्यपिताजनकोसि अतएवपूज्यश्चगुरुश्चगुरोरपिगरीयान्गुरुतरःअतोलोकत्रयेपित्वत्समएवतावदन्योनास्ति
परमेश्वरस्यान्यस्याभावात्त्वत्तोभ्यधिकःपुनः कुतःस्यात् ४३ यस्मादेवंतस्मादितितथात्वामीशंजगतःस्वामिनमीड्यंस्तुत्यंप्रसादयामिकथंकायंप्रणि

अजानतामहिमानंतवेदंमयाप्रमादात्प्रणयेनवापि ४१ यच्चावहासार्थमसत्कृतोसिविहारशय्यासनभोजनेषु एकोथवाप्यच्यु
ततत्समक्षंतत्क्षामयेत्वामहमप्रमेयं ४२ पितासिलोकस्यचराचरस्यत्वमस्यपूज्यश्चगुरुर्गरीयान् नत्वत्समोस्त्यभ्यधिकःकुतोन्योलो
कत्रयेप्यप्रतिमप्रभावः ४३ तस्मात्प्रणम्यप्रणिधायकायंप्रसादयेत्वामहमीशमीड्यं पितेवपुत्रस्यसखेवसख्युःप्रियःप्रियायार्हसिदे
वसोढुं ४४ अदृष्टपूर्वंहृषितोस्मिदृष्ट्वाभयेनचप्रव्यथितंमनोमे तदेवमेदर्शयदेवरूपंप्रसीददेवेशजगन्निवास ४५ किरीटिनं

धायदंडवन्निपात्यप्रणम्यनत्वा अतस्त्वंममापराधंसोढुंक्षन्तुमर्हसिकस्यकइवपुत्रस्यापरा॥ ४५ किरीटिनंगदिनंचक्रहस्तमिच्छामित्वांद्रष्टुमहं
धंक्षमयापिताययथासहतेसख्युर्मित्रस्यापराधंसखानिरुपाधिर्बंधुर्यथाप्रियश्चप्रियायाअपराधंतत्प्रियार्थंयथातद्वत् ४४ एवंक्षमापयित्वाप्रार्थय ५८
ते अदृष्टपूर्वमितिद्वाभ्यांहेदेवपूर्वमदृष्टंतवरूपंदृष्ट्वाहृषितोस्मितथाभयेनचमेमनःप्रव्यथितंप्रचलितं तस्मात्ममव्यथानिरत्तयेतदेवरूपंदर्शय हे
देवेशहेजगन्निवासप्रसन्नोभव ४५ तदेवरूपंविशेषयन्नाह किरीटिनमिति किरीटवंतंगदावंतंचक्रहस्तंचत्वांद्रष्टुमिच्छामिपूर्वंयथादृष्टोसितथैवअ
तोहेसहस्रबाहोविश्वमूर्तेइदंरूपंसंहृत्यतेनैवकिरीटादियुक्तेनचतुर्भुजेनरूपेणभवआविर्भूतोभवतदनेननश्रीकृष्णमर्जुनःपूर्वमपिकिरीटादियुक्त

समस्तं जगत् व्याप्य तीव्राः सत्यः प्रतपंति संतापयंति ३० यत एवं तस्मात् आख्याहीति भवानुग्ररूपः इत्याख्याहि कथय तुभ्यं नमोस्तु हे देववर प्रसन्नो
भव भवंतमाद्यं पुरुषं विशेषेण ज्ञातुमिच्छामि यतस्तव प्रवृत्तिं चेष्टां किमर्थमभिप्रवृत्तोसीति न जानामि एवंभूतस्य तव प्रवृत्तिं वार्त्तामपि न जानामीति
वा ३१ एवं प्रार्थितः सन् श्रीभगवानुवाच कालोस्मीति त्रिभिः लोकानां क्षयकर्त्ता प्रवृद्धोऽत्युग्रः कालोस्मि लोकान् प्राणिनः संहर्तुमहं इह लोके प्र
वृत्तोस्मि अतः ऋतेपि त्वा इति त्वां हंतारं विनापि न भविष्यंति न जीविष्यंति केते प्रत्यनीकेषु अनीकान्यनीकानि प्रति भीष्मद्रोणादीनां सर्वासु से

तेजोभिरापूर्य जगत्समग्रं भासस्तवोग्राः प्रतपंति विष्णो ३० आख्याहि मे को भवानुग्ररूपो नमोस्तु ते देववर प्रसीद विज्ञातुमिच्छा
मि भवंतमाद्यं न हि प्रजानामि तव प्रवृत्तिं ३१ श्रीभगवानुवाच कालोस्मि लोकक्षयकृत्प्रवृद्धो लोकान्समाहर्त्तुमिह प्रवृत्तः ऋ
तेपि त्वा न भविष्यंति सर्वे येवस्थिताः प्रत्यनीकेषु योधाः ३२ तस्मात्त्वमुत्तिष्ठ यशो लभस्व जित्वा शत्रून्भुंक्ष्व राज्यं समृद्धं मयैवैते
निहताः पूर्वमेव निमित्तमात्रं भव सव्यसाचिन् ३३ द्रोणं च भीष्मं च जयद्रथं च कर्णं तथान्यानपि योधवीरान्॥ ॥

नासु ये योद्धारो वस्थितास्ते सर्वेपि ३२ यस्मादेवं तस्मादिति तस्मात्त्वं युद्धायोत्तिष्ठ देवैरपि दुर्जया भीष्मद्रोणादयः अर्जुनेन निर्जिता इत्येवंभूतं यशो
लभस्व प्राप्नुहि अयत्नेन शत्रून् जित्वा समृद्धं राज्यं भुंक्ष्व एते च तव शत्रवस्त्वदीययुद्धात्पूर्वमेव मयैव कालात्मना निहतप्रायाः तथापि त्वं निमित्तमा
त्रं भव हे सव्यसाचिन् सव्येन वामहस्तेन सचितुं संधातुं शीलमस्येति युत्पन्त्या वामेनापि बाणक्षेपात् सव्यसाचीत्युच्यते ३३ न चैतद्विद्मः कतरन्नो
गरीयो यद्वा जयेम यदि वा नो जयेयुरित्यादिया शंकासापि न कार्येत्याह द्रोणं च भीष्मं चेति येभ्यस्त्वमाशंकसे तान् द्रोणभीष्मादीन् मयैव हतान्

ततोनिर्भयःसन् अर्जुनउवाच दृष्ट्वेदमिति सचेताःप्रसन्नचित्तःइदानींसंवृत्तः जातोस्मिप्रकृतिंस्वास्थ्यंप्राप्तोस्मिशेषंस्पष्टं ५१ स्वकृतस्यानुग्रहस्यातिदुर्लभत्वं
दर्शयन् श्रीभगवानुवाच सुदुर्दर्शमिति यत्ममविश्वरूपंदृष्टवानसितत् सुदुर्दर्शं अन्यैस्तंद्रष्टुमशक्यं अतोदेवा अपिअस्यरूपस्यसर्वदादर्शनमिच्छंतिकेवा
लंनपुनरिदंपश्यंति निगदव्याख्यातप्रायमेतत् यतःस्वर्गादितत्त्वाधिकारव्यग्रचित्तत्वादपरामृष्टस्वभावाब्रह्मादयोपिदेवाअस्यरूपस्यसदासाक्षात्कारं
कांक्षंति नतुलभंतेततःसुतरांसर्वेणकेनचिद्दुःकरदर्शनमेतत् यत्त्वयामत्प्रसादाभिभूतपरज्ञानदृष्टिमतायथामांत्वंतत्वतःसाक्षात्कृतवांस्तथादानादिभि

अर्जुनउवाच दृष्ट्वेदंमानुषंरूपंतवसौम्यंजनार्दन इदानीमस्मिसंवृत्तःसचेताःप्रकृतिंगतः ५१ श्रीभगवानुवाच सुदुर्दर्शमिदं
रूपंदृष्टवानसियन्मम देवाअप्यस्यरूपस्यनित्यंदर्शनकांक्षिणः ५२ नाहंवेदैर्नतपसानदानेनचेज्यया शक्यएवंविधोद्र
ष्टुंदृष्टवानसिमांयथा ५३ भक्त्यात्वनन्ययाशक्यअहमेवंविधोर्जुन ज्ञातुंद्रष्टुंचतत्त्वेनप्रवेष्टुंचपरंतप ५४ मत्कर्मकृन्मत्प
रमोमद्भक्तःसंगवर्जितः निर्वैरःसर्वभूतेषुयःसमामेतिपांडव ५५ इतिश्रीभगवद्गीतासूपनिषत्सु ब्रह्मविद्यायांयोगशास्त्रे
श्रीकृष्णार्जुनसंवादेविश्वरूपदर्शनयोगोनामएकादशोऽध्यायः ११॥ द्रष्टुमशक्योहं तर्हियेनउपायेनशक्योसीत्याह ५२ तत्र
हेतुःनाहमितिस्पष्टार्थः ५३ केनोपायेनतर्हित्वंद्रष्टुंशक्यइतितत्राहभक्त्येतिअनन्ययामदेकनिष्ठयाभक्त्यातु एवंभूतोविश्वरूपोहंतत्वेनपरमार्थतोज्ञा
तुंशक्यःशास्त्रतोद्रष्टुंचप्रत्यक्षतःप्रवेष्टुंचतादात्म्येनशक्यःनान्यैरुपायैः ५४ अतःसर्वशास्त्रसारंपरमंरहस्यं शृण्वित्याहमत्कर्मकृदितिमत्कर्मक
र्तीतिमत्कर्मकृत् अहमेवपरमःपुरुषार्थोयस्यसः ममैवभक्तिमाश्रितःपुत्रादिषुसंगवर्जितःनिर्वैरश्चसर्वभूतेषुएवंभूतोयःसमांप्राप्नोतिनान्यइति
५५ देवैरपिसुदुर्दर्शतयायज्ञादिकोटिभिःभक्तायभगवान्स्वंविश्वरूपमदर्शयत् ११ इतिश्रीसुबोधिन्यांटीकायांविश्वरूपदर्शनयोगोनामैकादशोऽध्या

निर्गुणोपासनस्यैवं सगुणोपासनस्य च श्रेयः कतरदित्येकं निर्गुणो तु द्वादशोद्यमः १ पूर्वाध्यायांते मत्कर्मकृन्मत्परम इत्येवं भक्तिनिष्ठस्य श्रेष्ठत्वमुक्तं कौंतेयप्रतिजा
नीहीत्यादिना च तत्र तस्यैव श्रेष्ठत्वं वर्णितं तथा नेषां ज्ञानी नित्ययुक्त एकभक्तिर्विशिष्यते इत्यादिना च सर्वं ज्ञानप्लवेनैव वृजिनं संतरिष्यसीत्यादिना ज्ञाननिष्ठस्य श्रे
ष्ठत्वमुक्तं एवमुभयोः श्रेष्ठत्वे पि विशेषजिज्ञासया भगवंतमर्जुन उवाच एवं सर्वकर्मार्पणादिना सततं युक्ताः त्वन्निष्ठाः संतो ये भक्तास्त्वां विश्वरूपं सर्वज्ञं सर्वेश
क्तिं पर्युपासते ध्यायंति ये चाप्यक्षरं ब्रह्म अव्यक्तं निर्विशेषमुपासते ध्यायंति तेषामुभयेषां मध्ये के अतिशयेन योगविदः श्रेष्ठा इत्यर्थः १ तत्र प्रथमाः श्रेष्ठा इत्यु
त्तरं श्रीभगवानुवाच मयीति मयि परमेश्वरे सर्वज्ञत्वादिगुणविशिष्टे मन आवेश्यैकाग्रं कृत्वा नित्ययुक्ता मदर्थकर्मानुष्ठानादिना मन्निष्ठाः संतः श्रेष्ठया श्रद्धया युक्ता
ये मामाराधयंति ते युक्ततमा मम ता मम अभिमताः २ किं तर्हि इतरे किं न श्रेष्ठा इत्याह यत्त्वक्षरमिति द्वाभ्यां ये त्वक्षरं पर्युपासते ध्यायंति ते पि मामेव प्राप्नुवंतीति द्वयोरन्व

अर्जुन उवाच · एवं सततयुक्ता ये भक्तास्त्वां पर्युपासते ये चाप्यक्षरमव्यक्तं तेषां के योगवित्तमाः १ श्रीभगवानुवाच मय्यावे
श्य मनो ये मां नित्ययुक्ता उपासते श्रद्धया परयोपेतास्ते मे युक्ततमा मता २ ये त्वक्षरमनिर्देश्यमव्यक्तं पर्युपासते सर्वत्रगमचिंत्यं
च कूटस्थमचलं ध्रुवं ३ संनियम्येंद्रियग्रामं सर्वत्र समबुद्धयः ते प्राप्नुवंति मामेव सर्वभूतहिते रताः ४॥

यः अक्षरस्य लक्षणमनिर्देश्य
मित्यादि अनिर्देश्यं शब्देन व्यपदेष्टुमशक्यं अतः अव्यक्तं रूपादिहीनं सर्वत्रगं सर्वव्यापि अव्यक्तत्वादेवाचिंत्यं कूटस्थं कूटे मायाप्रपंचे अधिष्ठानत्वेन स्थि
तं अचलं वृद्ध्यादिरहितं अत एव ध्रुवं नित्यं स्पष्टमन्यत् ३ ये तु मनोयोगिनः इंद्रियग्रामं वाह्यानामांतराणां चाक्षाणां समूहं संनियम्य सम्यक् अप्रम
त्ततया नियम्य सर्वेभ्यो विषयेभ्यः प्रतिषिध्य मामुपासत इत्यर्थः कीदृशाः संत एवंविधं मामुपासते सर्वत्र समबुद्धयः सर्वस्मिन् वस्तुनि मत्स्वरूपैकदर्शित्वात्
समा निर्विशेषा बुद्धिर्येषां ते तथोक्ताः समबुद्धित्वादेव सर्वभूतानां हिते रताः सर्वस्यात्मत्वेन प्रतिपत्तेर्न क्वचिद्द्वेषदोषकालुष्यमनुभवंतः अनेन विशेषणेनास्य
समाधेरनिष्पत्तिः प्रतिपादिता न हि सर्वमात्मस्य चिरूढो योगी निष्पन्न इत्युते य एवंविधा योगिनो मामुपासते ते सत्यं मामेव प्राप्नुवंति यथोक्तयोः कर्तव्यते यो निष्प

गी·टी· श्री· ६० न

ननु तेपि चेत् त्वामेव प्राप्नुवंति तर्हि इतरेषां युक्ततमत्वं कुत इत्यपेक्षायां क्लेशात्क्लेशकृतं विशेषमाह क्लेश इति त्रिभिः अव्यक्ते निर्विशेषणे अक्षरे आसक्तं चेतो येषां तेषां क्लेशोऽधिकतरो हि यस्मादव्यक्ताविषया गतिर्निष्ठा देहाभिमानिभिर्दुःखं यथा भवत्येवमवाप्यते देहाभिमानिनां नित्यं प्रत्यक्त्वश्रवणस्य दुर्घटत्वादिति भावः ५ मद्भक्तानां तु मत्प्रसादादनायासेन सिद्धिर्भवतीत्याह ये त्विति द्वाभ्यां मयि परमेश्वरे सर्वाणि कर्माणि संन्यस्य समर्प्य मत्पराभूत्वा मां ध्यायंतोऽनन्येन न विद्यते अन्यो भजनीयो यस्मिन् तेनैव भक्तियोगेनोपासत इत्यर्थः ६ तेषामिति एवं मयि आवेशितं चेतो येस्तेषां मृत्युयुक्तात्संसारसागरात् अहं सम्यक् उद्धर्ताऽचिरेणैव भवामि ७ यस्मादेवं तस्मात् मय्येवेति मय्येव संकल्पविकल्पात्मकं मन आधत्स्व स्थिरीकुरु बुद्धिमपि अध्यवसा-

क्लेशोऽधिकतरस्तेषामव्यक्तासक्तचेतसां अव्यक्ता हि गतिर्दुःखं देहवद्भिरवाप्यते ५ ये तु सर्वाणि कर्माणि मयि संन्यस्य मत्पराः॥
अनन्येनैव योगेन मां ध्यायंत उपासते ६ तेषामहं समुद्धर्ता मृत्युसंसारसागरात् भवामि नचिरात्पार्थ मय्यावेशितचेतसां ७ म-
य्येव मन आधत्स्व मयि बुद्धिं निवेशय निवसिष्यसि मय्येव अत ऊर्द्ध्वं न संशयः ८ अथ चित्तं समाधातुं न शक्नोषि मयि स्थिरं॥
अभ्यासयोगेन ततो मामिच्छाप्तुं धनंजय ९ अभ्यासेप्यसमर्थोसि मत्कर्मपरमो भव मदर्थमपि कर्माणि कुर्वन् सिद्धिमवाप्स्यसि १०

यात्मिकां मय्येव प्रवेशय एवं कुर्वन् मत्प्रसादेन लब्धज्ञानः सन् अत ऊर्द्ध्वं देहांते मय्येव निवसिष्यसि निवत्स्यसि मदात्मना वा संकरिष्यसि नात्र संशयः तथा च श्रुतिः देहांते देवः परं ब्रह्म तारकं व्याचष्ट इति ८ अत्रासक्तं प्रति सुगमोपायमाह अथेति स्थिरं यथा भवति एवं मयि चित्तं धारयितुं यदि शक्तो न भवसि तर्हि विक्षिप्तं चित्तं पुनः पुनः प्रत्याहृत्य मम मानुस्मरणलक्षणो योभ्यासयोगस्तेन मां प्राप्तुमिच्छ प्रयत्नं कुरु ९ यदि पुनः अभ्यास इति अभ्यासेपि यदि अशक्तोसि तर्हि मत्प्रीत्यर्थं यानि कर्माणि एकादश्युपवासादिव्रतपूजा यापरिचर्यानामसंकीर्त्तनादीनि तदनुष्ठानमेव परमं यस्य तादृशो भव एवं भू- ६०

पश्यतीति गम्यते यत्पूर्वरूपमुक्तं विश्वरूपदर्शने किरीटिनं गदिनं चक्रिणं च पश्यामीति तच्च बहुकिरीटाद्यभिप्रायेण यद्वा एतावंतं कालं ये त्वां किरीटिनं गदिनं चक्रि-
णं च सुप्रसन्नमपश्यं तमेवेदानीं तेजोराशिं दुर्निरीक्ष्यं पश्यामीत्येवं तत्र वचनव्यक्तिरित्यदोषः अविरोधः ४६ एवं प्रव्यथितः सन् तमाश्वासयन् श्रीभगवानु-
वाच मयेति त्रिभिः हे अर्जुन किमिति त्वं बिभेषि यतो मया प्रसन्नेन कृपया तवेदं परमुत्तमं रूपं दर्शितं आत्मनो मम योगात् योगमायासामर्थ्यात्
परमत्वमेवाह तेजोमयं विश्वं विश्वात्मकं अनंतमाद्यं च यत् मम रूपं त्वदन्येन त्वद्भक्तादन्येन पूर्वं न दृष्टं ननु द्यूतसभायां भीष्मादिभिर्दृष्टत्वादेवं व्या-
ख्यातं ४७ एतद्दर्शनं दुर्लभं लब्ध्वा त्वं कृतार्थोसीत्याह न वेदेति वेदाध्ययनातिरेकेण यज्ञाध्ययनस्याभावात् यज्ञशब्देन यज्ञविद्याः कल्पसूत्राद्या लक्ष्यंते

तेनैव रूपेण चतुर्भुजेन सहस्रबाहो भव विश्वमूर्ते ४६ श्रीभगवानुवाच मया प्रसन्नेन तवार्जुनेदं रूपं परं दर्शितमात्मयोगात्
तेजोमयं विश्वमनंतमाद्यं यन्मे त्वदन्येन न दृष्टपूर्वं ४७ न वेदयज्ञाध्ययनैर्न दानैर्न च क्रियाभिर्न तपोभिरुग्रैः एवंरूपः शक्य अहं
नृलोके द्रष्टुं त्वदन्येन कुरुप्रवीर ४८ मा ते व्यथा मा च विमूढभावो दृष्ट्वा रूपं घोरमीदृङ्ममेदं व्यपेतभीः प्रीतमनाः पुनस्त्वं तदेव मे रूप-
मिदं प्रपश्य ४९ संजय उवाच इत्यर्जुनं वासुदेवस्तथोक्त्वा स्वकं रूपं दर्शयामास भूयः आश्वासयामास च भीतमेनं भूत्वा पुनः सौम्य-

वेदानां यज्ञविद्यानां चाध्ययनैरित्यर्थः न च दानैर्न च क्रियाभिरग्निहोत्रादिभिर्न चोग्रैस्तपोभिश्चांद्रायणादिभिः एवंरूपोहं त्वत्तोन्येन नृलोके मनुष्यलोके न द्रष्टुं शक्यः अ-
पि तु त्वमेव केवलं मत्प्रसादेन दृष्ट्वा कृतार्थोसि ४८ एवमपि चेत् न वेदं घोरं रूपं दृष्ट्वा व्यथा भवति तर्हि तदेवं रूपं दर्शयामीत्याह मा त इति ईदृक् ईदृशं मदीयं घोरं रूपं दृ-
ष्ट्वा ते व्यथा मास्तु विमूढभावः विमूढत्वं च मास्तु व्यपगतभयः प्रीतमनाश्च सन् पुनस्त्वं तदेव मम रूपं प्रकर्षेण पश्य ४९ एवमुक्त्वा प्राक्तनमेव रूपं दर्शितवानिति सं-
जय उवाच इतीति श्रीवासुदेवोर्जुनमेवमुक्त्वा यथा पूर्वरूपमासीत् तथा किरीटादियुक्तं चतुर्भुजं स्वीयं रूपं पुनर्दर्शयामास एवमर्जुनं भीतमेव प्रसन्न व-
पुर्भूत्वा पुनरपि आश्वासयामास आश्वासितवान् महात्मा विश्वरूपः कृपालुरिति वा ५०

गी॰टी॰ किंचानपेक्ष इति अनपेक्षो यदृच्छोपस्थितेप्यर्थे निस्पृहः शुचिर्बाह्याभ्यंतरशौचसंपन्नः दक्षोऽनलसः उदासीनः पक्षपातरहितः गतव्यथः आधिशून्यः सर्वा
श्री॰ न् दृष्टादृष्टार्थान् आरंभान् उद्यमान् परित्यक्तुं शीलं यस्य सः एवंभूतः स न यो मद्भक्तः स च मे प्रियः १६ किंच यो नेति प्रियं प्राप्य यो न हृष्यति यः अप्रियं
६९ प्राप्य न द्वेष्टि इष्टार्थनाशे सति न शोचति अप्राप्तमर्थं न कांक्षति शुभाशुभे पुण्यपापे परित्यक्तुं शीलं यस्य स एवंभूतो भूत्वा यो भक्तिमान् स मे प्रियः १७ किं
च सम इति शत्रौ च मित्रे च समः एकरूपः मानापमानयोरपि तथा सम एव हर्षविषादशून्य इत्यर्थः शीतोष्णयोः सुखदुःखयोश्च समः संगविवर्जितः क्वचि
दपि अनासक्तः १८ तुल्येति तुल्ये निंदास्तुती यस्य मौनी संयतवाक् येन केनचिद्यथालब्धेन संतुष्टः अनिकेतो नियतवासशून्यः स्थिरमतिर्व्यवस्थित

अनपेक्षः शुचिर्दक्ष उदासीनो गतव्यथः सर्वारंभपरित्यागी यो मद्भक्तः स मे प्रियः १६ यो न हृष्यति न द्वेष्टि न शोचति न कांक्षति शु
भाशुभपरित्यागी भक्तिमान्यः स मे प्रियः समः शत्रौ च मित्रे च तथा मानापमानयोः शीतोष्णसुखदुःखेषु समः संगविवर्जितः १८
तुल्यनिंदास्तुतिर्मौनी संतुष्टो येन केनचित् अनिकेतः स्थिरमतिर्भक्तिमान्मे प्रियो नरः १९ ये तु धर्मामृतमिदं यथोक्तं पर्युपासते॥
श्रद्दधाना मत्परमा भक्तास्तेतीव मे प्रियाः २० इति श्रीभगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे भक्ति
योगो नाम द्वादशोऽध्यायः १२॥ ॥ चित्तः एवंभूतो भक्तिमान् मे प्रियो नरः १९ उक्तं धर्मज्ञानं सफलमुपसंहरति ये त्विति यथो
क्तमुक्तप्रकारं धर्ममेवामृतममृतसाधनत्वात् धर्मामृतमिति केचित्पठंति तत् ये उपासते अनुतिष्ठंति श्रद्दधाः कुर्वंतो मत्परमाश्च संतो मद्भक्तास्तेऽती
व मे प्रिया इति २० दुःखमव्यक्तवर्त्मेतद्भूत् इह विघ्नं मनो बुधः सुखं कृष्णपदांभोजे भक्तिसत्पथमाभजेत् २१ इति श्रीसुबोधिन्यां टीकायां द्वादशोऽ

भक्तानामहमुद्धर्त्तासंसारादित्यवादियत् त्रयोदशेऽथ तत्सिद्ध्यै तत्त्वज्ञानमुदीर्यते १ तेषामहं समुद्धर्त्ता मृत्युसंसारसागरात् भवामीति पूर्वं प्रतिज्ञातं न
चात्मज्ञानं विना संसारादुद्धरणं संभवतीति तत्त्वज्ञानोपदेशार्थं प्रकृतिपुरुषविवेकाध्याय आरभ्यते तत्र यत्सप्तमेध्याये अपरा च परा चेति प्रकृतिद्वय
मुक्तं तयोरपि विवेकाज्जीवत्वमापन्नस्य चिदंशस्यायं संसारः याभ्यां च जीवोपभोगार्थमीश्वरः सृष्ट्यादिषु प्रवर्त्तते तदेव प्रकृतिद्वयं क्षेत्रक्षेत्रज्ञशब्द
वाच्यं परस्परं विविक्तं तत्त्वतो निरूपयिष्यन् १ श्रीभगवानुवाच· इदमिति इदं भोगायतनं शरीरं क्षेत्रमित्यभिधीयते संसारस्य प्ररोहभूमित्वात् एतद्यो
वेत्ति अहं ममेति मन्यते तं क्षेत्रज्ञं प्राहुः कृषीवलवत्तत्फलभोक्तृत्वात् तद्विदः क्षेत्रक्षेत्रज्ञयोर्विवेकज्ञाः २ तदेवं संसारिस्वरूपमुक्तं इदानीं तस्यैव पर

अर्जुन उवाच· प्रकृतिं पुरुषं चैव क्षेत्रं क्षेत्रज्ञमेव च एतद्वेदितुमिच्छामि ज्ञानं ज्ञेयं च केशव १ श्रीभगवानुवाच इदं शरीरं कौंतेय क्षे
त्रमित्यभिधीयते एतद्यो वेत्ति तं प्राहुः क्षेत्रज्ञमिति तद्विदः २ क्षेत्रज्ञं चापि मां विद्धि सर्वक्षेत्रेषु भारत क्षेत्रक्षेत्रज्ञयोर्ज्ञानं यत्तज्ज्ञानं
मतं मम २ तत्क्षेत्रं यच्च यादृक्च यद्विकारि यतश्च यत् स च यो यत्प्रभावश्च तत्समासेन मे शृणु ३ ॥ ((मार्थिकमसंसारिस्वरूपमाह

क्षेत्रज्ञमिति तं क्षेत्रज्ञं संसारिणं वस्तुतः सर्वेषु क्षेत्रेष्वनुगतं मामेव विद्धि तत्त्वमसीति श्रुत्या लक्षितेन चिदंशेन मद्रूपस्योक्तत्वात् आदरार्थमेव
तज्ज्ञानं स्तौति क्षेत्रक्षेत्रज्ञयोर्यदेवं विलक्षणेन ज्ञानं तदेव मोक्षहेतुत्वात् मम ज्ञानं मतं अन्यत्तु दर्पापांडित्यं वंधहेतुत्वादित्यर्थः तदुक्तं तत्कर्म य
न्न वंधाय सा विद्या या विमुक्तये आयासायापरं कर्म विद्यान्या शिल्पनैपुणमिति २ अत्र चतुर्विंशतिभेदैर्भिन्ना प्रकृतिः क्षेत्रमित्यभिप्रेतं तथापि देह
रूपेण परिणतायामेव तस्यामहंभावेनाविवेकः स्फुट इति तद्विवेकार्थमिदं शरीरं क्षेत्रमित्याद्युक्तं तदेतत्प्रपंचयिष्यन् प्रतिजानीते तत्क्षेत्रमिति यदुक्तं
मया क्षेत्रं यत्स्वरूपतो जडं दृश्यादिस्वभावं यादृक् यादृशं च इच्छादिधर्मकं यद्विकारि यैरिंद्रियादिविकारैर्युक्तं यतश्च प्रकृतिपुरुषसंयोगाद्भवति ।

यदितिये:स्थावरजंगमादिभिर्भेदैर्भिन्नमित्यर्थः सच क्षेत्रज्ञोयः स्वरूपतः यत्प्रभावतश्च अचिंत्यैश्वर्ययोगेन यैःप्रभावैःसंपन्नः तत्सर्वंसंक्षेपतोमत्तःशृणु ३ केर्वि-
स्तरेणोक्तस्यायंसंक्षेपइत्यपेक्षायामाह ऋषिभिरिति ऋषिभिर्वशिष्ठादिभिर्योगशास्त्रेषुध्यानधारणादिविषयत्वेन वैराजादिरूपेणबहुधागीतंनिरूपि-
तंविविधैश्च नित्यनैमित्तिककाम्यविषयैः छंदोभिर्वेदैर्नानायजनीयदेवतादिरूपेणगीतंब्रह्मणःसूत्रैःपदैश्चब्रह्मसूच्यतेसूच्यतेएभिरितिब्रह्मसूत्राणि
यतोवाइमानिभूतानिजायंतइत्यादीनितटस्थलक्षणपराणिउपनिषद्वाक्यानि तथाब्रह्मपद्यते गम्यतेसाक्षात् ज्ञायतेएभिरितिपदानिस्वरूपलक्षण-
पराणिसत्यंज्ञानमनंतंब्रह्मेत्यादीनितैश्च बहुधागीतंकिंचहेतुमद्भिः सदेवसोम्येदमग्रआसीत् कथमसतःसज्जायेतेतितथा कोह्येवान्यात्कःप्राण्या-
त्यदेषआकाशआनंदोनस्यात् एषएवानंदयतीत्यादियुक्तिमद्भिः अन्यात् अपानचेष्टांकःकुर्यात् प्राण्यात् प्राणनांव्यापारंकोवाकुर्यादितिश्रुति-

ऋषिभिर्बहुधागीतंछंदोभिर्विविधैःपृथक् ब्रह्मसूत्रपदैश्चैवहेतुमद्भिर्विनिश्चितैः ४ महाभूतान्यहंकारोबुद्धिरव्यक्तमेवच
इंद्रियाणिदशैकंचपंचचेंद्रियगोचराः ५ इच्छाद्वेषःसुखंदुःखंसंघातश्चेतनाधृतिः ॥ पदयोरर्थंविनिश्चितैरुपक्रमोपसंहारैकवाक्यत-
याःसंदिग्धार्थप्रतिपादकैरित्यर्थः तदेवमेतैर्विस्तरेणोक्तं संग्रहंसंक्षेपतस्तुभ्यंकथयिष्यामिशृण्वित्यर्थः यद्वा अथातोब्रह्मजिज्ञासेत्यादीनिब्र-
ह्मसूत्राणिगृह्यंते तान्येवचब्रह्मपद्यतेनिश्चीयतेएभिरितिपदानितैर्हेतुमद्भिरीक्षतेर्नाशब्दम् आनंदमयोभ्यासादित्यादिभिर्युक्तिमद्भिर्विनिश्चितार्थैः
शेषंसमानं ४ तत्क्षेत्रस्वरूपमाह महाभूतानीतिद्वाभ्यां महाभूतानिभूम्यादीनि अहंकारस्तत्कारणभूतः बुद्धिर्विज्ञानात्मकंमहत्तत्वं अव्यक्तं मूलप्रकृ-
तिरिंद्रियाणिबाह्यानिदशएकंचमनः इंद्रियगोचराश्चपंचतन्मात्ररूपाएवशब्दादयः आकाशादिगुणविशेषतयाव्यक्ताःसंतःइंद्रियविषयाःपंच ए-
तदेवंचतुर्विंशतितत्वात्मकानिइच्छादयःप्रसिद्धाःसंघातःशरीरंचेतनाज्ञानात्मिकामनोवृत्तिः धृतिर्धैर्यंएतेइच्छादयोदृश्यत्वात् नात्मधर्माःअपितु॥

अथैतं भगवद्धर्मपरिनिष्ठायामशक्तस्य पक्षान्तरमाह अथैतदिति अथैतदपि कर्तुं न शक्तोऽसि तर्हि मद्योगं मदेकशरणत्वमाश्रितः सन् सर्वेषां दृष्टादृष्टार्थाना
मावश्यकानां चाग्निहोत्रादिकर्मणां फलानि नियतचित्तो भूत्वा परित्यज एतदुक्तं भवति मया नावधीश्वराज्ञया यथाशक्ति कर्माणि कर्तव्यानि फलं तु पुनर्दैव
मदधीनं वा परमेश्वराधीनमित्येवमपि भारमारोप्य फलाशक्तिं परित्यज्य वर्तमानो मत्प्रसादेन कृतार्थो भविष्यसीति ११ तमिमं फलत्यागं स्तौति श्रेयो हीति स
म्यक्ज्ञानरहितात् अभ्यासात् युक्तिसहितोपदेशपूर्वकं ज्ञानं श्रेष्ठं तस्मादपि तत्पूर्वकं ध्यानं विशिष्टं ततस्तु तं पश्यति निष्कलं ध्यायमान इति श्रुतेः तस्मा
दपि उक्तलक्षणः कर्मफलत्यागः श्रेष्ठः तस्मादेवंभूतात् त्यागात् कर्मसु तत्फलेषु चासक्तिनिवृत्त्या मत्प्रसादेन च समनन्तरमेव संसारशान्तिर्भवति १२

अथैतदप्यशक्तोऽसि कर्तुं मद्योगमाश्रितः सर्वकर्मफलत्यागं ततः कुरु यतात्मवान् ११ श्रेयो हि ज्ञानमभ्यासाज्ज्ञानाद्ध्यानं विशि
ष्यते ध्यानात्कर्मफलत्यागस्त्यागाच्छान्तिरनन्तरं १२ अद्वेष्टा सर्वभूतानां मैत्रः करुण एव च निर्ममो निरहंकारः समदुःखसुखः क्ष
मी १३ संतुष्टः सततं योगी यतात्मा दृढनिश्चयः मय्यर्पितमनोबुद्धिर्यो मद्भक्तः स मे प्रियः १४ यस्मान्नोद्विजते लोको लोकान्नोद्विजते
च यः हर्षामर्षभयोद्वेगैर्मुक्तो यः स च मे प्रियः १५॥ ११ एवंभूतस्य भक्तस्य क्षिप्रमेव परमेश्वरप्रसादहेतून् धर्मानाह अद्वेष्टेत्यष्टभिः सर्वभूतानां

यथायथमद्वेष्टा मैत्रः करुणश्च उत्तमेषु द्वेषशून्यः समेषु मित्रतया वर्तत इति मैत्रः हीनेषु कृपालुरित्यर्थः निर्ममो निरहंकारश्च कृपालुत्वादेवान्यैः
सह समे सुखदुःखे यस्य सः क्षमी क्षमावान् १३ सततं लाभे अलाभे च संतुष्टः प्रसन्नचित्तः योगी अप्रमत्तः यतात्मा संयतस्वभावः दृढो मद्विषयो निश्च
यो यस्य सः मयि अर्पिते मनोबुद्धी येन एवंभूतो यो मद्भक्तः स मे प्रियः १४ किं च यस्मादिति यस्मात्सकाशात् लोको जनो नोद्विजते भयशंकया संक्षोभं
न प्राप्नोति यश्च लोकान्नोद्विजते यश्च स्वाभाविकैर्हर्षादिभिर्मुक्तः तत्र हर्षः स्वस्येष्टार्थलाभे उत्साहः अमर्षः परस्य लाभे असहनं भयं त्रासः उद्वेगो भय

त्वं परार्थे शुद्धिनिष्ठत्वमित्यर्थः तत्त्वज्ञानस्यार्थः प्रयोजनं मोक्षः तस्य दर्शनं मोक्षस्य सर्वोत्कृष्टतालोचनमित्यर्थः एतदमानित्वमदंभित्वमित्यादि
विंशतिसंख्याकं यदुक्तमेतत् ज्ञानमिति प्रोक्तं ज्ञानसाधनत्वात् अतोन्यथा अस्माद्विपरीतं मानित्वं दंभित्वादि यदेतत् अज्ञानमिति प्रोक्तं वशिष्टादि
भिः ज्ञानविरोधित्वात् अतः सर्वथा तत्त्याज्यमित्यर्थः ११ एभिः साधनैर्यत् ज्ञेयं तदाह ज्ञेयमिति यज्ज्ञेयं तत्प्रवक्ष्यामि श्रोतुरादरसिद्धये ज्ञानफलं दर्श
यति यद्वक्ष्यमाणं ज्ञात्वामृतं मोक्षं प्राप्नोति किं तत् अनादिमत् आदिमन्न भवतीति अनादिमत् परं निरतिशयं ब्रह्म अनादीत्येतावतैव बहुव्रीहिणा
ऽनादित्वे सिद्धेपि पुनर्मतुपः प्रयोगः छांदसः यद्वा अनादीति मत्परमिति पदद्वयं मम विष्णोः परं निर्विशेषं रूपं ब्रह्मेत्यर्थः तदेवाह न सत् न चासदुच्यते
विधिमुखेन प्रमाणस्य विषयः सच्छब्देनोच्यते निषेधस्य विषयस्त्वसच्छब्देनोच्यते इदं तु तदुभयविलक्षणं अविषयत्वादित्यर्थः १२ ननु एवं ब्रह्मणः

एतज्ज्ञानमिति प्रोक्तमज्ञानं यदतोन्यथा ११ ज्ञेयं यत्तत्प्रवक्ष्यामि यज्ज्ञात्वामृतमश्नुते अनादिमत्परं ब्रह्म न सत्तन्नासदुच्यते १२
सर्वतः पाणिपादं तत्सर्वतोक्षिशिरोमुखं सर्वतः श्रुतिमल्लोके सर्वमावृत्य तिष्ठति १३ सर्वेन्द्रियगुणाभासं सर्वेन्द्रियविवर्जितं ॥

सदसद्विलक्षणत्वे सति सर्वं खल्विदं ब्रह्मैवेदं सर्वमित्यादि श्रुतिभिर्विरुध्येतेत्याशंकां परस्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया चेत्या
दि श्रुतिप्रसिद्धयाऽचिंत्यशक्त्या सर्वात्मतां तस्य दर्शयन्नाह सर्वत इति पंचभिः सर्वतः पाणयः पादाश्च यस्य तत् सर्वतोक्षीणि शिरांसि मुखानि
च यस्य तत् सर्वतः श्रुतिमत् श्रवणेंद्रिययुक्तं लोके सर्वमावृत्य व्याप्य तिष्ठति सर्वप्राणिवृत्तिभिः पाण्यादिभिरुपाधिभिः सर्वव्यवहारास्पद
त्वेन तिष्ठतीत्यर्थः १३ किंच सर्वेंद्रियेति सर्वेषां चक्षुरादीनामिंद्रियाणां गुणेषु रूपाद्याकारासु वृत्तिषु तत्तदाकारेणाभासत इति तथा सर्वाणींद्रि ६३
याणि गुणाश्च तत्तद्विषयानाभासयतीति वा सर्वैरिंद्रियैर्विवर्जितं च तथा च श्रुतिः अपाणिपादो जवनो ग्रहीता॰ ॥ ॥

पश्यत्यचक्षुः स शृणोत्यकर्णः इत्यादि असक्तं संगशून्यं तथापि सर्वं विभर्तीति सर्वभृत् सर्वस्याधारभूतं तथैव निर्गुणं सत्त्वादिगुणवर्जितं गुणानां सत्त्वादी-
नां भोक्तृ च पालकं १४ किंच बहिरिति भूतानां चराचराणां स्वकार्याणां बहिश्चांतश्च तदेव च सुवर्णमिव कटककुंडलादीनां अचरं स्थावरं चरं जंगमं
भूतजातं तदेव कारणात्मकत्वात् कार्यस्य एवमपि सूक्ष्मत्वात् रूपादिहीनत्वात् तदविज्ञेयं इदं तदिति स्पष्टज्ञानार्हं न भवति अत एवाविदुषां यो-
जनलक्षांतरितमिव दूरस्थं च सविकारायाः प्रकृतेः परत्वात् विदुषां पुनः प्रत्यगात्मत्वात् अंतिके च तत् नित्यं सन्निहितं तत्र मंत्रः तदेजति तन्नैजति
तद्दूरे तदंतिके तदंतरस्य सर्वस्य तदु सर्वस्यास्य बाह्यत इति एजति चलति नैजति न चलति तत् अंतिके इति च्छेदः १५ किंच अविभक्तमिति भूतेषु।

असक्तं सर्वभृच्चैव निर्गुणं गुणभोक्तृ च १४ बहिरंतश्च भूतानामचरं चरमेव च सूक्ष्मत्वात्तदविज्ञेयं दूरस्थं चांतिके च तत् १५
अविभक्तं च भूतेषु विभक्तमिव च स्थितं भूतभर्तृ च तज्ज्ञेयं ग्रसिष्णु प्रभविष्णु च १६ ज्योतिषामपि तज्ज्योतिस्तमसः परमुच्यते॥
ज्ञानं ज्ञेयं ज्ञानगम्यं हृदि सर्वस्य धिष्ठितं १७॥

११ स्थावरजंगमात्मकेषु अविभक्तं कारणात्मनाऽभिन्नं कार्यात्मना विभक्तं भिन्नमिव स्थि-
तं च तत् पूर्वोक्तं ज्ञेयं भूतानां भर्तृ पोषकं स्थितिकाले प्रलयकाले च ग्रसिष्णु ग्रसनशीलं सृष्टिकाले च प्रभविष्णु नानाकार्यात्मना प्रभवनशीलं किंच
ज्योतिषामिति ज्योतिषां चंद्रादित्यादीनामपि तत् ज्योतिः प्रकाशकं तत् येन सूर्यस्तपति तेजसेद्धः न तत्र सूर्यो भाति न चंद्रतारकं नेमा विद्युतो भांति
कुतोयमग्निः तमेव भांतमनुभाति सर्वं तस्य भासा सर्वमिदं विभातीति श्रुतेः अत एव तमसो अज्ञानात् परं तेनासंस्पृष्टमुच्यते आदित्यवर्णं तमसः प-
रस्तादित्यादिश्रुतिभिः ज्ञानं च तदेव बुद्धिवृत्तावभिव्यक्तं तदेव रूपाद्याकारेण ज्ञेयं च ज्ञानेन गम्यं च अमानित्वमदंभित्वमित्यादिलक्षणेन पूर्वोक्तेन
ज्ञानसाधनेन प्राप्यमित्यर्थः ज्ञानगम्यं विशिनष्टि सर्वस्य प्राणिजातस्य हृदि विष्ठितं विशेषेण प्रच्युतस्वरूपेण नियंत्रितया स्थितं धिष्ठितमिति पा

उक्तं क्षेत्रादिकमधिकारिफलसहितमुपसंहरति इतीति इत्येवं क्षेत्रं महाभूतादिधृत्यंतं तथा ज्ञानं च अमानित्वादितत्त्वज्ञानार्थदर्शनांतं ज्ञेयं च अ
नादिमत्परं ब्रह्मेत्यादिहृदि सर्वस्याधिष्ठितमित्यंतं च वसिष्ठादिभिर्विस्तरेणोक्तं सर्वमपि मया संक्षेपेणोक्तं एतच्च पूर्वाध्यायोक्तलक्षणो मद्भक्तो विज्ञाय मम
द्भावाय ब्रह्मत्वायोपपद्यते योग्यो भवति १८ तदेवं तत्क्षेत्रं यच्च यादृक्च क्षेत्रं तावत् प्रपंचितं इदानीं तु यद्विकारि यतश्च यत् स च यो यत्प्रभावश्चेत्येतत्पू
र्वप्रतिज्ञातमेव प्रकृतिपुरुषयोः संसारहेतुत्वकथनेन प्रपंचयति प्रकृतिमिति पंचभिः तत्र प्रकृतिपुरुषयोरादिमत्त्वे तयोरपि प्रकृत्यंतरेण भाव्यमित्यन
वस्थापत्तिः स्यात् अतस्तावुभावनादी विद्धि अनादेरीश्वरस्य शक्तित्वात् प्रकृतिरनादिः पुरुषोऽपि तदंशत्वात् अनादिरेव अत एव परमेश्वरस्य तच्छक्ती

इति क्षेत्रं तथा ज्ञानं ज्ञेयं चोक्तं समासतः मद्भक्त एतद्विज्ञाय मद्भावायोपपद्यते १८ प्रकृतिं पुरुषं चैव विद्ध्यनादी उभावपि विकारां
श्च गुणांश्चैव विद्धि प्रकृतिसंभवान् १९ कार्यकारणकर्तृत्वे हेतुः प्रकृतिरुच्यते पुरुषः सुखदुःखानां भोक्तृत्वे हेतुरुच्यते २० ॥

नोचानादित्वनित्यत्वं च श्रीमच्छंकरभगवत्पादैः प्रबंधेनोपपादितमिति नास्माभिः प्रतन्यते विकारांश्च देहेंद्रियादीन् गुणांश्च गुणप्रप
रिणामान् सुखदुःखमोहादीन् प्रकृतेः संभूतान् विद्धि १९ विकाराणां प्रकृतिसंभवत्वं दर्शयन् पुरुषस्य संसारहेतुत्वं दर्शयति कार्येति कार्यं शरीरं कार
णानि सुखदुःखादिसाधनानींद्रियाणि तेषां कर्तृत्वे तदाकारपरिणामे प्रकृतिर्हेतुरुच्यते कपिलादिभिः पुरुषो जीवः तत्कृतसुखदुःखानां भोक्तृत्वे हेतुरु
च्यते अयं भावः यद्यप्यचेतनायाः प्रकृतेः स्वतः कर्तृत्वं न संभवति तथा पुरुषस्याप्यविकारिणो भोक्तृत्वं न संभवति तथापि कर्तृत्वं नाम क्रियानिर्व
र्तकत्वं तच्चाचेतनस्यापि चेतनादृष्टवशात्संभवति यथा वन्हेरूर्द्ध्वज्वलनं वायोस्तिर्यग्गमनं वत्सस्यादृष्टवशात् स्तन्यपयसः क्षरणमित्यादि अतः पु
रुषसन्निधानात् प्रकृतेः कर्तृत्वमुच्यते भोक्तृत्वं च सुखदुःखसंवेदनं तच्चेतनधर्म एवेति प्रकृतिसंनिधानात् पुरुषस्य भोक्तृत्वमुच्यत इति २०

मनोधर्माः अतः क्षेत्रांतःपातित्वेन एव उपलक्षणं चेतनत्संकल्पादीनां तथा च श्रुतिः कामः संकल्पो विचिकित्सा श्रद्धाश्रद्धा धृतिरधृतिर्ह्रीर्धीर्भीरित्येतत्सर्वं मन एव
वेति अनेन च यद्यादृग्गिति प्रतिज्ञाताः क्षेत्रधर्मा दर्शिताः एतत्क्षेत्रं सविकारमिंद्रियादिविकारसहितं संक्षेपेण तुभ्यं मयोक्तमिति क्षेत्रोपसंहारः ६ इदानीमुक्त
लक्षणात्क्षेत्राद्विविक्ततया ज्ञेयं शुद्धं क्षेत्रज्ञं सविस्तरेण वर्णयिष्यन् तज्ज्ञानसाधनान्याह अमानित्वमिति पंचभिः अमानित्वं स्वगुणश्लाघाराहित्यं अदं
भित्वं दंभराहित्यं अहिंसा परपीडावर्जनं क्षांतिः सहिष्णुत्वं आर्जवमवक्रता आचार्योपासनं सद्गुरुसेवा शौचं बाह्यमाभ्यंतरं च तत्र बाह्यं मृज्जलादि
ना आभ्यंतरं च रागादिमलक्षालनं तथा च स्मृतिः शौचं च द्विविधं प्रोक्तं बाह्यमाभ्यंतरं तथा मृज्जलाभ्यां स्मृतं बाह्यं भावशुद्धिस्तथांतरं स्थैर्यं सन्मार्गे प्र

एतत्क्षेत्रं समासेन सविकारमुदाहृतं ६ अमानित्वमदंभित्वमहिंसा क्षांतिरार्जवं आचार्योपासनं शौचं स्थैर्यमात्मविनिग्रहः
७ इंद्रियार्थेषु वैराग्यमनहंकार एव च जन्ममृत्युजराव्याधिदुःखदोषानुदर्शनम् ८ असक्तिरनभिष्वंगः पुत्रदारगृहादिषु नि
त्यं च समचित्तत्वमिष्टानिष्टोपपत्तिषु ९ मयि चानन्ययोगेन भक्तिरव्यभिचारिणी विविक्तदेशसेवित्वमरतिर्जनसंसदि १० ॥

वृत्तस्य तदेकनिष्ठता आत्मविनिग्रहः शरीरसंयमः एतत् ज्ञानमिति प्रोक्तमिति पंचमेनान्वयः ७॥ (अध्यात्मज्ञाननित्यत्वं तत्त्वज्ञानार्थदर्शनं
किंच इंद्रियार्थेष्विति जन्मादिदुःखदोषयोरनुदर्शनं पुनःपुनरालोचनं दुःखरूपस्य दोषस्यांतर्दर्शनमिति वा स्पष्टमन्यत् ८ किंच असक्तिरिति अ
सक्तिः पुत्रादिपदार्थेषु प्रीतित्यागः अनभिष्वंगः पुत्रादीनां सुखे च दुःखे चाहमेव सुखी दुःखी चेत्यध्यासातिरेकाभावः इष्टानिष्टयोरुपपत्तिषु प्राप्ति
षु नित्यं सर्वदा समचित्तत्वं ९ किंच मयि चेति मयि परमेश्वरे अनन्ययोगेन सर्वात्मदृष्ट्या अव्यभिचारिणी एकांतभक्तिः विविक्तः शुद्धः चित्तप्रसाद
करः तद्देशसेवित्वं शीलं यस्य तस्य भावस्तत्त्वं प्राकृतानां जनानां संसदि सभायामरतिरप्रीतिः १० किंच अध्यात्मेति आत्मानमधिकृत्य वर्तमानं ज्ञानमध्या

अतिमंदाधिकारिणांनिस्तारोपायमाह अन्यइति अन्येतुसांख्ययोगादिमार्गेणैवंभूतमुपद्रष्टृत्वादिलक्षणमात्मानंसाक्षात्कर्तुमजानंतः अन्येभ्यः
आचार्येभ्यउपदेशेनश्रुत्वाउपासतेध्यायंतितेच श्रद्धयाउपदेशश्रवणपरायणाः संतोमृत्युंसंसारंशनैरतितरंत्येव २५ तत्रकर्मयोगस्यतृतीयचतुर्थ
पंचमेषुप्रपंचितत्वात्ध्यानस्ययोगस्यचषष्ठाष्टमयोः प्रपंचितत्वात्ध्यानादेश्चसांख्यविविक्तात्मविषयत्वात्सांख्यमेवप्रपंचयन्नाह यावदिति
यावत्समाप्तिः यावत्किंचिद्वस्तुमात्रस्यसत्वमुपपद्यते तत्सर्वंक्षेत्रक्षेत्रज्ञयोर्योगादविवेककृतात्तादात्म्याभ्यासाद्भवतीतिविद्धिजानीहि २६ अविवे
ककृतंसंसारोद्भवमुक्त्वातन्निवृत्तयेविविक्तात्मविषयंसम्यग्दर्शनमाहसममितिस्थावरजंगमात्मकेषुभूतेषुनिर्विशेषंसद्रूपेणसमंयथाभवति

अन्येत्वेवमजानंतः श्रुत्वान्येभ्यउपासते तेपिचातितरंत्येवमृत्युंश्रुतिपरायणाः २५ यावत्संजायतेकिंचित्सत्वंस्थावरजंगमं
क्षेत्रक्षेत्रज्ञसंयोगात्तद्विद्धिभरतर्षभ २६ समंसर्वेषुभूतेषुतिष्ठंतंपरमेश्वरं विनश्यत्स्वविनश्यंतंयः पश्यतिसपश्यति २७
समंपश्यन्हिसर्वत्रसमवस्थितमीश्वरं नहिनस्त्यात्मनात्मानंततोयातिपरांगतिं २८ प्रकृत्यैवचकर्माणिक्रियमाणानिसर्वं

एवंतिष्ठंतंपरमात्मानंयः पश्यति अतएवतेषुविनश्यत्स्वपि अविनश्यंतंयः पश्यतिसएवसम्यक्पश्यतिनान्यः २७ कुतइत्यतआहसममिति
सर्वत्रभूतमात्रेसमंसम्यक् अप्रच्युतस्वरूपेणवस्थितंपरमात्मानंपश्यन्हियस्मात् आत्मनास्वेनैवात्मानंनहिनस्ति अविद्ययासच्चिदानंदरूप
मात्मानंतिरस्कृत्यनविनाशयति ततश्चपरांगतिंमोक्षंप्राप्नोति यस्त्वेवंनपश्यतिसहिदेहात्मदर्शीदेहेनसहात्मानंहिनस्तितथाचश्रुतिः असू
र्यानामतेलोकाअंधेनतमसावृताः तांस्तेप्रेत्यापिगच्छंतियेकेचात्महनोजनाइति २८ ननुशुभाशुभकर्मकर्तृत्वेनवैषम्येदृश्यमानेकथमा ६५

त्याप्यंवयाह प्रकृत्येति प्रकृत्यैव देहेंद्रियाकारेण परिणतया सर्वशः सर्वैः प्रकारैः क्रियमाणानि कर्म्माणि यः पश्यति तथात्मानं चाकर्त्तारं देहाभिमानेनैवा
त्मनः कर्तृत्वं न स्वतः इत्येवं यः पश्यति स एव सम्यक् पश्यति नान्य इत्यर्थः २९ इदानीं तु भूतानां प्रकृतितादात्म्यात्त्वेनाभेदात् भूतभेदकृतमप्यात्मनो भे
दमपश्यन् ब्रह्मत्वमुपैति इति आह यदेति यदा भूतानां स्थावरजंगमानां पृथग्भावं भेदं पृथक्त्वं एकस्थं एकस्यामेवेश्वरशक्तिरूपायां प्रकृतौ स्थि
तं प्रलये अनुपश्यति आलोचयति तत एव च तस्या एव प्रकृतेः सकाशात् भूतानां विस्तारं सृष्टिसमये अनुपश्यति तदा प्रकृतितादात्म्यात्रत्वेन भू
तानामप्यभेदं पश्यन् परिपूर्णं ब्रह्म संपद्यते ब्रह्मैव भवतीत्यर्थः ३० तथापि परमेश्वरस्य संसारावस्थायां देहसंबंधनिमित्तैः कर्म्मभिस्तत्फलैश्च सु

यः पश्यति तथात्मानमकर्तारं स पश्यति २९ यदा भूतपृथग्भावमेकस्थमनुपश्यति तत एव च विस्तारं ब्रह्म संपद्यते तदा ३०
अनादित्वान्निर्गुणत्वात्परमात्मायमव्ययः शरीरस्थोऽपि कौंतेय न करोति न लिप्यते ३१ यथा सर्वगतं सौक्ष्म्यादाकाशं नोपलि
प्यते सर्वत्रावस्थितो देहे तथात्मा नोपलिप्यते ३२ यथा प्रकाशयत्येकः कृत्स्नं लोकमिमं रविः क्षेत्रं क्षेत्री तथा कृत्स्नं प्रकाशयति

खदुःखादिभिश्च वैषम्यं दुःपरिहरमिति कुतः समदर्शनं तत्राह अनादित्वादिति यदुत्पत्तिमत्तदेव व्येति विनाशमेति यच्च गुणवत्तस्य गुणना
शे व्ययो भवति अयं तु परमात्मा अनादिर्निर्गुणश्चातोऽव्ययः अविकारीत्यर्थः तस्माच्छरीरस्थितोऽपि किंचिन्न करोति न च कर्म्मफलैर्लिप्यते ३१ त
त्र दृष्टांतमाह यथेति यथा सर्वत्र पंकादिष्वपि स्थितमाकाशं सौक्ष्म्यादसंगत्वात् पंकादिभिर्नोपलिप्यते तथा सर्वत्र उत्तमे अधमे वा देहे अवस्थि
तोऽप्यात्मा नोपलिप्यते दैहिकैर्गुणदोषैर्न युज्यत इत्यर्थः ३२ असंगत्वात् अलेपो नास्तीत्याकाशदृष्टांतेनोक्तम् प्रकाशकत्वाच्च अप्रकाशधर्म्मैर्न यु

अध्यायार्थमुपसंहरति क्षेत्रक्षेत्रज्ञयोरिति एवमुक्तप्रकारेण क्षेत्रक्षेत्रज्ञयोरंतरं भेदं विवेकज्ञानलक्षणेन चक्षुषा ये विदुः तथा च ये यमुक्ताभूता
नां प्रकृतिस्तस्याः सकाशान्मोक्षोपायं ध्यानादिकं च ये विदुः ते परं पदं यांति ३४ विविक्तौ येन तत्वेन मिश्रौ प्रकृतिपूरुषौ तं वंदे परमानन्दं नंदनंदनमीश्वर
म् १ इति श्रीसुबोधिन्यां टीकायां त्रयोदशोऽध्यायः १३ ॐ पुंप्रकृत्योः स्वतन्त्रत्ववारयन्गुणसंगतः प्राह संसारवैचित्र्यं विस्तरेण चतुर्दशे १ यावत्सं
जायते किंचित्सत्वं स्थावरजंगमं क्षेत्रक्षेत्रज्ञसंयोगात्तद्विद्धि भरतर्षभेत्युक्तं स च क्षेत्रक्षेत्रज्ञयोः संयोगो निरीश्वरसांख्यानामिव न स्वातंत्र्येण

क्षेत्रक्षेत्रज्ञयोरेवमंतरं ज्ञानचक्षुषा भूतप्रकृतिमोक्षं च ये विदुर्यांति ते परम् ३४ इति श्रीभगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां यो
गशास्त्रे श्रीकृष्णार्जुनसंवादे क्षेत्रक्षेत्रज्ञयोगो नाम त्रयोदशोऽध्यायः १३ श्रीभगवानुवाच परं भूयः प्रवक्ष्यामि ज्ञानानां ज्ञानमुत्त
मं यज्ज्ञात्वा मुनयः सर्वे परां सिद्धिमितो गताः १ इदं ज्ञानमुपाश्रित्य मम साधर्म्यमागताः सर्गेपि नोपजायंते प्रलये न व्यथंति च २॥

किंत्वीश्वरेच्छयैवेति कथनपूर्वकं कारणं गुणसंगोस्य सदसद्योनिजन्मस्वित्यनेनोक्तं सत्वादिगुणकृतं संसारवैचित्र्यं प्रपंचयिष्यन् एवंभूतं वक्ष्यमाण
र्थं स्तौति श्रीभगवानुवाच परमिति द्वाभ्यां परं परमार्थनिष्ठं ज्ञायते अनेनेति ज्ञानमुपदेशं भूयोपि तुभ्यं प्रकर्षेण वक्ष्यामि कथं भूतं ज्ञानानां तपः क
र्मादिविषयाणां मध्ये उत्तमं मोक्षहेतुत्वात् तदेवाह यत् ज्ञात्वा प्राप्य मुनयो मननशीलाः सर्वे इतो देहबंधनात् परां सिद्धिं प्राप्ताः १ किंच इदमिति
इदं वक्ष्यमाणं ज्ञानमुपाश्रित्य इदं ज्ञानसाधनमनुष्ठाय मम साधर्म्यं मद्रूपं प्राप्ताः संतः सर्गेपि ब्रह्मादिषु उत्पद्यमानेष्वपि नोत्पद्यंते तथा प्रलयेपि
न व्यथंति प्रलयदुःखानि नानुभवंति न पुनरावर्तंत इत्यर्थः २॥

तथाप्यविकारिणो जन्मरहितस्य च भोक्तृत्वं कथमित्यत आह पुरुष इति हि यस्मात्प्रकृतिस्थः तत्कार्ये देहे तादात्म्येन स्थितः पुरुषः अतस्तज्जनितान्सु
खादीन्भुंक्ते अस्य च पुरुषस्य सतीषु देवादियोनिषु असतीषु तिर्यगादियोनिषु यानि जन्मानि तेषु गुणसंगः शुभाशुभकर्मकारिभिरिंद्रियैः संगः कार
णमित्यर्थः २१ तदनेन प्रकारेण प्रकृत्यविवेकात् पुरुषस्य संसारः न तु स्वरूपत इत्याशयेन तस्य स्वरूपमाह उपद्रष्टेति अस्मिन्प्रकृतिकार्ये देहे वर्त्तमा
नोपि पुरुषः परः भिन्न एव तद्गुणैर्युज्यत इत्यर्थः तत्र हेतवः यस्मादुपद्रष्टा पृथग्भूत एव समीपे स्थितत्वात् द्रष्टा साक्षी इत्यर्थः यथा गमने हंसासी द्रष्टे
वमिति तथा अनुमंता अनुमोदिता एव सन्निधिमात्रेणानुग्राहकः साक्षी चेता केवलो निर्गुणश्चेत्यादिश्रुतेः तथा ऐश्वर्येण रूपेण भर्त्ता विधार

पुरुषः प्रकृतिस्थो हि भुंक्ते प्रकृतिजान्गुणान् कारणं गुणसंगोस्य सदसद्योनिजन्मसु २१ उपद्रष्टानमंता च भर्त्ता भोक्ता महेश्वरः॥
परमात्मेति चाप्युक्तो देहेस्मिन्पुरुषः परः २२ य एवं वेत्ति पुरुषं प्रकृतिं च गुणैः सह सर्वथा वर्त्तमानोपि न स भूयोभिजायते २३ ध्या
नेनात्मनि पश्यंति केचिदात्मानमात्मना अन्ये सांख्येन योगेन कर्मयोगेन चापरे २४॥

क इति चोक्तः भोक्ता पालक इति च महांश्चा
सावीश्वरश्च सर्वब्रह्मादीनामधिपतिरिति च परमात्मा अंतर्यामीति चोक्तः श्रुत्या तथा च श्रुतिः एष भूताधिपतिरेष लोकेश्वर एष लोकपाल इत्या
दि २२ एवं प्रकृतिपुरुषविवेकज्ञानिनं स्तौति य एवमिति एवमुपद्रष्टृत्वादिरूपेण पुरुषं यो वेत्ति प्रकृतिं च गुणैः सुखदुःखादिपरिणामैः सहितां यो वे
त्ति स पुरुषः सर्वथा विधिमतिलंघ्य इह वर्त्तमानोपि पुनर्नाभिजायते मुच्यत एवेत्यर्थः २३ एवंभूतविविक्तात्मज्ञाने साधनविकल्पानाह ध्यानेनेति
द्वाभ्यां ध्यानेनात्माकारप्रत्ययावृत्त्या आत्मनि देहे आत्मना मनसा एनमात्मानं केचित्पश्यंति अन्ये तु सांख्येन प्रकृतिपुरुषवैलक्षण्यालोचनेन योगे
नाष्टांगेनापरे अपरे च कर्मयोगेन पश्यंतीति सर्वत्रानुषंगः एतेषां च ध्यानादीनां यथायोग्यं क्रमसमुच्चयेपि सति तत्तन्निष्ठाभेदाभिप्रायेण विकल्पोक्तिः

णज्ञानेनचयः संगस्तेनबध्नाति हेअनघनिष्पाप अहंसुखीज्ञानीचेतिमनोधर्मास्तदभिमानिनिक्षेत्रज्ञेसंयोजयंतीत्यर्थः ६ रजसोलक्षणंबंधकत्वं
चाह रजोरागेति रजः संज्ञकंगुणरागात्मकंअनुरंजनरूपंविद्धि अतएवतृष्णासंगसमुद्भवंतृष्णाअप्राप्तेर्थेऽभिलाषःसंगःप्राप्तेर्थेप्रीतिविशेषेणास
क्तिः तयोस्तृष्णासंगयोःसमुद्भवोयस्मात् तद्रजः देहिनंदृष्टादृष्टार्थेषुकर्मसुसंगेनआसक्त्यानिरंतरंबध्नाति तृष्णासंगाभ्यांकर्मसुआसक्तिर्भवति
तमसोलक्षणंबंधकत्वंचाहतमइति तमस्तुअज्ञानाज्जातं आवरणशक्तिप्रधानत्वात्प्रकृत्यंशादुद्भूतंविद्धीत्यर्थःअतः सर्वेषांदेहिनांमोहंभ्रां
तिजनकं अतएवप्रमादेनालस्येननिद्रयाचतत्तमोदेहिनंनिबध्नाति तत्रप्रमादोऽनवधानता आलस्यमनुद्यमः निद्राचित्तस्यावसादः ८ सत्वादीनामेव

रजोरागात्मकंविद्धितृष्णासंगसमुद्भवं तन्निबध्नातिकौंतेयकर्मसंगेनदेहिनं ७ तमस्त्वज्ञानजंविद्धिमोहनंसर्वदेहिनां
प्रमादलस्यनिद्राभिस्तन्निबध्नातिभारत ८ सत्वंसुखेसंजयतिरजः कर्माणिभारत ज्ञानमावृत्यतुतमः प्रमादेसंजयत्युत ९
रजस्तमश्चाभिभूयसत्वंभवतिभारत रजःसत्वंतमश्चैवतमस्सत्वंरजस्तथा १० सर्वद्वारेषुदेहेस्मिन्प्रकाशउपजायते०॥ ५॥

स्वस्वकार्यकारणेसामर्थ्यातिशयमाह सत्वमिति सत्वंसुखेसंजयतिसंश्लेषयतिदुःखशोकादिकारणेसत्यपिसुखाद्यभिमुखमेवदेहिनंकरोती
त्यर्थः एवंसुखादिकारणेसत्यपिरजःकर्मण्येवसंयोजयति तमस्तुसत्संगेनोत्पद्यमानमपिज्ञानमावृत्याछाद्यप्रमादेसंजयति महद्भिरुपदिश्य
मानस्यार्थस्यानवधानेसंयोजयति उत्ताप्यालस्यादावपियोजयतीत्यर्थः ९ तत्रहेतुमाहरजइति रजस्तमश्चेतिगुणद्वयमभिभूयतिरस्कृत्यस
त्वंभवतिअदृष्टवशादुद्भवति ततः स्वकार्यसुखज्ञानादौसंजयतीत्यर्थः एवंरजोपिसत्वंतमश्चगुणद्वयमभिभूयोद्भवति ततश्चकार्येतृष्णाकामा
दौसंजयतिएवंतमोपिसत्वंरजश्चाभिभूयोद्भवति ततश्चस्वकार्यप्रमादालस्यादौसंजयतीत्यर्थः १० इदानींसत्वादीनांवृद्धौनालिंगान्याह त्रिभिःस

सर्वेष्वपिद्वारेषुश्रोत्रादिषुयदाशब्दादिज्ञानात्मकः प्रकाशउत्पद्यते तदाऽनेनप्रकाशलिंगेनसत्त्वंविवृद्धंविद्यात्जानीयात् उतशब्दात् सु।
खादिलिंगेनापिजानीयादित्युक्तंभवति ११ किंच लोभइति लोभोधनागमेबहुधाजायमानेपिपुनःपुनर्वर्द्धमानोभिलाषःप्रवृत्तिर्नित्यंकुर्वद्रूपा।
ताकर्मणामारंभोगृहादिषुकर्मोद्यमःअशमःइदंकृत्वेदंकरिष्यामीत्यादिसंकल्पविकल्पानुपरमःस्पृहाउच्चावचेषुदृष्टमात्रेषुवस्तुष्वितरस्त।
तोजिघृक्षारजसिप्रवृद्धेएतानिलिंगानिजायंते एतैःलिंगैरजोगुणस्यवृद्धिंविद्यादित्यर्थः १२ किंचअप्रकाशइति अप्रकाशोविवेकभ्रंशःअ

ज्ञानंयदातदाविद्याद्विवृद्धंसत्वमित्युत ११ लोभःप्रवृत्तिरारंभःकर्मणामशमःस्पृहा रजस्येतानिजायंतेविवृद्धेभरतर्षभ १२ अप्रकाशोप्रवृत्तिश्चप्रमादोमोहएवच तमस्येतानिजायंतेविवृद्धेकुरुनंदन १३ यदासत्वेप्रवृद्धेतुप्रलयंयातिदेहभृत् तदोत्तमविदांलोकानमलान्प्रतिपद्यते १४ रजसिप्रलयंगत्वाकर्मसंगिषुजायते तथाप्रलीनस्तमसिमूढयोनिषुजायते १५ कर्मणःसुकृतस्याहुःसात्विकंनिर्मलंफलं॥

प्रवृत्तिरनुद्यमःप्रमादःकर्तव्यार्थानुसंधानराहित्यंमोहोमिथ्याभिनिवेशःतमसिप्रवृद्धेएता।
निचिह्नानिजायंते एतैस्तमसोवृद्धिंजानीयात् १३ मरणसमयएववृद्धानांसत्वादीनांफलविशेषमाह यदेतिद्वाभ्यांसत्वेप्रवृद्धेसतियदाजीवो
मृत्युंप्राप्नोति तदाउत्तमान् हिरण्यगर्भादीन् विदंतिउपासतइति उत्तमविदः तेषांये अमलाःप्रकाशमयालोकाः सुखोपभोगस्थानविशेषाः ता
न्प्रतिपद्यतेप्राप्नोति १४ किंचरजसीति रजसिप्रवृद्धेसतिमृत्युंप्राप्यकर्मसंगिषुकर्मासक्तेषुमनुष्येषुजायतेतथातमसिप्रवृद्धेसति
प्रलीनःमृतःमूढयोनिषुपश्वादियोनिषुजायते १५ इदानींसत्वादीनांस्वानुरूपकर्मद्वारेणविचित्रफलहेतुत्वमाह कर्मणइतिसु।

कृतस्यसात्विकस्यकर्मणः सात्विकंसत्वप्रधानंनिर्मलंप्रकाशबहुलंसुखंफलमाहुः कपिलादयः रजसइतिराजसस्यकर्मणइत्यर्थः कर्मफलकथनस्यप्रकृतत्वात् तस्यदुःखंफलमाहुःतमसइतितामसस्यकर्मणइत्यर्थः तस्याज्ञानंमूढत्वंचफलमाहुःसात्विकादिकर्मलक्षणं। चनियतंसंगरहितमित्यादिनाष्टादशाध्यायेवक्ष्यति १६ तत्रैवहेतुमाह सत्वादिति सत्वाज्ज्ञानंसंजायतेअतःसात्विकस्यकर्मणःप्रकाशबहुलंसुखंफलंभवति रजसोलोभोजायतेतस्यचदुःखहेतुत्वात् तत्पूर्वकस्यकर्मणोदुःखंफलंभवति तमसस्तुप्रमादमोहाज्ञानानिभवंतिततस्तामसस्यकर्मणःअज्ञानप्रापकंफलंभवतीतियुक्तमेवेत्यर्थः १७ इदानींसत्वादिवृत्तशीलानांफलमाहऊर्द्धमिति सत्वस्थाःसत्ववृत्त

रजसस्तुफलंदुःखमज्ञानंतमसःफलं १६ सत्वात्संजायतेज्ञानंरजसोलोभएवच प्रमादमोहौतमसोभवतोज्ञानमेवच १७ ऊर्द्धंगच्छंतिसत्वस्थामध्येतिष्ठंतिराजसाः जघन्यगुणवृत्तस्थाअधोगच्छंतितामसाः १८ नान्यंगुणेभ्यःकर्तारं यदाद्रष्टानुपश्यति गुणेभ्यश्चपरंवेत्तिमद्भावंसोधिगच्छति १९॥

यःप्रधानाऊर्द्धंगच्छंतिसत्वोत्कर्षतारतम्यादुत्तरोत्तरशतगुणानंदान्मनुष्यगंधर्वपितृदेवतादिलोकान्सत्यलोकपर्यंतानाप्नुवंतीत्यर्थः राजसास्तुतृष्णाद्याकुलामध्येतिष्ठंतिमनुष्यलोकएवोत्पद्यंते जघन्योनिकृष्टोयस्तमोगुणस्तस्यवृत्तंप्रमादमोहादितत्रस्थिताःअधोगच्छंति तमोवृत्तितारतम्यात् तमिस्रादिषुनिरयेषूत्पद्यंते १८ तदेवंप्रकृतिगुणसंगकृतंसारस्यप्रपंचमुक्त्वाइदानींतद्विवेकतोमोक्षंदर्शयति नान्यमिति यदातुद्रष्टाविवेकीभूत्वाबुद्ध्याद्यहंकारपरिणतेभ्योगुणेभ्योन्यंकर्तारं नानुपश्यति अपितुगुणाएवकर्माणिकुर्वंतीतिपश्यतिगुणेभ्यश्चपरंव्यतिरिक्तंतत्साक्षिणमात्मानंवेत्तिसतुमद्भावंब्रह्मत्व

तदेवं प्रशंसया श्रोतारमभिमुखीकृत्य परमेश्वराधीनयोः प्रकृतिपुरुषयोः सर्वभूतोत्पत्तिं प्रति हेतुत्वं न स्वतंत्रयोरिती ममर्थं विवक्षितमर्थं कथयति ममेति द्वाभ्यां। मम स्वभूता मदीया माया त्रिगुणात्मिका प्रकृतिर्योनिः सर्वभूतानां कारणं सर्वकार्येभ्यो महत्त्वाद्भरणाच्च स्वविकाराणां ब्रह्मेति योनिरेव विशेष्यते। तस्मिन्महति ब्रह्मणि योनौ गर्भं हिरण्यगर्भस्य जन्मनो बीजं सर्वभूतजन्मकारणं बीजं दधामि निक्षिपामि क्षेत्रक्षेत्रज्ञप्रकृतिद्वयशक्तिमानीश्वरोऽहम्। अविद्याकामकर्मोपाधिस्वरूपानुविधायिनं क्षेत्रज्ञं क्षेत्रेण संयोजयामीत्यर्थः। संभव उत्पत्तिः सर्वभूतानां हिरण्यगर्भोत्पत्तिद्वारेण ततस्तस्माद्गर्भाधानाद्भवति हे भारत ३ न केवलं सृष्ट्युपक्रम एव मदधिष्ठिताभ्यां प्रकृतिपुरुषाभ्यामयं भूतोत्पत्तिप्रकारः अपि तु सर्वदैवेत्याह सर्वयोनिष्विति सर्वासु योनिषु मनुष्यादियोनिषु या मूर्तयः स्थावरजंगमात्मिका उत्पद्यं॥

मम योनिर्महद्ब्रह्म तस्मिन्गर्भं दधाम्यहं संभवः सर्वभूतानां ततो भवति भारत ३ सर्वयोनिषु कौंतेय मूर्तयः संभवंति याः
तासां ब्रह्म महद्योनिरहं बीजप्रदः पिता ४ सत्त्वं रजस्तम इति गुणाः प्रकृतिसंभवाः निबध्नंति महाबाहो देहे देहिनमव्ययं ५
तत्र सत्त्वं निर्मलत्वात्प्रकाशकमनामयं सुखसंगेन बध्नाति ज्ञानसंगेन चानघ ६॥ एतेनासां मूर्तीनां महद्ब्रह्म प्रकृतिर्योनिर्मातृस्थानीया अहं च बीजप्रदो गर्भाधानादिकर्ता पिता ४ तदेवं परमेश्वराधीनाभ्यां प्रकृतिपुरुषाभ्यां सर्वभूतोत्पत्तिनिरूप्य इदानीं प्रकृतिसंयोगेन पुरुषस्य संसारं प्रपंचयति सत्त्वमित्यादिचतुर्दशभिः सत्त्वमिति सत्त्वं रजस्तम इति एवं संज्ञकाः त्रयो गुणाः प्रकृतिसंभवाः प्रकृतितः संभव उद्भवो येषां ते तथोक्ताः गुणसाम्यं प्रकृतिस्तस्याः सकाशात्पृथक्त्वेनाभिव्यक्ताः संतः प्रकृतिकार्ये देहे तादात्म्येन स्थितं देहिनं चिदंशं वस्तुतः अव्ययं निर्विकारमेव संतं निबध्नंति स्वकार्यैः सुखदुःखमोहादिभिः संयोजयंतीत्यर्थः ५ तत्र सत्त्वस्य लक्षणं बंधकत्वप्रकारं चाह तत्रेति तत्र तेषां गुणानां मध्ये सत्त्वं निर्मलत्वात्स्वच्छत्वात्स्फटिकमणिरिव प्रकाशकं भास्वरं अनामयं निरुपद्रवं शांतमित्यर्थः अतः शांतत्वात्स्वकार्येण सुखेन यः सं

समदुःखेति समेदुःखसुखेयस्ययतः स्वस्यस्वरूपएवस्थितः अतएवसमानिलोष्टाश्मकांचनानियस्यतुल्येप्रियाप्रियेसुखदुःखहेतुभू।
तेयस्यसः धीरोधीमान्तुल्येनिंदाआत्मसंस्तुति श्चयस्यसविवेकिभिर्गुणातीतउच्यते २४ अपिचमानापमानयोरिति मानेचापमानेचतुल्यःमि
त्रपक्षेअरिपक्षेचतुल्यः सर्वान्दृष्टादृष्टार्थान् आरंभान्उद्यमान्परित्यक्तुंशीलंयस्यसएवंभूताचारयुक्तोगुणातीतउच्यते २५ कथंचैतान्
गुणान् अतिवर्ततइत्यस्यप्रश्नस्योत्तरमाह मांचेति चशब्दोवधारणार्थः मामेवपरमेश्वरंश्रीनारायणं अव्यभिचारेणैकांतभक्तियोगेनयः।

समदुःखसुखः स्वस्थः समलोष्टाश्मकांचनः तुल्यप्रियाप्रियोधीरस्तुल्यनिंदात्मसंस्तुतिः २४ मानापमानयोस्तुल्यस्तु
ल्योमित्रारिपक्षयोः सर्वारंभपरित्यागीगुणातीतःसउच्यते २५ मांचयोव्यभिचारेणभक्तियोगेनसेवते सगुणान्समतीत्यै
तान्ब्रह्मभूयायकल्पते २६ ब्रह्मणोहिप्रतिष्ठाहममृतस्याव्ययस्यच शाश्वतस्यचधर्मस्यसुखस्यैकांतिकस्यच २७ इ
तिश्रीभगवद्गीतासूपनिषत्सुब्रह्मविद्यायांयोगशास्त्रेश्रीकृष्णार्जुनसंवादेगुणातीतयोगोनामचतुर्दशोऽध्यायः १४॥

सेवतेसएतान्गुणान्समतीत्यसम्यगतिक्रम्यब्रह्मभूयायब्रह्मभावायकल्पतेयोग्योभवति २६ तत्रहेतुमाहब्रह्मणइतिहियस्मात्।
ब्रह्मणोहंप्रतिष्ठाप्रतिमाघनीभूतंब्रह्मैवाहं यथाघनीभूतःप्रकाशएवसूर्यमंडलंतद्वदेवेत्यर्थःतथाअव्ययस्यनित्यस्यअमृतस्यमोक्षस्य राम
चनित्यमुक्तत्वात्तथातत्साधनस्यशाश्वतस्यशुद्धसत्वात्मकत्वात् एकांतिकस्याखंडितस्यसुखस्यचप्रतिष्ठाहंपरमानंदैकरूपत्वात् अतोम। ६९
त्सेविनोमद्भावस्यावश्यंभावित्वात् युक्तमेवोक्तंब्रह्मभूयायकल्पतइत्यर्थः २७ कृष्णाधीनगुणासंगप्रसंजितभवांबुधिंसुखंतरतितद्भक्तइत्यभा

वैराग्येण विना ज्ञानं न च भक्तिरतः स्फुटं वैराग्योपस्कृतं ज्ञानमीशः पंचदशेदिशत् १ पूर्वाध्यायांते मां च योव्यभिचारेण भक्तियोगेन सेवते इत्या
दिना परमेश्वरमेकांतभक्त्या भजतस्तत्प्रसादात् लब्धज्ञानेन ब्रह्मभावो भवतीत्युक्तं न चैकांतभक्तिर्ज्ञानं चाविरक्तस्य संभवतीति वैराग्यपूर्वकं ज्ञानमुपदेष्टुका
मः प्रथमं तावत्सार्द्धश्लोकाभ्यां संसारस्वरूपं वृक्षरूपकालंकारेण वर्णयन् श्रीभगवानुवाच ऊर्द्ध्वमिति ऊर्द्ध्वमुत्तमः क्षराक्षराभ्यामुत्कृष्टः पुरुषोत्तमो मूलं यस्य
तं अध इति ततोर्वाचीनाः कार्योपाधयो हिरण्यगर्भादयो गृह्यंते ते तु शाखा इव शाखा यस्य तं विनश्वरत्वेन श्वः प्रभातपर्यंतमपि न स्थास्यतीति विश्वासा
नर्हत्वात् अश्वत्थं प्राहुः प्रवाहरूपेणाविच्छेदात् अव्ययं प्राहुः ऊर्द्ध्वमूलोर्वाक्शाख एषोश्वत्थः सनातन इत्याद्याः श्रुतयः छंदांसि वेदाः यस्य पर्णानि धर्माध
र्मप्रतिपादनद्वारेण छायास्थानीयैः कर्मफलैः संसारवृक्षस्य सर्वजीवाश्रयणीयत्वप्रतिपादनात्पर्णस्थानीया वेदाः यस्तमेवंभूतमश्वत्थं वेद स एव वेद

श्रीभगवानुवाच ऊर्द्ध्वमूलमधःशाखमश्वत्थं प्राहुरव्ययं छंदांसि यस्य पर्णानि यस्तं वेद स वेदवित् १ अधश्चोर्द्ध्वं प्रसृता।
स्तस्य शाखा गुणप्रवृद्धा विषयप्रवालाः ॥ ॥

र्थवित् संसारवृक्षस्य मूलमीश्वरः श्रीनारायणः ब्रह्मादयस्तदंशाः शाखास्थानी
याः स च संसारवृक्षो विनश्वरः प्रवाहरूपेण नित्यश्च वेदोक्तैः कर्मभिः सेव्यतामापादितश्च इत्येतावानेव हि वेदार्थः अत एवं विद्वान् वेदविदिति।
स्तूयते १ किंच अध इति हिरण्यगर्भादयः कार्योपाधयो जीवाः शाखास्थानीयत्वेनोक्ताः तेषु च ये दुष्कृतिनः ते अधः पश्वादियोनिषु प्रसृता वि
स्तारं गताः सुकृतिनः ऊर्द्ध्वं देवादियोनिषु प्रसृताः तस्य संसारवृक्षस्य शाखाः किंच गुणैः सत्वादिवृत्तिभिर्जलसेचनैरिव यथायथं प्रवृद्धिं प्राप्ताः
किंच विषया रूपादयः प्रवालाः पल्लवस्थानीयाः यासां ताः शाखास्थानीयाभिरिंद्रियवृत्तिभिः संयुक्तत्वात् किंच अधश्च मूलानीति चशब्दा
त् ऊर्द्ध्वं च मूलानि आनुसंततानि विरूढानि मुख्यं मूलं ईश्वर एक एव इमानि तु अवांतरमूलानि तत्तद्भोगवासनालक्षणानि तेषां का० ॥ ॥

र्थमाह मनुष्यलोके कर्मानुवंधीनि कर्मानुवंधः अ नंतरंभाविर्येषां तानि ऊर्द्ध्वाधोलोकेषूपभुक्तं ततद्भोगवासनाभिर्हि कर्मक्षये मनुष्यलोके
प्राप्तानां तत्तदनुरूपेषु कर्मसु प्रवृत्तिर्भवति तस्मिन्नेव हि कर्माधिकारः नान्येषु लोकेषु ततो मनुष्यलोक इत्युक्तं २ किंच न रूपमस्येति इह संसारे स्थितैः
प्राणिभिरस्य संसारवृक्षस्य तथा ऊर्द्ध्वमूलत्वादिप्रकारेण रूपं नोपलभ्यते न चांतः अवसानमनंतत्वात् न चादिः अनादित्वात् न च संप्रतिष्ठा स्थितिः
कथं तिष्ठतीति नोपलभ्यते यस्मादेवंभूतत्वादयं संसारवृक्षो दुश्छेद्यः अनर्थकरश्च तस्मादेनं दृढेन वैराग्येण छित्वा तत्त्वज्ञानेच्छेनेत्याह अ
श्वत्थमिति सार्द्धेन एनमश्वत्थं सुविरूढमूलं अत्यंतवद्धमूलं संतं असंगः संगराहित्यं अहंताममतात्याग स्तेन शस्त्रेण दृढेन सम्यग्विचारस्वता

अधश्च मूलान्यनुसंततानि कर्मानुवंधीनि मनुष्यलोके २ न रूपमस्येह तथोपलभ्यते नांतो न चादिर्न च संप्रतिष्ठा अश्वत्थ
मेनं सुविरूढमूलमसंगशस्त्रेण दृढेन छित्वा ३ ततः पदं तत्परिमार्गितव्यं यस्मिन्गता न निवर्तंति भूयः तमेव चाद्यं पुरुषं प्रपद्ये यतः
प्रवृत्तिः प्रसृता पुराणी ४ निर्मानमोहा जितसंगदोषा अध्यात्मनित्या विनिवृत्तकामाः॥ १ छित्वा पृथक्कृत्य ३ ततस्तस्य मूलभूतं तत्पदं व
स्तु वैष्णवं परं परिमार्गितव्यमन्वेष्टव्यं कीदृशं यस्मिन्गताः प्राप्ताः संतो भूयो न निवर्तंते नावर्तंत इत्यर्थः अन्वेषणप्रकारमेवाह यतः
एषा पुराणी चिरंतनी संसारप्रवृत्तिः प्रसृता विस्तृता तमेव आद्यं पुरुषं प्रपद्ये शरणं व्रजामि इत्येवमेकांतभक्त्या अन्वेष्टव्यमित्यर्थः ४ तत्प्रा
प्तिसाधनानां तराणि दर्शयन्नाह निर्मानमोहा इति निर्गतौ मानमोहौ अहंकारमिथ्याभिनिवेशौ येभ्यस्ते निर्मानमोहाः जितः पुत्रादिसंगरूपो दोषो यै
स्ते जितसंगदोषाः अध्यात्मे आत्मज्ञाने नित्याः परिनिष्ठिता अध्यात्मनित्याः विशेषेण निवृत्ताः कामा येभ्यस्ते विनिवृत्तकामाः सुखदुःखहेतुभूतत्वात् सुखदु

ततश्च गुणात्क्रमन सर्वानर्थनिवृत्त्या कृतार्थो भवतीत्याह गुणानिति देहाकारः समुद्भवः परिणामो येषां ते देहसमुद्भवाः तान् एतान्त्रीनपि गुणान् अतीत्यातिक्रम्य तत्कृतैर्जन्मादिभिर्मुक्तः सन् अमृतं ब्रह्मानंदं प्राप्नोति २० गुणानेतानतीत्यामृतमश्नुत इत्येतच्छ्रुत्वा गुणातीतस्य लक्षणमाचारं च गुणात्ययोपायं च सम्यक् बुभुत्सुरर्जुन उवाच कैरिति हे प्रभो कैर्लिंगैः कीदृशैरात्मन्युत्पन्नैश्चिन्हैर्गुणातीतो देही भवतीति लक्षणप्रश्नः क आचारः अस्येति किमाचारः कथं वर्तत इत्यर्थः कथं च केनोपायेनैतान्त्रीनपि गुणानतीत्य वर्तते तत्कथयेति स्थितप्रज्ञस्य का भाषेत्यादिना द्वितीयाध्याये पृष्टमपि दत्तोत्तरमपि पुनर्विशेषं बुभुत्सया पृच्छतीति ज्ञातव्यं प्रकारांतरेण चास्य लक्षणादिकं श्रीभगवानुवाच प्रकाशं चेत्या

गुणानेतानतीत्य त्रीन्देही देहसमुद्भवान् जन्ममृत्युजरादुःखैर्विमुक्तोऽमृतमश्नुते २० अर्जुन उवाच कैर्लिंगैस्त्रीन्गु
णानेतानतीतो भवति प्रभो किमाचारः कथं चैतांस्त्रीन्गुणानतिवर्तते २१ श्रीभगवानुवाच प्रकाशं च प्रवृत्तिं च मोहमेव च पांड
व न द्वेष्टि संप्रवृत्तानि न निवृत्तानि कांक्षति २२ उदासीनवदासीनो गुणैर्यो न विचाल्यते गुणा वर्तंत इत्येवं योऽवतिष्ठति नेंगते

दिषड्भिः तत्र केन लक्षणमाह प्रकाशं चेति प्रकाशं च सर्वद्वारेषु देहेऽस्मिन्निति पूर्वोक्तं सत्वकार्यं प्रवृत्तिं च रजः कार्यं मोहं च तमः कार्यमुपलक्षणमेतत् सत्वादीनां सर्वाण्यपि कार्याणि यथायथं संप्रवृत्तानि स्वतः प्राप्तानि संविदुः खबुद्ध्या यो न द्वेष्टि निवृत्तानि च संगतियो न कांक्षति गुणातीतः स उच्यत इति चतुर्थेनान्वयः २२ तदेवं स्वसंवेद्यं तस्य लक्षणमुक्त्वा परसंवेद्यं तस्य लक्षणं वक्तुं किमाचार इति द्वितीयप्रश्नोत्तरमाह उदासीनवदिति त्रिभिः उदासीनवत् साक्षितया आसीनः स्थितः सन् गुणैः गुणकार्यैः सुखदुःखादिभिर्यो न विचाल्यते स्वरूपतो न प्रचाल्यते अपितु गुणा एव स्वकार्येषु प्रवर्तंते एतैर्मम संबंध एव नास्तीति विवेकज्ञानेन यस्तूष्णीमवतिष्ठति परस्मै पदमार्षं नेंगते न च

ह्णेदृष्टांतः आशयात् स्वस्थानात् कुसुमादेः सकाशात् गंधान् गंधवतः सूक्ष्मान् अंशान् गृहीत्वा यथा वायुर्गच्छति तद्वत् ८ तान्येवेंद्रियाणि दर्शयन् यदर्थं गृहीत्वा गच्छति तदाह श्रोत्रमिति श्रोत्रादीनि बाह्येंद्रियाणि मनश्चांतःकरणमधिष्ठाय आश्रित्य शब्दादीन् विषयान् अयं जीवः उपभुंक्ते ९ न भानु च कार्यकारणसंघातव्यतिरेकेण एवंभूतमात्मानं सर्वेपि किं न पश्यंतीति तत्राह उत्क्रामंतमिति उत्क्रामंतं देहात् देहांतरं गच्छंतं तस्मिन्नेव देहे स्थितं वा विषयान् भुंजानं वा गुणान्वितं इंद्रियादियुक्तं जीवं विमूढा नानुपश्यंति नावलोकयंति ज्ञानमेव चक्षुर्येषां ते ज्ञानचक्षुषो विवेकिनस्ते पश्यंति १० दुर्ज्ञेयश्चायं यतो विवेकिष्वपि केचिदेव पश्यंति केचिन्न पश्यंतीत्याह यतंत इति यतंतो ध्यानादिभिः प्रयतमानाः योगिनः केचिदेनमात्म

गृहीत्वैतानि संयाति वायुर्गंधानिवाशयात् ८ श्रोत्रं चक्षुः स्पर्शनं च रसनं घ्राणमेव च अधिष्ठाय मनश्चायं विषयानुप।
सेवते ९ उत्क्रामंतं स्थितं वापि भुंजानं वा गुणान्वितं विमूढा नानुपश्यंति पश्यंति ज्ञानचक्षुषः १० यतंतो योगिनश्चैनं पश्यंत्या
त्मन्यवस्थितं यतंतोप्यकृतात्मानो नैनं पश्यंत्यचेतसः ११ यदादित्यगतं तेजो जगद्भासयतेखिलं यच्चंद्रमसि यच्चाग्नौ तत्तेजो विद्धि
मामकं १२ गामाविश्य च भूतानि धारयाम्यहमोजसा पुष्णामि चौषधीः सर्वाः सोमो भूत्वा रसात्मकः १३॥ एनं आत्मनि देहे अवस्थितं विवि

क्तं पश्यंति शास्त्राभ्यासादिभिर्यत्नं कुर्वाणा अपि अकृतात्मानः अविशुद्धचित्ताः अत एवाचेतसो मंदमतयः एनं न पश्यंति ११ तदेवं तद्भासयते सूर्य इत्यनेन पारमेश्वरं धामोक्तं तत्प्राप्तानां चापुनरावृत्तिरुक्ता तत्र संसारिणोऽभावमाशंक्य संसारिस्वरूपं देहादिव्यतिरिक्तं दर्शितं इदानीं तदेव पारमेश्वरं रूपमनंतशक्तित्वेन निरूपयति यदादित्येति चतुर्भिः आदित्यादिषु स्थितं यदनेकप्रकारं तेजो विश्वं प्रकाशयति तत्सर्वं तेजो मदीयमेव जानीहि १२ किं च गामिति गां पृथ्वीमोजसा बलेनाधिष्ठायाहमेव चराचराणि भूतानि धारयामि अहमेव समयः सोमो भूत्वा व्रीह्याद्यौषधीः संवर्द्धयामि

किंच अहमिति वैश्वानरो जाठरोऽग्निर्भूत्वा प्राणिनां देहस्यांतः प्रविश्य प्राणापानाभ्यां तदुद्दीपकाभ्यां सहितः प्राणिनां भुक्तं भक्ष्यं भोज्यं लेह्यं चोष्यं चेति चतुर्विधमन्नं पचामि तत्र यद्दंतैरवखंड्यावखंड्य भक्ष्यते अपूपादि तत् भक्ष्यं यत्तु केवलं जिह्वया विलोड्य निगीर्यते पायसादि तद्भोज्यं यत्तु जिह्वायां निःक्षिप्य रसास्वादनेन निगीर्यते यद्द्रवीभूतं गुडादि तल्लेह्यं यत्तु दंष्ट्राभिर्निष्पीड्य सारांशं निगीर्याव शेषं त्यज्यते यथेक्षुदंडादि तच्चोष्यमिति भेदः १४ किंच सर्वस्येति सर्वस्य प्राणिजातस्य हृदि सम्यक् अंतर्यामिरूपेण प्रविष्टोऽहं अत एव मत्त एव हेतोः प्राणिमात्रस्य पूर्वानुभूतार्थविषया स्मृतिर्भवति ज्ञानं च विषयेंद्रियसंप्रयोगजं भवति अपोहनं च तयोः प्रमोषणं भवति वेदैश्च सर्वैस्तत्तद्देवतादिरूपेणाहमेव वेद्यः वेदांतकृत् संप्रदायप्रवर्तकश्च ज्ञान

अहं वैश्वानरो भूत्वा प्राणिनां देहमाश्रितः प्राणापानसमायुक्तः पचाम्यन्नं चतुर्विधं १४ सर्वस्य चाहं हृदि सन्निविष्टो मत्तः स्मृतिर्ज्ञानमपोहनं च वेदैश्च सर्वैरहमेव वेद्यो वेदांतकृद्वेदविदेव चाहं १५ द्वाविमौ पुरुषौ लोके क्षरश्चाक्षर एव च क्षरः सर्वाणि भूतानि कूटस्थोऽक्षर उच्यते १६ उत्तमः पुरुषस्त्वन्यः परमात्मेत्युदाहृतः ((

दो गुरुरहमित्यर्थः वेदार्थविच्चाहमेव १५ इदानीं तद्धाम परमं ममेति यदुक्तं स्वकीयं सर्वोत्कृष्टं स्वरूपं दर्शयति द्वाविमाविति त्रिभिः द्वाविमौ क्षरश्चाक्षरश्चेति द्वाविमौ पुरुषौ लोके प्रसिद्धौ तावेवाह तत्र क्षरः पुरुषो नाम सर्वाणि भूतानि ब्रह्मादिस्थावरांतानि शरीराणि अविवेकिलोकस्य शरीरेष्वेव पुरुषत्वप्रसिद्धेः कूटः शिलाराशिः पर्वत इव देहेषु नश्यत्स्वपि निर्विकारतया तिष्ठतीति कूटस्थश्चेतनो भोक्ता स तु अक्षरः पुरुष उच्यते विवेकिभिः १६ यदर्थमेतौ लक्षितौ तमाह उत्तमइति ताभ्यां क्षराक्षराभ्यां अन्यो विलक्षणस्तूत्तमः पुरुषः वैलक्षण्यमेवाह परमश्चासावात्मेति चोदाहृतः उक्तः श्रुतिभिः आत्मत्वेन क्षरादचेतनादिलक्षणः परमत्वेनाक्षराच्च भोक्तुर्विलक्षण इत्यर्थः परमात्मत्वमेव दर्शयति यो लोकत्रयमिति यईश्वरः॥

ईशनशीलः अव्ययश्च निर्विकार एव सन् यो लोकत्रयं कृत्स्नमाविश्य बिभर्ति पालयति १७ एवंभूतं पुरुषोत्तमत्वमात्मनि नामनिर्वचनेन द
र्शयति यस्मादिति यस्मात् क्षरं जडवर्गमतिक्रान्तोऽहं नित्यमुक्तत्वात् अक्षराच्चेतनवर्गादप्युत्तमश्च नियन्तृत्वात् अतो लोके वेदे च पुरुषोत्तमः प्रथितः
प्रख्यातोऽस्मि तथा च श्रुतिः स वा अयमात्मा सर्वस्य वशी सर्वस्येशानः सर्वस्याधिपतिः सर्वमिदं प्रशास्तीत्यादि। १८ एवंभूतेश्वरज्ञातुः फलमाह यो
मामिति एवं निरुक्तप्रकारेणाऽसंमूढो निश्चितमतिः सन् यो मां पुरुषोत्तमं जानाति स सर्वभावेन सर्वप्रकारेण मामेव भजति ततः स सर्ववित् सर्वज्ञो
भवति १९ अध्यायार्थमुपसंहरति इतीति इति अनेन संक्षेपप्रकारेण गुह्यतमम् अतिरहस्यं संपूर्णं सर्वशास्त्रमेव मयोक्तं न पुनर्विंशतिश्लो

यो लोकत्रयमाविश्य बिभर्त्यव्यय ईश्वरः १७ यस्मात्क्षरमतीतोऽहमक्षरादपि चोत्तमः अतोऽस्मि लोके वेदे च प्रथितः
पुरुषोत्तमः १८ यो मामेवमसंमूढो जानाति पुरुषोत्तमं स सर्वविद्भजति मां सर्वभावेन भारत १९ इति गुह्यतमं शास्त्रमिद
मुक्तं मयानघ एतद्बुद्ध्वा बुद्धिमान्स्यात् कृतकृत्यश्च भारत २० इति श्रीभगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णा
र्जुनसम्वादे पुरुषोत्तमयोगो नाम पंचदशोऽध्यायः १५ श्रीभगवानुवाच· अभयं सत्वसंशुद्धिर्ज्ञानयोगव्यवस्थितिः॥ ॥

कमध्यायमात्रं हे अनघ व्यसनशून्य अत एतन्मदुक्तं शास्त्रं बुद्ध्वा बुद्धिमान् सम्यक् ज्ञानी स्यात् कृतकृत्यः स्यात् योऽपि कोऽपि हे भारत त्वं कृतकृ
त्योऽसीति किं वक्तव्यमित्यर्थः २० संसारशाखिनं छित्वा स्पष्टं पंचदशे प्रभुः पुरुषोत्तमयोगाख्यं परं पदमुपादिशत् १ इति श्रीसुबोधिन्यां टीकायां पं
चदशोऽध्यायः १५ आसुरीं संपदं त्यक्त्वा दैवीमेवाश्रिता नराः मुच्यन्त इति निर्णीतुं तद्विवेकोऽथ षोडशे १ पूर्वाध्यायान्ते एतद्बुद्ध्वा बुद्धिमान्स्यात् कृ
तकृत्यश्च भारतेत्युक्तं तत्र क एतत्तत्वं बुध्यते को वा न बुध्यते इत्यपेक्षायां तत्वज्ञानेऽधिकारिणोऽनधिकारिणश्च विवेकार्थं षोडशाध्याय आरंभः॥

निवृत्ताविद्याः संतः तदव्ययं पदं वैष्णवं गच्छंति ५ तदेव गंतव्यं पदं विशिनष्टि न तद्भासयत इति न तत्पदं सूर्यादयो नप्रकाशयंति यत्प्राप्य योगिनो न निवर्तंते योगिनः तत् धाम स्वरूपं परमं मम श्रीविष्णोः सूर्यादिप्रकाश्याविषयत्वेन जडत्वक्षीणत्वाद्यदोषप्रसंगो निरस्तः सर्वावभासकोपि। सूर्यस्तद्धाम वैष्णवं तेजोरूपं पदं भासयितुं न समर्थः सूर्यास्तमये निशि सर्वावभासकः पूर्णचंद्रोपि न तद्भासयितुमसमर्थः द्वयोरभावे निविडांधकारे सर्वविषयप्रकाशको ग्निरपि न तद्धाम भासयितुमसमर्थः तद्धाम वैष्णवं पदं गत्वा प्राप्य न निवर्तंते पुनः संसारिणो न भवंति ६ ननु त्वदीयं धाम प्राप्ताः संतो यदि न निवर्तंते न हि संति संपाद्यन विदुः स तिसंपाद्यामहइत्यादिश्रुतेः सुषुप्तिप्रलयसमये त्वत्प्राप्तिः सर्वेषामस्तीति को नाम संसारी स्यादित्याशंका

द्वंद्वैर्विमुक्ताः सुखदुःखसंज्ञैर्गच्छंत्यमूढाः पदमव्ययं तत् ५ न तद्भासयते सूर्यो न शशांको न पावकः यद्गत्वा न निवर्तंते तद्धाम परमं मम ६ ममैवांशो जीवलोके जीवभूतः सनातनः मनःषष्ठानींद्रियाणि प्रकृतिस्थानि कर्षति ७ शरीरं यदवाप्नोति यच्चाप्युत्क्रामतीश्वरः॥

संसारिणं दर्शयति ममेति पंचभिः यो मम एवांशो यो यमविद्याया जीवभूतः सनातनः सर्वदा संसारित्वेन प्रसिद्धः असौ सुषुप्तिप्रलययोः प्रकृतौ लीनतया स्थितानि मनःषष्ठं येषां तानि इंद्रियाणि पुनर्जीवलोके संसारे भोगार्थमाकर्षति एतच्च कर्मेंद्रियाणां प्राणस्य चोपलक्षणार्थं अयं भावः सत्यं सुषुप्तिप्रलययोरपि मदंशत्वात् सर्वस्यापि जीवमात्रस्य मयि लयादस्त्येव मत्प्राप्तिः तथापि अविद्यावृतस्य सानुशयस्य सप्रकृतिके मयि लयः न तु शुद्धे तदुक्तं अव्यक्ताद्व्यक्तयः सर्वाः प्रभवंतीत्यादिना अतश्च पुनः संसाराय निर्गच्छन् अविद्वान् प्रकृतौ स्थितानि स्वोपाधिभूतानि इंद्रियाणि आकर्षयति विदुषां तु शुद्धत्वरूपप्राप्तेर्नावृत्तिरिति ७ नान्याकृष्य किं करोतीत्यत्राह शरीरमिति यत् यदा शरीरांतरं कर्मवशादवाप्नोति यच्च शरीरादुत्क्राम

गी·टी· श्री· ७३

एतयोः संपदोः कार्यं दर्शयन्नाह दैवी संपदिति दैवी या संपत् तया युक्तो मया उक्ते तत्त्वज्ञानेऽधिकारी आसुर्या संपदा युक्तस्तु नित्यं संसारीत्यर्थः एतच्छ्रुत्वा किमहमत्राधिकारी न वेति संदेहव्याकुलचित्तमर्जुनमाश्वासयति हे पांडव मा शुचः शोकं मा कार्षीः यतस्त्वं दैवीं संपदमभिजातोसि ५॥ सा सर्वात्मना वर्जयितव्येत्येतदर्थमासुरीं संपदं प्रपंचयितुमाह द्वाविमाविति द्वौ द्विप्रकारौ भूतानां सर्गौ मे मद्वचनाच्छृणु असुरराक्षसप्रकृत्योरेकीकरणेन द्वावित्युक्तं अतः आसुरीं राक्षसीं चैव प्रकृतिं मोहिनीं श्रिता इत्यादिना नवमाध्यायोक्तप्रकृतित्रैविध्येनाविरोधः स्पष्टमन्यत् ६ आसुरीं विस्तरशो निरूपयति प्रवृत्तिं चेत्यादिद्वादशभिः धर्मे प्रवृत्तिं अधर्मान्निवृत्तिं च आसुरस्वभावा जना न जानंति अतः शौचमाचारः सत्यं च तेषु नास्ति

दैवी संपद्विमोक्षाय निबंधायासुरी मता मा शुचः संपदं दैवीमभिजातोसि पांडव ५ द्वौ भूतसर्गौ लोकेस्मिन्दैव आसुर एव च दैवो विस्तरशः प्रोक्त आसुरं पार्थ मे शृणु ६ प्रवृत्तिं च निवृत्तिं च जना न विदुरासुराः न शौचं नापि चाचारो न सत्यं तेषु विद्यते।

७ असत्यमप्रतिष्ठं ते जगदाहुरनीश्वरं अपरस्परसंभूतं किमन्यत्कामहैतुकं ८॥ ८ ननु वेदोक्तयोर्धर्माधर्मयोः प्रवृत्तिं च निवृत्तिं च कथं न विदुः कुतो वा धर्माधर्मयोरनंगीकरणे जगतः सुखदुःखादिव्यवस्था स्यात् कथं वा शौचाचारादिविषयामीश्वराज्ञां मन्निवर्त्तेरन् ईश्वरानंगीकारे च कुतो जगदुत्पत्तिः स्यादत आह असत्यमिति नास्ति सत्यं वेदपुराणादिप्रमाणमस्मिन् तादृशं जगदाहुः वेदानां प्रामाण्यं न मन्यत इत्यर्थः तदुक्तं त्रयो वेदस्य कर्तारो मुनिभंडनिशाचरा इत्यादि अत एव नास्ति धर्माधर्मरूपा प्रतिष्ठा व्यवस्थाहेतुर्यस्य तत् स्वाभाविकं जगद्वैचित्र्यमाहुरित्यर्थः अत एव नास्तीश्वरः कर्त्ता व्यवस्थापकश्च यस्य तादृशं जगदाहुः नहि कुतोस्य जगत उत्पत्तिं वदंतीति अत्राह अपरस्परसंभूतं अपरश्च परश्चेति अपरस्परं तत अपरस्परतः स्त्रीपुरुषमिथुनात्संभूतं जगत् किमन्यत्कारणमस्य नास्त्यन्यत् किंचित् किंतु कामहैतुकं स्त्रीपुरुषयोः काम एव प्रवाह

एम ७३

किंचएतामिति एतांलोकायतिकानांदृष्टिंदर्शनमाश्रित्यनष्टात्मानोमलिनचित्ताःसंतः अल्पबुद्धयः दृष्टार्थमात्रमतयः अतएवउग्रंहिंस्रंक
र्मयेषांतेअहिताःवैरिणोभूत्वाजगतःक्षयायप्रभवंतिउद्भवंतीत्यर्थः ९ अपिचकाममितिदुष्पूरंपूरयितुमशक्यंकाममाश्रित्यदंभादिभिर्युक्ताःसंतः
क्षुद्रदेवताराधनादौप्रवर्त्तंते कथंअसद्ग्राहान्गृहीत्वाअनेनमंत्रेणएतांदेवतामाराध्यमहानिधीन्साधयिष्यामीत्यादिदुराग्रहान्मोहमात्रेण
स्वीकृत्यप्रवर्त्तंतेअशुचीनिमद्यमांसादिविषयाणिव्रतानियेषांते १० किंच चिंतामिति प्रलयोमरणमेवांतोयस्यास्तां अपरिमेयांपरिमातुमशक्यां

एतांदृष्टिमवष्टभ्यनष्टात्मानोल्पबुद्धयः प्रभवंत्युग्रकर्माणःक्षयायजगतोहिताः ९ काममाश्रित्यदुष्पूरंदंभमानमदान्विताः
मोहाद्गृहीत्वासद्ग्राहान्प्रवर्त्तंतेशुचिव्रताः १० चिंतामपरिमेयांचप्रलयांतामुपाश्रिताः कामोपभोगपरमाएतावदितिनिश्चिताः
११ आशापाशशतैर्बद्धाःकामक्रोधपरायणाः ईहंतेकामभोगार्थमन्यायेनार्थसंचयान् १२ इदमद्यमयालब्धमिदंप्राप्स्येम
नोरथं इदमस्तीदमपिमेभविष्यतिपुनर्धनं १३ असौमयाहतःशत्रुर्हनिष्येचापरानपि ईश्वरोहमहंभोगीसिद्धोहंबलवान्सु

चिंतामाश्रिताःनित्यंचिंतापराइत्यर्थः कामोपभोगएवपरमोयेषांतेएतावदेवेतिकामोपभोगएवपरमपुरुषार्थोनान्यदस्तीतिकृतनिश्चयाःअ
र्थसंचयानीहंतइत्युत्तरेणान्वयः तथाचबार्हस्पत्यंसूत्रंकामएवैकःपुरुषार्थइतिचैतन्यविशिष्टकायःपुरुषइतिच ११ अतएवआशेति आ
शाएवपाशास्तेषांशतानितैर्बद्धाइतस्ततआकृष्यमाणाःकामक्रोधौपरमयमनमाश्रयोयेषांतेकामभोगार्थमन्यायेनचौर्यादिनार्थानांसंच
यान्राशीनीहंतेइच्छंति १२ तेषांमनोराज्यंकथयन्नरकप्राप्तिमाह इदमद्येतिचतुर्भिःप्राप्स्येप्राप्स्यामिमनोरथंमनसःप्रियंअवशिष्टंस्प
ष्टंएषांचत्रयाणांश्लोकानाइत्यज्ञानविमोहिताःसंतोनरकेपततीतिचतुर्थेनान्वयः १३ किंचअसाविति सिद्धःकृतकृत्यःस्पष्टमन्यत् १४॥

किंच आढ्य इति आढ्यो धनादिसंपन्नः अभिजनवान् कुलीनः यस्य योगाद्यनुष्ठानेनापि दीक्षितास्तेरेभ्यः सकाशात् महतीं प्रतिष्ठां प्राप्स्यामि दास्यामि स्तावकेभ्यः मोदिष्ये हर्षं प्राप्स्यामि इत्येवमज्ञानविमोहिताः मिथ्याभिनिवेशं प्रापिताः १५ एवंभूता यत्प्राप्नुवंति तच्छृणु अनेकेति अनेकेषु मनोरथेषु प्रवृत्तं चित्तमनेकचित्तं तेन विभ्रांता विक्षिप्ताः तेनैव मोहमयेन जालेन समावृत्ता मत्स्या इव सूत्रमयेन जालेन यंत्रिताः एवं कामभोगेषु प्रसक्ता अभिनिविष्टाः संतः अशुचौ कश्मले नरके पतंति १६ यस्य इति च यस्तेषां मनोरथ उक्तः स केवलं दंभाहंकारादिप्रधान एव न तु सात्विक इत्यभिनयेनाह आत्मसंभाविता इति द्वाभ्यां आत्मनैव संभाविताः पूज्यतां नीताः न तु साधुभिः केश्चित् अत एव स्तब्धा अनम्राः धनेन यो

आढ्योभिजनवानस्मि कोन्योस्ति सदृशो मया यक्ष्ये दास्यामि मोदिष्य इत्यज्ञानविमोहिताः १५ अनेकचित्तविभ्रांता

मोहजालसमावृताः प्रसक्ताः कामभोगेषु पतंति नरकेशुचौ १६ आत्मसंभाविताः स्तब्धा धनमानमदान्विताः यजंते ना

मयज्ञैस्ते दंभेनाविधिपूर्वकं १७ अहंकारं बलं दर्पं कामं क्रोधं च संश्रिताः मामात्मपरदेहेषु प्रद्विषंतोभ्यसूयकाः १८

मानश्च मदश्च ताभ्यामन्विताः संतः ते नाममात्रेण ये यज्ञास्ते नामयज्ञाः यद्वा दीक्षिताः सोमयाजीत्येवमादिनाममात्रप्रसिद्धये ये यज्ञास्तैर्यजंते क यं दंभेन न तु श्रद्धया अविधिपूर्वकं च यथा भवति तथा १७ अविधिपूर्वकत्वमेव प्रपंचयति अहंकारमिति अहंकारादीन् संश्रिताः संतः आत्मपर देहेषु स्वदेहेषु परदेहेषु च चिदंशेन स्थितं मां प्रद्विषंतो यजंते दंभयज्ञेषु श्रद्धाया अभावात् आत्मनो वृथैव पीडा भवति तथा पश्वादीनामपि अ विधिना हिंसायां चैतन्यद्रोहमात्रमेवावशिष्यत इति प्रद्विषंत इत्युक्तं अभ्यसूयकाः सन्मार्गवर्तिनां गुणेषु दोषारोपकाः तेषां च कदाचिदपि आसु

निरूपिते हि कार्यार्थेऽधिकारिजिज्ञासा भवति तदुक्तं भट्टैः भारो यो येन वोढव्यः स प्रागानोलितो यदा तदा कस्य स वोढेति शक्यं कर्तुं निरूपणमिति तम्
अधिकारिविशेषणभूतां दैवीं संपदमाह अभयमिति त्रिभिः श्रीभगवानुवाच अभयं भयाभावः सत्त्वस्य चित्तस्य संशुद्धिः सुप्रसन्नता ज्ञानयोगे आत्म
ज्ञानोपाये व्यवस्थितिः परिनिष्ठा दानं स्वभोज्यस्यान्नादेर्यथोचितसंविभागः दमो बाह्येंद्रियसंयमः यज्ञो यथाधिकारं दर्शपूर्णमासादिः स्वाध्यायो
ब्रह्मयज्ञादिर्जपयज्ञो वा तप उत्तराध्याये वक्ष्यमाणं शारीरादि आर्जवमवक्रता १ किंच अहिंसेति अहिंसा परपीडावर्जनं सत्यं यथादृष्टार्थभाष
णं अक्रोधस्ताडितस्यापि चित्ते क्षोभानुत्पत्तिः त्यागः औदार्यं शांतिश्चित्तोपरतिः पैशुनं परोक्षे परदोषप्रकाशनं तद्वर्जनमपैशुनं भूतेषु दीनेषु दया

दानं दमश्च यज्ञश्च स्वाध्यायस्तप आर्जवं १ अहिंसा सत्यमक्रोधस्त्यागः शांतिरपैशुनं दया भूतेष्वलोलुत्वं मार्दवं ह्रीरचापलं
२ तेजः क्षमा धृतिः शौचमद्रोहो नातिमानिता भवंति संपदं दैवीमभिजातस्य भारत ३ दंभो दर्पोऽभिमानश्च क्रोधः पारुष्यमे
व च अज्ञानं चाभिजातस्य पार्थ संपदमासुरीं ४॥ ९ अलोलुत्वं अलोलुपत्वं वर्णलोप आर्षः मार्दवं मृदुत्वमक्रूरता ह्रीरकार्यप्रवृत्तौ
लोकलज्जा अचापलं व्यर्थक्रियाराहित्यं २ किंच तेज इति तेजः प्रागल्भ्यं क्षमा परिभवादिषूत्पद्यमानक्रोधप्रतिबंधः धृतिर्दुःखादिभिरवसीदतः
श्चित्तस्य स्थिरीकरणं शौचं बाह्याभ्यंतरशुद्धिः अद्रोहो जिघांसाराहित्यं अतिमानिता आत्मन्यतिपूज्यत्वाभिमानस्तदभावो नातिमानिता एतानि अ
भयादीनि षड्विंशति दैवीं संपदमभिजातस्य संभवंति देवयोग्यां सात्त्विकीं संपदमभिलक्ष्य तत्तदाभिमुख्येन जातस्य भाविकल्याणस्य पुंसो भवं
तीत्यर्थः ३ आसुरीं संपदमाह दंभ इति दंभो धर्मध्वजित्वं दर्पो धनविद्यादिनिमित्तश्चित्तस्योत्सेकः अभिमानो व्याख्यातः क्रोधः प्रसिद्धः पारु
ष्यं निष्ठुरत्वं अज्ञानमविवेकः आसुरीमित्युपलक्षणं असुराणां राक्षसानां च या संपत् तामासुरीमभिलक्ष्य जातस्यैतानि दंभादीनि भवंतीत्यर्थः ४॥

गी·टी· इतिश्रीसुबोधिन्याटीकायांषोडशोऽध्यायः १६ उक्ताधिकारहेतूनांश्रद्धामुख्यातुसात्विकी इतिसप्तदशेगौणश्रद्धाभेदस्त्रिधोच्यते १ पूर्वोध्यायांते
श्री· यः शास्त्रविधिमुत्सृज्यवर्ततेकामकारतः नससिद्धिमवाप्नोतीत्यनेनशास्त्रोक्तविधिमुत्सृज्यकामकारेणवर्त्तमानस्यज्ञानेधिकारोनास्तीत्युक्तंतत्रशास्त्रविधि
७५ मुत्सृज्यकामकारंविनाश्रद्धयावर्त्तमानायांकिमधिकारोस्तिनास्तिवेतिबुभुत्सयाऽर्जुनउवाच येइति अत्रशास्त्रविधिमुत्सृज्ययजंतइत्यनेनशास्त्रा
र्थंबुद्ध्वातमुल्लंघ्यवर्त्तमानानगृह्यंतेतेषांश्रद्धयायजनानुपपत्तेरास्तिक्यबुद्धिर्हिश्रद्धानचासौशास्त्रज्ञानवतांशास्त्रविरुद्धेर्थेसंभवति नानेवाधिकृत्य
त्रिविधाभवतिश्रद्धायजंते सात्विकादेवानित्यादिउत्तरानुपपत्तेश्चअतोनात्रशास्त्रातिलंघिनोगृह्यंते अपितुक्लेशबुद्ध्याआलस्याद्वाशास्त्रार्थज्ञानेप्रय

इतिश्रीभगवद्गीतासूपनिषत्सुब्रह्मविद्यायांयोगशास्त्रेश्रीकृष्णार्जुनसंवादेदैवासुरसंपत्तिप्रकृतिविभागयोगोनामषो
डशोऽध्यायः १६ अर्जुनउवाच येशास्त्रविधिमुत्सृज्ययजंतेश्रद्धयान्विताः तेषांनिष्ठातुकाकृष्णसत्वमाहोरजस्त
मः १ श्रीभगवानुवाच त्रिविधाभवतिश्रद्धादेहिनांसास्वभावजा ॥ १६ यत्नमकृत्वाकेवलमाचारपरंपरादर्शनश्रद्धया
क्वचिद्देवतयाधनादौप्रवर्त्तमानागृह्यंते अतोयमर्थः येशास्त्रविधिमुत्सृज्यदुःखबुद्ध्याआलस्याद्वाऽनादृत्यकेवलमाचारप्रामाण्येनश्र
द्धयान्विताः संतोयजंते तेषांतुकानिष्ठाकास्थितिःकआश्रयः तामेवविशेषेणपृच्छतिकिंसत्वंआहोकिंवारजःअथवाकिंवातमइतितेषांतादृ
शीदेवपूजादिप्रवृत्तिः किंसत्वंसंश्रिताःरजःसंश्रितावातमःसंश्रितोवेत्यर्थः श्रद्धायासात्विकत्वात्क्लेशबुद्ध्याआलस्येनचशास्त्रानादरस्यचराज राम
सतामससत्वात्त्रैधासंदेहःयदिसत्वभावसंश्रिताः तर्हितेषामपिसात्विकत्वात्यथोक्तात्माज्ञानेधिकारः स्यात्अन्यथानेतिप्रश्नार्थः १· अत्रोत्तरं ७५
श्रीभगवानुवाच त्रिविधेति अयमर्थः शास्त्रतत्वज्ञानतः प्रवर्त्तमानानांपरमेश्वरपूजाविषयासात्विकीएकविधैवश्रद्धा॥ ॥ ॥

लोकाचारमात्रेणतु प्रवर्त्तमानानां देहिनां या श्रद्धा सा तु सात्विकी राजसी तामसी चेति त्रिविधा भवति तत्र हेतुः स्वभावजा स्वभावः पूर्वजन्मसंस्कारस्तस्मा
ज्जाता स्वभावजा स्वभावमन्यथा कर्तुं हि समर्थं शास्त्रोक्तं विवेकज्ञानं तत्तु तेषां नास्ति अतः केवलं पूर्वस्वभावेन श्रद्धा त्रिविधा भवति तामिमां त्रिविधां श्रद्धां
शृणु तदुक्तं व्यवसायात्मिका बुद्धिरेकेह कुरुनंदनेत्यादिनां २ ननु च श्रद्धा सात्विकी सत्वकार्यत्वेन त्वयैव श्रीभगवता उद्भवंप्रति निर्दिष्टत्वात् यथोक्तं शमो
दमस्तितिक्षेज्या तपः सत्यं दयास्मृतिः तुष्टिस्त्यागोऽस्पृहा श्रद्धा ह्रीर्दयादिः स्वनिर्वृतिरित्येताः सत्वस्य वृत्तयः इति अतः कथं तस्यास्त्रैविध्यमुच्यते सत्यं तथापि रज
स्तमोयुक्तपुरुषाश्रयत्वेन रजस्तमोमिश्रितत्वेन सत्वस्य त्रैविध्यात् श्रद्धाया अपि त्रैविध्यं घटत इत्याह सत्वानुरूपेति सत्वानुरूपा सत्वतारतम्यानुसारिणी सर्वे
स्य विवेकिनो अविज्ञविवेकिनो वा लोकस्य श्रद्धा भवति तस्मादयं पुरुषो लौकिकः श्रद्धामयः श्रद्धाविकारः त्रिविधया श्रद्धया विक्रियत इत्यर्थः नदेवाहयोय

सात्विकी राजसी चैव तामसी चेति तां शृणु २ सत्वानुरूपा सर्वस्य श्रद्धा भवति भारत श्रद्धामयोऽयं पुरुषो यो यच्छ्रद्धः स एव सः
३ यजंते सात्विका देवान्यक्षरक्षांसि राजसाः प्रेतान्भूतगणांश्चान्ये यजंते तामसा जनाः ४॥

च्छ्रद्धः यादृशी श्रद्धा यस्य स एव सः तादृश्या
श्रद्धया युक्त एव सः यः पूर्वं सत्वोत्कर्षेण सात्विकश्रद्धया युक्तः स पुरुषः पुनः तादृशस्वसंस्कारेण सात्विक श्रद्धायुक्त एव भवति यस्तु रजस उत्कर्षेण राजस
श्रद्धायुक्तः स पुनस्तादृश एव भवति यस्तु तमस उत्कर्षेण तामसश्रद्धायुक्तः स पुनस्तामस एव भवतीति लोकाचारमात्रेण प्रवर्त्तमानेष्वेवं सात्विकराजसतामस
श्रद्धाव्यवस्था शास्त्रजनितविवेकज्ञानयुक्तानां तु स्वभावविजयेन सात्विक्येव श्रद्धेति प्रकरणार्थः ३ सात्विकादिभेदमेव कार्यादिभेदेन प्रपंचयति यजंत इ
ति सात्विका जनाः सत्वप्रकृतीन् देवाने वयजंते पूजयंति राजसास्तु रजःप्रकृतीन् यक्षान् राक्षसांश्च यजंते एतेभ्यः अन्येपि विलक्षणास्तामसा जनाः तामसा
नेव प्रेतान् भूतगणांश्च यजंते सत्वादिप्रकृतीनां तत्तद्देवतानां तु पूजारुचिभिस्तत्पूजकानां सात्विकादि ज्ञातव्यमित्यर्थः ४॥ ६ ॥ ६ ॥ ६ ॥ ॥

राजसानांतामसेषुपुनर्विशेषांतरमाह अशास्त्रविहित मितिद्वाभ्यांशास्त्रविधिमजानंतोपिकेचित्प्राचीनपुण्यसंस्कारेणसात्त्विकाएवभवंति केचित्तुमध्यमाराजसाभवंति अधमास्तुतामसाभवंतियेपुनरत्यंतमंदभाग्यागतानुगत्यापाखंडसंगेनतदाचारानुवर्तिनः संतःअशास्त्रविहितंघोरंभूतभयंकरंतपस्तप्यंतेकुर्वंतितत्रहेतवः दंभाहंकाराभ्यांसंयुक्ताःतथाकामोभिलाषः रागआसक्तिः बलमाग्रहः एतैरन्विताः संतः तान् आसुरनिश्चयान् विद्धीत्युत्तरेणान्वयः ५ किंच॥ कर्षयंतइति शरीरस्थंप्रारंभकत्वेनदेहेस्थितंभूतानांपृथिव्यादीनांग्रामंसमूहंकर्षयंतः वृथैवोपवासादिभिः कृशंकुर्वंतः अचेतसः अविवेकिनः मांचांतर्यामिनयाअंतःशरीरस्थंदेहमध्येस्थितंमदाज्ञालंघनेनैवकर्षयंतः संतः संपतयेव्यर्थंतपश्चरंतितान् आसुरनिश्चयान् आसुरोऽतिक्रूरोनिश्चयोयेषां

अशास्त्रविहितंघोरंतप्यंतेयेतपोजनाः दंभाहंकारसंयुक्ताः कामरागबलान्विताः ५ कर्षयंतः शरीरस्थंभूतग्राममचेतसः मांचैवांतःशरीरस्थंतान्विद्ध्यासुरनिश्चयान् ६ आहारस्त्वपिसर्वस्यत्रिविधोभवतिप्रियः यज्ञस्तपस्तथादानंतेषांभेदमिमंशृणु ७ आयुःसत्त्वबलारोग्यसुखप्रीतिविवर्द्धनाः रस्याः स्निग्धाः स्थिराहृद्याआहाराःसात्त्विकप्रियाः ८ कट्वम्ललवणात्युष्णतीक्ष्णरूक्षविदाहिनः॥

९ तान् विद्धिजानीहि ६ आहारादिभेदादपिसात्त्विकादिभेदंदर्शयितुमाह आहारस्त्वित्यादित्रयोदशभिः सर्वस्यापिजनस्ययआहार अन्नादिः सतुयथायथंत्रिविधःप्रियोभवतितथायज्ञतपोदानानिचत्रिविधानिभवंतितेषांचवक्ष्यमाणमिमंभेदंशृणु अतश्चराजसतामसाहारयज्ञादिपरित्यागेनसात्त्विकाहारयज्ञादिसेवयासत्त्ववृद्धौयत्नःकर्तव्यइत्येतदर्थंकथ्यते ७ तत्राहारत्रैविध्यमाह आयुरितित्रिभिःआयुर्जीवितंसत्त्वमुत्साहोबलंशक्तिरारोग्यंरोगराहित्यंसुखंचित्तप्रसादःप्रीतिरभिरुचिः आयुरादीनांविवर्द्धनाविवृद्धिकराश्चतेचरस्यारसवंतःस्निग्धाःस्नेहयुक्ताःस्थिरादेहेरसांशेनचिरकालावस्थायिनःहृद्याहृष्टमात्राएवहृदयंगमाःएवंभूताआहाराभक्ष्यभोज्यादयः सात्त्विकस्यप्रियाः ८ किंचतथाकट्वितिअतिश॥

तेषांचकदाचिदप्यासुरस्वभावप्रच्युतिर्नभवतीत्याह तानितिद्वाभ्यां तानहंमांद्विषतः क्रूरान् संसारेषुजन्ममृत्युमार्गेषुतत्रापि आसुरीष्वेवातिक्रूरासुव्या
घ्रसर्पादियोनिषुअजस्रमनवरतंक्षिपामि तेषांपापकर्मणांतादृशंफलंददामीत्यर्थः १९ तेचआसुरीमिति मामप्राप्यैवेत्येवकारेणमत्प्राप्तिशंकाकुतस्ते
षांमत्प्राप्त्युपायंसन्मार्गमपिअप्राप्यततोपिअधमांकृमिकीटादियोनिंगतिंचयांतीत्युक्तंशिष्टंस्पष्टं २० उक्तानामसुरदोषाणामपिमध्येसकलदोषमू
लभूतंदोषत्रयंसर्वथावर्जनीयमित्याह त्रिविधमितिकामःक्रोधोलोभइतीदंत्रितयंत्रिविधंनरकस्यद्वारंअतएवआत्मनोनाशनंनीचयोनिप्रापकं
तस्मात्एतत्त्रयंसर्वात्मनात्यजेत् २१ त्यागेचविशिष्टफलमाह एतैरिति तमसोनरकस्यद्वारभूतैरेतैस्त्रिभिःकामादिभिर्विमुक्तोनरः आत्मनःश्रेयः

तानहंद्विषतःक्रूरान्संसारेषुनराधमान् क्षिपाम्यजस्रमशुभानासुरीष्वेवयोनिषु १९ आसुरींयोनिमापन्नामूढाजन्मनिजन्मनि
मामप्राप्यैवकौंतेयततोयांत्यधमांगतिं २० त्रिविधंनरकस्येदंद्वारंनाशनमात्मनः कामःक्रोधस्तथालोभस्तस्मादेतत्त्रयंत्यजेत्
२१ एतैर्विमुक्तःकौंतेयतमोद्वारैस्त्रिभिर्नरः आचरत्यात्मनःश्रेयस्ततोयातिपरांगतिं २२ यःशास्त्रविधिमुत्सृज्यवर्ततेकामका
रतः नससिद्धिमवाप्नोतिनसुखंनपरांगतिं २३ तस्माच्छास्त्रंप्रमाणंतेकार्याकार्यव्यवस्थितौ ज्ञात्वाशास्त्रविधानोक्तंकर्मकर्तुमिहार्हसि

साधनंतपोयोगादिकमाचरति ततश्चमोक्षंप्राप्नोति २२ कामादित्यागश्चस्वधर्माचरणंविनानभवतीत्याहय इतिशास्त्रविधिंश्रुति २४॥
वेदविहितंधर्ममुत्सृज्ययःकामकारतोयथेष्टंवर्ततेससिद्धिंतत्त्वज्ञानंनप्राप्नोतिनचसुखमुपशमंनचपरांगतिंमुक्तिंप्राप्नोति २३ फलितमा
ह तस्मादितिइदंकार्यमिदमकार्यमित्यस्यांव्यवस्थायांतवशास्त्रंश्रुतिस्मृतिपुराणादिकमेवप्रमाणं अतःशास्त्रविधानोक्तंकर्मज्ञात्वाइहकर्माधि
कारेवर्तमानोयथाधिकारंकर्मकर्तुमर्हसितत्मूलत्वात्सत्वशुद्धिसम्यग्ज्ञानमुक्तीनामित्यर्थः २४॥ ॥२४।२४ ॥ २४।२४ ॥ २४।२४ ॥ ॥

गी॰ टी॰ वाचिकंतपआह अनुद्वेगेति उद्वेगंभयंनकरोतीति अनुद्वेगकरंवाक्यंसत्यंचश्रोतुः प्रियंचहितंचपरिणामेसुखकरंस्वाध्यायाभ्यसनंवे
श्री॰ दाभ्यासश्चवाचानिवर्त्यंतपःवाङ्मयं १५ मानसंतपआहमनःप्रसादइतिमनसःप्रसादःस्वच्छतासौम्यत्वमक्रूरतामौनंमुनेर्भावःमननमित्यर्थःआ
७७ त्मनोविनिग्रहःविषयेभ्यःप्रत्याहारःभावसंशुद्धिर्व्यवहारेमायाराहित्यइत्येतत्मानसंतपः १६ तदेवंशरीरवाङ्मनोभिर्निवर्त्यंत्रिविधंतपोदर्शितंत
स्यत्रिविधस्यापितपसःसात्विकादिभेदेनत्रैविध्यमाह श्रद्धयेतित्रिभिःतत्त्रिविधमपितपःश्रेष्ठयाश्रद्धयाफलाकांक्षयाशून्यैर्युक्तैरेकाग्रचित्तैर्न

अनुद्वेगकरंवाक्यंसत्यंप्रियहितंचयत् स्वाध्यायाभ्यसनंचैववाङ्मयंतपउच्यते १५ मनःप्रसादःसौम्यत्वंमौनमात्म
विनिग्रहः भावसंशुद्धिरित्येतत्तपोमानसमुच्यते १६ श्रद्धयापरयातप्तंतपस्तत्त्रिविधंनरैः अफलाकांक्षिभिर्युक्तैः
सात्विकंपरिचक्षते १७ सत्कारमानपूजार्थंतपोदंभेनचैवयत् क्रियतेतदिहप्रोक्तंराजसंचलमध्रुवं १८ मूढग्राहे
णात्मनोयत्पीडयाक्रियतेतपः परस्योत्सादनार्थंवातत्तामसमुदाहृतं १९ दातव्यमितियद्दानंदीयतेऽनुपकारिणे॰॥ मू॥

रैस्तप्तं तत्सात्विकं १७ राजसमाहसत्कारेति सत्कारःसाधुरयमितितापसइत्यादिवाक्पूजामानःप्रत्युत्थानाभिवादनादिदैहिकी
पूजार्थलाभादिः एतदर्थंदंभेनचयत्तपःक्रियते अतएवचलमनियतं अध्रुवंचक्षणिकंयदेवंभूतंतपःतदिहराजसंप्रोक्तं १८ ॥ एम
नामसंतपआह मूढेति मूढग्राहेणाविवेककृतेनदुराग्रहेणात्मनःपीडयायत्तपःक्रियतेपरस्योत्सादनार्थंवाऽन्यस्यविनाशार्थंअभि ७७
चाररूपंतत्तामसमुदाहृतंकथितं १९ पूर्वप्रतिज्ञातमेवदानस्यत्रैविध्यमाह दातव्यमिति दातव्यमित्येवंनिश्चयेनयद्दानंदीयते॰॥ दृ

अनुपकारिणेप्रत्युपकारासमर्थायदेशेकुरुक्षेत्रादौकालेग्रहणादौपात्रेचेतिदेशकालसाहचर्यात् सप्तमीप्रयुक्तायात्रभूतायतपःश्रुतादिसं
पन्नायब्राह्मणायेत्यर्थःयद्वापात्रेइतिचतर्थ्येवैषापात्रेरक्षकायेत्यर्थःसहिसर्वस्मादापद्गणाद्दातारंपातीति यदेवंभूतंदानंतत्सात्त्विकं २० राजसं
दानमाहयत्त्विति कालांतरेअयंमांप्रत्युपकारंकरिष्यतीत्येवमर्थंफलंवास्वर्गादिकमुद्दिश्ययद्दीयतेपुनर्दानं परिक्लिष्टंचित्तक्लेशयुक्तंयथा
भवति एवंतद्दानंराजसमुदाहृतं २१ नामसंदानमाह अदेशेति अदेशे अशुचिस्थानेअकालेअशौचसमये अपात्रेभ्योविटनटादिभ्योय
द्दानंदीयतेदेशकालपात्रसंपत्तावपि असत्कृतंपादप्रक्षालनादिसत्कारशून्यमवज्ञातंतिरस्कारयुक्तंएवंभूतंदानंतामसमुदाहृतं २२ ननु

देशेकालेचपात्रेचतद्दानंसात्त्विकंस्मृतं २० यत्तुप्रत्युपकारार्थंफलमुद्दिश्यवापुनः दीयतेचपरिक्लिष्टंतद्राजसमु
दाहृतम् २१ अदेशकालेयद्दानमपात्रेभ्यश्चदीयते असत्कृतमवज्ञातंतत्तामसमुदाहृतं २२ ॐतत्सदितिनिर्देशो
ब्रह्मणस्त्रिविधःस्मृतः ब्राह्मणास्तेनवेदाश्चयज्ञाश्चविहितापुरा २३॥ एवंविचार्यमाणेसर्वमपियज्ञतपोदानादिराजसतामस

मप्रायमेवेतिव्यर्थोयज्ञादिप्रयासइत्याशंक्यतथाविधस्यापिसात्त्विकत्वापादानप्रकारंदर्शयितुमाह ॐतदिति ॐतत्सदित्येवं त्रिविधोब्रह्मणः
परमात्मनोनिर्देशोनामव्यपदेशःस्मृतःशिष्टैः तत्रएतावदोमितिब्रह्मेत्यादिश्रुतिप्रसिद्धेः ॐमितिब्रह्मणोनामजगत्कारणत्वेनातिप्रसिद्ध
त्वात् अविदुषांपरोक्षत्वाच्चतच्छब्दोपिब्रह्मणोनामपरमार्थसत्त्वसाधुत्वप्रशस्तत्वादिभिः सच्छब्दोब्रह्मणोनाम अयंत्रिविधोपिनामनिर्देशो
विगुणमपिसगुणीकर्तुंसमर्थइत्याशयेनस्तौतितेनत्रिविधेनब्रह्मणोनिर्देशेनपरमात्मनाब्राह्मणाश्चवेदाश्चयज्ञाश्चपूर्वंसृष्ट्यादौविहिताविधात्रानिर्मिताः सगुणीकृताःयद्वायस्यायंत्रिविधोनिर्देशःतेनपरमात्मनाब्राह्मणादयःपवित्रतमाःसृष्टाःतस्मात्तस्यायंनिर्देशोतिप्रशस्तइत्यर्थः

गी॰

इदानींप्रत्येकमोंकारादीनांप्राशस्त्यंदर्शयिष्यन् ॐकारस्यतावदाह तस्मादिति यस्मादेवंब्रह्मणोनिर्देशःप्रशस्तःतस्मादोमित्युदाहृत्यउ
च्चार्यब्रह्मवादिनांयज्ञाद्याः शास्त्रोक्ताः क्रियाः सततंसर्वदाअंगवैकल्येपिप्रकर्षेणवर्तंतेसगुणाभवंतीत्यर्थः २४ द्वितीयंनामप्र
स्तौति तदितितदित्युदाहृत्येतिपूर्वस्यानुषंगः तदित्युदाहृत्यशुद्धचित्तैर्मोक्षकांक्षिभिःपुरुषैःफलाभिसंधिमकृत्वायदियज्ञाद्याःक्रियाः
क्रियंते ततश्चचित्तशोधनद्वारेणफलं संकल्पतत्त्याजनेनमुमुक्षुत्वसंपादकत्वात् तच्छब्दनिर्देशःप्रशस्त इत्यर्थः २५ सच्छब्द
स्यप्राशस्त्यमाह सद्भाव इतिद्वाभ्यांसद्भावेअस्तित्वेदेवदत्तस्यपुत्रादिकमस्तीति अस्मिन् अर्थेसाधुभावेचसाधुत्वेदेवदत्तस्यपुत्रादि

तस्मादोमित्युदाहृत्ययज्ञदानतपःक्रियाः प्रवर्तंतेविधानोक्ताः सततंब्रह्मवादिनां २४ तदित्यनभिसंधायफ
लंयज्ञतपःक्रियाः दानक्रियाश्चविविधाः क्रियंतेमोक्षकांक्षिभिः २५ सद्भावेसाधुभावेच सदित्येतत्प्रयुज्यते प्रश
स्तेकर्मणितथासच्छब्दःपार्थयुज्यते २६ यज्ञेतपसिदानेचस्थितिःसदितिचोच्यते कर्मचैवतदर्थीयंसदित्येवाभि

श्रेष्ठमित्यस्मिन्नर्थेसदित्येतत्पदंप्रयुज्यतेप्रशस्तेमांगलिकेविवाहादिकर्मणिचसदिदंकर्मेतिसच्छब्दोयुज्यतेप्र ॥धीयते २७॥
युज्यतेसंगच्छतइतिवा २६ किंच यज्ञेति यज्ञादिषुचयास्थितिः तात्पर्येणावस्थानंतदपिसदित्युच्यते यस्यचेदंनामत्रयंयएवपर
मात्माअर्थःफलंयस्यतत्तदर्थंकर्मपूजोपहारगृहांगणपरिमार्जनोपलेपरंगमालिकादिक्रियातत्सिद्धयेयदन्यत्कर्मक्रियेतउद्यान
शालिक्षेत्रधनार्जनादिविशेषंकर्मतदर्थीयंतच्चापिव्यवहितमपिसदित्येवाभिधीयतेयस्मादेवमतिप्रशस्तंएतन्नामत्रयंतस्माद
तत्सर्वकर्मसाद्गुण्यार्थंकीर्तयेदितितात्पर्यार्थः ॥ ६ ॥

अतितीक्ष्णो मरीच्यादिः अतिरूक्षः कंगुकोद्रवादिः अतिविदाही सर्षपादिः अतिकट्वादय आहारा राजसस्येष्टाः प्रियाः दुःखं तात्कालिकं हृदय संतापादि शोकः पश्चाद्भावि दौर्मनस्यं आमयो रोगः एतानि प्रददाति प्रयच्छति ९ तथा यातयाममिति यातो यामः प्रहरो यस्य पक्वस्योदनादेस्तद्यातयामं शैत्यावस्थां प्राप्तमित्यर्थः गतरसं निष्पीडितसारं पूति दुर्गंधं पर्युषितं दिनांतरपक्वं उच्छिष्टं अन्यभुक्तावशिष्टं अमेध्यं अभक्ष्यं कलंजादि एवंभूतं भोजनं भोजनं तामसस्य प्रियं १० यज्ञोपि त्रिविधः तत्र सात्त्विकं यज्ञमाह अफलाकांक्षिभिरिति फलाकांक्षारहितैः पुरुषैर्विधिना दृष्टः आवश्यकतया विहितो यज्ञ इज्यते अनुष्ठीयते स सात्त्विको यज्ञः कथमिज्यते यष्टव्यमेवेति यज्ञानुष्ठानमेव कार्यं नानेन फलं साधनीयमित्येवमनः समाधा

आहारा राजसस्येष्टा दुःखशोकामयप्रदाः ९ यातयामं गतरसं पूति पर्युषितं च यत् उच्छिष्टमपि चामेध्यं भोजनं ताम
सप्रियम् १० अफलाकांक्षिभिर्यज्ञो विधिदृष्टो य इज्यते यष्टव्यमेवेति मनः समाधाय स सात्त्विकः ११ अभिसंधाय तु फलं
दंभार्थमपि चैव यत् इज्यते भरतश्रेष्ठ तं यज्ञं विद्धि राजसं १२ विधिहीनमसृष्टान्नं मंत्रहीनमदक्षिणं श्रद्धाविरहितं यज्ञं ता
मसं परिचक्षते १३ देवद्विजगुरुप्राज्ञपूजनं शौचमार्जवं ब्रह्मचर्यमहिंसा च शारीरं तप उच्यते १४ ॥ ✺ ॥

यैकाग्रं कृत्वेत्यर्थः ११ राजसं यज्ञमाह अभिसंधायेति फलमभिसंधाय उद्दिश्य तु यत् इज्यते यज्ञः क्रियते दंभार्थं च महत्वख्यापनाय तं यज्ञं राजसं विद्धि १२ तामसयज्ञमाह विधिहीनमिति विधिहीनं शास्त्रोक्तविधिशून्यं असृष्टान्नं ब्राह्मणादिभ्यो न सृष्टं न निष्पादितमन्नं यस्मिंस्तं मंत्रहीनं यथोक्तदक्षिणारहितं श्रद्धाशून्यं यज्ञं तामसं परिचक्षते कथयंति शिष्टाः १३ तामसः सात्त्विकादिभेदं दर्शयितुं प्रथमं तावच्छारीरादिभेदेन तपस्त्रैविध्यमाह देवद्विजेति त्रिभिः प्राज्ञास्तत्त्वविदो गुरुव्यतिरिक्ता अन्येपि तत्त्वविदः देवब्राह्मणादिपूजनं शौचादिकं शारीरं शरीरनिर्वर्त्यं तप उच्यते

वाहोइति संबोधनं संन्यासस्य त्यागस्य च तत्त्वं पृथक् विवेकेन वेदितुमिच्छामि १ अत्रोत्तरं श्रीभगवानुवाच काम्यानामिति पुत्रकामो यजेत स्व
र्गकामो यजेतेत्येवमादिकामोपबंधेन विहितानां काम्यानां कर्मणां न्यासं परित्यागं संन्यासं कवयो विदुः सम्यक् फलैः सह सर्वकर्मणामपि त्यागं न्यासं
संन्यासं पंडिता विदुर्जानंतीत्यर्थः सर्वेषां काम्यानां नित्यनैमित्तिकानां च कर्मणां फलमात्रत्यागं प्राहुः त्यागं विचक्षणा निपुणाः ननु स्वरूपतः कर्म
त्यागं ननु नित्यनैमित्तिकानां फलाश्रवणादविद्यमानस्य फलस्य कथं त्यागः स्यात् नहि वंध्यायाः पुत्रत्यागः संभवति उच्यते यद्यपि स्वर्गकामः पशु
कामः इत्यादिवत् सायंप्रातः संध्यामुपासीत यावज्जीवमग्निहोत्रं जुहुयादित्यादिषु फलविशेषो न श्रूयते तथापि अपुरुषार्थव्यापारे प्रेक्षावंतं प्रवर्
तयितुमशक्नुवन् विधिर्विश्वजिता यजेतेत्यादिष्विव सामान्यतः किमपि फलमाक्षिपत्येव नचातीव गुरुमतं श्रद्धयास्वस्ति द्विरेव विधेः प्रयोजनमिति मं

॥श्रीभगवानुवाच काम्यानां कर्मणां न्यासं संन्यासं कवयो विदुः सर्वकर्मफलत्यागं प्राहुस्त्यागं विचक्षणाः २ ॥

तव्यं पुरुषप्रवृत्त्यनुपपत्तेर्दुष्परिहरत्वात् श्रूयते च नित्यादिष्वपि फलं सर्व एते पुण्यलोका भवंतीति कर्मणा पितृलोक इति धर्मेण पापमपनुदतीत्येवमादि
षु तस्माद्युक्तमुक्तं सर्वकर्मफलत्यागं प्राहुस्त्यागं विचक्षणा इति ननु च फलत्यागेन पुनरपि निष्फलेषु कर्मसु अप्रवृत्तिरेव स्यात् तन्न सर्वेषामपि कर्मणां संयोगपृथ
क्त्वेन विविदिषार्थतया विनियोगात् तथा च श्रुतिः तमेतमात्मानं वेदानुवचनेन ब्राह्मणा विविदिषंति यज्ञेन दानेन तपसानाशकेनेति अतः प्रतिपदो
क्तं सर्वफलबंधकत्वेन त्यक्त्वा विविदिषार्थं सर्वकर्मानुष्ठानं घटत एव विविदिषा च नित्यानित्यवस्तुविवेके न निवृत्तदेहाद्यभिमानतया बुद्धेः प्रत्यक्प्रवणता
तावत्पर्यंतं सत्त्वशुद्ध्यर्थं ज्ञानाविरुद्धं यथोचितमावश्यकं ॥

कर्मकुर्वतस्तत्फलत्यागएवकर्मत्यागोनामनस्वरूपेणतथाचश्रुतिः कुर्वन्नेवेहकर्माणिजिजीविषेच्छतंसमाइतिततः परंतुसर्वकर्मनिवृत्तिः स्वा
तएवभवति तदुक्तंनैष्कर्म्यसिद्धौप्रत्यक्प्रवणतांबुद्धेः कर्माण्युत्पाद्यशुद्धितः कृतार्थान्यस्तमायांतिप्रावृडंतेघनाइवेति तदुक्तंश्रीभगवता यस्त्वात्म
रतिरेवस्यादात्मतृप्तश्चमानवः आत्मन्येवचसंतुष्टस्तस्यकार्यंनविद्यतइति वशिष्ठेनोक्तंनकर्माणित्यजेद्योगीकर्मभिस्त्यज्यतेह्यसौ कर्मणोमूलभूत
स्यसंकल्पस्यैवनाशनइति ज्ञाननिष्ठाविक्षेपकत्वमालक्ष्यत्यजेद्वा तदुक्तंश्रीभगवता तावत्कर्माणिकुर्वीतननिर्विद्येतयावता मत्कथाश्रवणादौवा
श्रद्धायावन्नजायतेज्ञाननिष्ठोविरक्तोवामद्भक्तोवानपेक्षकः सलिंगानाश्रमांस्त्यक्त्वाचरेदविधिगोचरइत्यादि अलमतिप्रसंगेनप्रकृतमनुसरामः २ ॥ए
॥ अविदुषः फलत्यागमात्रमेवत्यागशब्दार्थोनकर्मत्यागइत्येतदेवमतांतरनिरासेनदृढीकर्तुंमतभेदंदर्शयतित्याज्यमितिदोषवत्हिंसादिदोषवत्केवलंबंध

॥त्याज्यंदोषवदित्येकेकर्मप्राहुर्मनीषिणः ॥ ॥

कारमितिहेतोः सर्वमपिकर्मत्याज्यमित्येकेसांख्याःप्राहुर्मनीषिणइत्यस्यायंभावः नहिंस्यात्सर्वभूतानीतिहिनिषेधः पुरुषस्यानर्थहेतुर्हिंसेत्याह अग्निष्टो
मीयंपशुमालभेतेत्यादिप्राकरणिकोविधिस्तुहिंसायाःक्रतूपकारकत्वमाह अतोभिन्नविषयत्वेनसामान्यविशेषन्यायागोचरत्वात् द्रव्यसाध्येषुचस
र्वेष्वपिकर्मसुहिंसादिसंभवात् सर्वमपिकर्मत्याज्यमेवेति तदुक्तंदृष्टवदानुश्रविकः सह्यविशुद्धिक्षयातिशययुक्तइति गुरुपाठादनुश्रूयतेइत्यनुश्र
वोवेदः अपरेतुमीमांसकाः यज्ञादिकंकर्मनत्याज्यमितिप्राहुः अयंभावः क्रत्वर्थोपिसन्नीहिंसापुरुषेणैवकर्तव्यासाचान्योद्देशेनापिकृतापुरुष
स्यप्रत्यवायहेतुरेवतथाहिविधिर्विधेयस्यतदुद्देशेनानुष्ठानंविधत्तेनादर्थ्यलक्षणात्वाच्छेषत्वस्यनत्वेवंनिषेधोनिषेध्यस्यतादर्थ्यमपेक्षतेप्राप्तिमा
त्रापेक्षित्वात् अन्यथाअज्ञानप्रमादादिकृतेदोषाभावः॥

 प्रसंगात् तदेवंसमानविषयत्वेनसामान्यशास्त्रस्यविशेषेणबाधोनास्तिदोषवत्त्वं अतोनित्यंयज्ञादिकंकर्मनत्याज्यमिति अनेनविधिनिषेधयोः॥
 समानफलतावाप्यतेसामान्यविशेषन्यायेसंपादयितुं ३ एवंमतभेदमुपन्यस्यस्वमतंकथयितुमाह निश्चयमिति तत्रैवंविप्रतिपन्नेत्यागेनि
 श्चयंमेवचनाच्छृणुत्यागस्यलोकप्रसिद्धत्वात् किमत्रश्रोतव्यमितिमावमंस्थाइत्याह हेपुरुषव्याघ्रपुरुषेषुश्रेष्ठत्यागोयंदुर्बोधः हियस्मादयंकर्मत्या
गःतत्त्वविद्भिस्तामसादिभेदेनत्रिविधःसम्यक्विवेकेनप्रकीर्तितः ४ त्रैविध्यंतुनियतस्यतुसंन्यासःकर्मणइत्यादिनावक्ष्यति प्रथमंतावन्निश्चयमाह॥
यज्ञदानेतिद्वाभ्यांमनीषिणांविवेकिनांपावनानिचित्तशुद्धिकराणि ५ एतेनप्रकारेणकृतानिएतानिपावनानिभवंति तंप्रकारंदर्शयन् आहएता

यज्ञदानतपःकर्मनत्याज्यमितिचापरे ३ निश्चयंशृणुमेतत्रत्यागेभरतसत्तम त्यागोहिपुरुषव्याघ्रत्रिविधःसंप्रकीर्तितः
४ यज्ञदानतपःकर्मनत्याज्यंकार्यमेवतत् यज्ञोदानंतपश्चैवपावनानिमनीषिणां ५ एतान्यपितुकर्माणिसंगंत्यक्त्वाफला
निच कर्तव्यानीतिमेपार्थनिश्चितंमतमुत्तमम् ६ नियतस्यतुसंन्यासःकर्मणोनोपपद्यते मोहात्तस्यपरित्यागस्तामसःप

न्यपीतियानियज्ञादीनिकर्माणिमयापावनानिइत्युक्तं एतान्येवकर्तव्यानिकथंसंगंकर्तृत्वाभिनिवेशंत्यक्त्वाकेवलमीश्वरा रिकीर्तितः ७॥
राधनतयाकर्तव्यानिफलानिचत्यक्त्वाकर्तव्यानिइतिनिश्चितंमेममतं अतएवसर्वोत्तमं ६ प्रतिज्ञातंत्यागस्यत्रैविध्यमिदानींदर्शयति नियतस्ये राम
तित्रिभिः काम्यस्यकर्मणोबंधकत्वात् संन्यासोयुक्तः नियतस्यतुनित्यस्यपुनःकर्मणः संन्यासस्त्यागोनोपपद्यते सत्त्वशुद्धिद्वारामोक्षहेतुत्वात् अत ८०
स्तस्यपरित्यागउपादेयेपित्याज्यमित्येवंलक्षणात् मोहादेवभवेत् सचमोहस्यतामसत्वात् तामसःपरिकीर्तितः॥ ७ ॥ ६ ॥ ❋ ॥

अत्रचार्थवादानुपपत्त्याविधिःकल्प्यतेविधेयंस्तूयतेवस्त्वितिन्यायात् अपरेतुप्रवर्त्ततेविधानोक्ताःक्रियंतेमोक्षकांक्षिभिरित्यादिवर्त्तमानोपदेशः समिधो
यजतीत्यादिवद्विधितयापरिणामनीयइत्याहुः तत्तुसद्भावेसाधुभावेचेत्यादिषुप्राप्तार्थत्वात् नसंगच्छतइतिपूर्वोक्तक्रमेणविधिकल्पनैवज्याय
सी २७ इदानींसर्वकर्मसुश्रद्धयैवप्रवृत्त्यर्थमश्रद्धयाकृतंसर्वंनिंदति अश्रद्धयेति अश्रद्धयाहुतंहवनंदत्तंदानंतपस्तप्तंनिवर्त्तितंत
पःयच्चान्यदपिकृतंकर्मतत्सर्वमसदित्युच्यते यतःतत्प्रेत्यपरत्रलोकांतरेणफलतिविगुणत्वात् नोइहनचास्मिंल्लोकेफलति अयशस्करत्वात् २८ रज
स्तमोमयींत्यक्त्वाश्रद्धांसत्वमयींश्रितः तत्वज्ञानेधिकारीस्यादितिसप्तदशेस्थितं॥ ॥इतिश्रीसुबोधिन्यांटीकायांसप्तदशोऽध्यायः॥१७॥ ॥

अश्रद्धयाहुतंदत्तंतपस्तप्तंकृतंचयत् असदित्युच्यतेपार्थनचतत्प्रेत्यनोइह॥२८॥ ॥इतिश्रीभगवद्गीतासुउपनिषत्सुब्र
ह्मविद्यायांयोगशास्त्रेश्रीकृष्णार्जुनसंवादेश्रद्धाविवेकयोगोनामसप्तदशोऽध्यायः॥ १७ ॥ ॥अर्जुनउवाच॰ सं
न्यासस्यमहाबाहोतत्वमिच्छामिवेदितुं त्यागस्यचहृषीकेशपृथक्केशिनिसूदन॥१॥ ॥१८न्यासत्यागविभागेनसर्वगीतार्थसं

ग्रहं स्फुटमष्टादशेप्राहपरमार्थविनिर्णये १ अत्रचसर्वकर्माणिमनसासंन्यस्यास्तेसुखंवशीसंन्यासयोगयुक्तात्मेत्यादिषुकर्मसंन्यासउपदिष्टःतथा त्यक्त्वाक
र्मफलासंगंनित्यतृप्तोनिराश्रयःसर्वकर्मफलत्यागंततःकुरुयतात्मवोनित्यादिषुचफलमात्रत्यागेनकर्मानुष्ठानमुपदिष्टं नचपरस्परविरुद्धंसर्वज्ञःपरमका
रुणिकःश्रीभगवानुपादिशत् अतःकर्मसंन्यासस्यतदनुष्ठानस्यचअविरोधप्रकारंबुभुत्सुरर्जुनउवाच संन्यासस्येतिभोहृषीकेशसर्वेंद्रियनियामकहेकेशि
निसूदन केशिनाम्नोहिमहतोहयाकृतेर्दैत्यस्ययुद्धेमुखंव्यादायभक्षयितुमागतस्यातंतंव्यात्तेमुखेवामबाहुंप्रवेश्यतत्क्षणमेवविवृद्धेनतेनैवबाहुनाकर्कटि
काफलवत्तंविदार्यनिसूदितवान् अतएवहेमहा॥

अनिष्टंनारकित्वंइष्टंदेवत्वंमिश्रंमनुष्यत्वंएवंत्रिविधंपापस्यपुण्यस्यचोभयमिश्रस्यचकर्मणोयेत्फलंप्रसिद्धंतत्सर्वमत्यागिनांसकामानामेवप्रेत्यपरत्र भवति तेषांत्रिविधकर्मफलसंभवात् नतुसंन्यासिनांक्वचिदपिभवति संन्यासिशब्देनात्रफलत्यागसाम्यात् प्राप्तताः कर्मफलत्यागिनोगृह्यंते अनाश्रितः कर्मफलंकार्यंकर्मकरोति यःससंन्यासीचयोगीचेत्येवमादौचफलत्यागिषुसंन्यासिशब्दप्रयोगदर्शनात् तेषांसात्विकानांपापासंभवात् ईश्वरार्पणेन चपुण्यफलस्यत्यक्तत्वात् त्रिविधमपिकर्मफलंनभवतीत्यर्थः १२ ननुकर्मकुर्वतः कर्मफलंकथंनभवेदित्याशंक्यसंगत्यागिनोनिरहंकारस्यसतः कर्मफलेनलेपोनास्तीत्युपपादयितुमाह पंचेतिपंचभिः सर्वकर्मणांसिद्धयेनिष्पत्तये एतानिवक्ष्यमाणानिपंचकारणानिमेवचनान्निबोधजानीहि ॥ आत्मनः कर्तृत्वाभिमाननिवृत्त्यर्थमवश्यमेतानिज्ञातव्यानीत्येवंतेषांस्तुत्यर्थमाह सम्यक्ख्यायतेज्ञायतेपरमात्मानेनेतिसांख्यं कृतंकर्मतस्यांतः समा॥

भवत्यत्यागिनांप्रेत्यनतुसंन्यासिनांक्वचित् १२ पंचैतानिमहाबाहोकारणानिनिबोधमे सांख्येकृतांतेप्रोक्तानिसिद्धयेसर्वकर्मणा
म् १३ अधिष्ठानंतथाकर्त्ताकरणंचपृथग्विधं विविधाश्चपृथक्चेष्टादैवंचैवात्रपंचमं १४ शरीरवाङ्मनोभिर्यत्कर्मप्रारभतेनरः न्या
य्यंवाविपरीतंवापंचैतस्यहेतवः १५॥

प्तिरस्मिन्वेदांतसिद्धांतइत्यर्थः यद्वासंख्यायंतेगण्यंतेतत्त्वान्यस्मिन्निति सांख्यंकृतः अंतोनिर्णयोयस्मिन्निति कृतांतंसांख्यशास्त्रमेवतस्मिन्प्रोक्तानिअतः सम्यक्निबोधइत्यर्थः १३ तान्येवाह अधिष्ठानमिति अधिष्ठानंशरीरंकर्त्ताचिज्जडग्रंथिरहंकारः पृथग्विधंअनेकप्रकारंकरणंचक्षुःश्रोत्रादिविविधाश्चकार्यतः स्वरूपतश्चपृथग्भूताश्चेष्टाःप्राणापानादीनांव्यापाराः अत्र एतेष्वेवदैवंचपंचमंकारणंचक्षुराद्यनुग्राहकमादित्यादिसर्वप्रेरकोंतर्यामीच १४ एतेषामेवसर्वकर्महेतुत्वमाह शरीरेति यथोक्तैः पंचभिः प्रारभ्यमाणंकर्मत्रिष्वेवांतर्भाव्यंशरीरवाङ्मनोभिरित्युक्तं शारीरं।वाचिकंमानसंचत्रिविधंकर्मेतिप्रसिद्धेः शरीरादिभिर्यत् यत्कर्मधर्म्यमधर्म्यंवाकरोतिनरः तस्यसर्वस्यकर्मणः एतेपंचहेतवः १५॥

ततः किमतस्राह तत्रैवमिति तत्र सर्वस्मिन् कर्मणि एते पंच हेतवः इत्येवं सति केवलं निरुपाधिकमसंगमात्मानं तु यः कर्तारं पश्यति शास्त्राचार्योपदेशाभ्यामसंस्कृतबुद्धित्वात् दुर्मतिरसौ सम्यक् न पश्यति १६ कस्तर्हि सुमतिर्यस्य कर्मलेपो नास्तीत्युक्तमित्यपेक्षायामाह यस्येति अहमिति कृतो हं कर्तेत्येवं भूतो भावः अभिप्रायो यस्य नास्ति यद्वा अहंकृतो ऽहंकारस्य यः स्वभावः कर्तृत्वाभिनिवेशो यस्य नास्ति शरीरादीनामेव कर्मकर्तृत्वालोचनादित्यर्थः अत एव बुद्धिर्यस्य न लिप्यते इष्टानिष्टबुद्ध्या कर्मसु न सज्जते अत एवंभूतो देहादिव्यतिरिक्तात्मदर्शी इमांल्लोकान् सर्वानपि प्राणिनो लोकदृष्ट्या हत्वापि विविक्तया स्वदृष्ट्या न हंति न च तत्फलैर्निवध्यते वंधेन प्राप्नोति किंपुनः सत्वशुद्धिद्वारा अपरोक्षज्ञानोत्पत्तिहेतुभिः कर्मभिस्तस्य वंधशंकेत्यर्थः तदुक्तं ब्रह्मण्याधाय कर्माणि संगं त्यक्त्वा करोति यः लिप्यते न स पापनेति १७ हत्वापि न हंति न निवध्यते इत्येतदेवोपपादयितुं कर्मचोदनायाः कर्माश्रयस्य च कर्मफलादीनां

तत्रैवं सति कर्तारमात्मानं केवलं तु यः पश्यत्यकृतबुद्धित्वान्न स पश्यति दुर्मतिः १६ यस्य नाहंकृतो भावो बुद्धिर्यस्य न लिप्यते हत्वापि स इमांल्लोकान्न हंति न निवध्यते १७ ज्ञानं ज्ञेयं परिज्ञाता त्रिविधा कर्मचोदना करणं कर्म कर्तेति त्रिविधः कर्मसंग्रहः १८ ॥

च त्रिगुणात्मकत्वान्निर्गुणस्यात्मनः तत्संबंधो नास्तीत्यभिप्रायेण कर्मचोदनां कर्माश्रयं चाह ज्ञानमिति ज्ञानमिष्टसाधनमेतदिति वोधः ज्ञेयमिष्टसाधनं कर्म परिज्ञाता एवंभूतो ज्ञानाश्रयः एवं त्रिविधा कर्मचोदना चोद्यते प्रवर्त्यते ऽनयेति चोदना ज्ञानादित्रितयं कर्मप्रवृत्तिहेतुरित्यर्थः यद्वा चोदनेति विधिरुच्यते तदुक्तं भट्टैः चोदना चोपदेशश्च विधिश्चैकार्थवाचिन इति ततश्चायमर्थः उक्तलक्षणं त्रिगुणात्मकं ज्ञानादित्रयमवलंब्य कर्मविधिरुच्यते प्रवर्तत इति तदुक्तं त्रैगुण्यविषया वेदा इति करणमिति तथा च करणं साधकतमं कर्म च कर्तुरीप्सिततमं कर्ता क्रियानिर्वर्तकः कर्म संगृह्यते अस्मिन्निति कर्मसंग्रहः करणादित्रिविधं कारकं क्रियाश्रय इत्यर्थः संप्रदानादिकारकत्रयं तु परंपरया क्रियानिर्वर्तकमेव केवलं न तु साक्षात् क्रियाया आश्रयः अतः करणादित्रि

ततः किमत आह ज्ञानमिति गुणाः सम्यक् कार्यभेदेन संख्यायंते प्रतिपाद्यंते स्मिन्निति गुणसंख्यानं सांख्यशास्त्रं तस्मिन् ज्ञानं कर्म क्रिया कर्ता च प्रत्येकं सत्त्वादिगुणभेदेन त्रिधैव उच्यते तान्यपि ज्ञानादीनि वक्ष्यमाणानि यथावत् शृणु त्रिधैवेत्येवकारो गुणत्रयादिव्यतिरेकेणात्मनः स्वतः कर्मादिप्रतिषेधार्थः चतुर्दशे ध्याये तत्र सत्त्वं निर्मलत्वादित्यादिना गुणानां बंधकत्वप्रकारो निरूपितः सप्तदशे ध्याये यजंते सात्विका देवानित्यादिना गुणकृतं त्रिविधस्वभावनिरूपणेन राजसतामसस्वभावं परित्यज्य सात्विकाहारादि सेवया सात्विकः स्वभावः संपादनीय इत्युक्तं इह तु क्रियाकारकफलादीनामात्मसंबंधो नास्तीति दर्शयितुं सर्वेषां त्रिगुणात्मकत्वमुच्यत इति विशेषो ज्ञातव्यः १९ तत्र ज्ञानस्य सात्विकादित्रैविध्यमाह सर्वभूतेष्विति त्रिभिः सर्वभूतेषु ब्र

ज्ञानं कर्म च कर्ता च त्रिधैव गुणभेदतः प्रोच्यते गुणसंख्याने यथावच्छृणु तान्यपि १९ सर्वभूतेषु येनैकं भावमव्ययमीक्षते अविभक्तं विभक्तेषु तज्ज्ञानं विद्धि सात्विकं २० पृथक्त्वेन तु यज्ज्ञानं नानाभावान्पृथग्विधान् वेत्ति सर्वेषु भूतेषु तज्ज्ञानं विद्धि राजसं २१ यत्तु कृत्स्नवदेकस्मिन्कार्ये सक्तमहेतुकं अतत्त्वार्थवदल्पं च तत्तामसमुदाहृतं २२ ॥ ❋ ॥ ६ ॥ ❋ ॥

ह्मादिस्थावरांतेषु विभक्तेषु परस्परं व्यावृत्तेषु अविभक्तमनुस्यूतमेकमव्ययं निर्विकारं भावं परमात्मतत्त्वं येन ज्ञानेन ईक्षते आलोचयति तत् ज्ञानं सात्विकं विद्धि २० राजसं ज्ञानमाह पृथक्त्वेनेति पृथक्त्वेन तु यज्ज्ञानमित्यस्यैव विवरणं सर्वेषु भूतेषु देहेषु नानाभावान् वस्तुत एवानेकान् क्षेत्रज्ञान् पृथग्विधान् सुखित्वदुःखित्वादिरूपेण विलक्षणान् येन ज्ञानेन वेत्ति तत् ज्ञानं राजसं विद्धि २१ नामसंज्ञानमाह यत्त्विति यत्तु एकस्मिन् कार्ये देहे प्रतिमादौ वा कृत्स्नवत् परिपूर्णवत् सक्तं एतावानेवात्मा ईश्वरो वेति अभिनिवेशयुक्तं अहेतुकं निरुपपत्तिकं अतत्त्वार्थवत् परमार्थावलंबनशून्यं ॥ ६ ॥ अत एव चाल्पं तुच्छमल्पविषयत्वादल्पफलत्वाच्च यदेवंभूतं ज्ञानं तत्तामसमुदाहृतं ॥२२॥ २२॥ २२ २२ २२ २२ २२ ॥ ३२ ३२ २२ २२॥ ॥

राजसंत्यागमाह दुःखमिति अकर्तात्मबोधं विना केवलं दुःखमित्येवं ज्ञात्वा शरीरायासभयात् नित्यं कर्म त्यजेदिति यत् तादृशस्त्यागो राजसः दुःखस्य राजसत्वा
त् अतस्तं राजसं त्यागं कृत्वा राजसः पुरुषस्त्यागस्य फलं ज्ञाननिष्ठालक्षणं नैव लभेतेत्यर्थः ८ सात्विकं त्यागमाह कार्यमिति कार्यमित्येवं बु
द्ध्या नियतं अवश्यं कर्तव्यतया विहितं कर्म संगं फलं च त्यक्त्वा क्रियत इति यत् तादृशस्त्यागः सात्त्विको मतः ९ एवंभूतसात्विकत्यागपरिनिष्ठितस्य लक्ष
णमाह नद्वेष्टीति सत्वसमाविष्टः सत्वेन सव्याप्तः सात्विकत्यागी अकुशलं दुःखावहं शिशिरे प्रातः स्नानादिकं कर्म न द्वेष्टि कुशले च सुखकरे कर्मणि
निदाघे मध्यान्हस्नानादौ नानुषज्जते प्रीतिं न करोति तत्र हेतुर्मेधावी स्थिरबुद्धिः यत्र परिभवादिमहदपि दुःखं सह्यते स्वर्गादिसुखं च त्यज्यते तत्रा

दुःखमित्येव यत्कर्म कायक्लेशभयात्त्यजेत् स कृत्वा राजसं त्यागं नैव त्यागफलं लभेत् ८ कार्यमित्येव यत्कर्म नियतं क्रियते
र्जुन संगं त्यक्त्वा फलं चैव स त्यागः सात्त्विको मतः ९ न द्वेष्ट्यकुशलं कर्म कुशले नानुषज्जते त्यागी सत्वसमाविष्टो मे
धावी छिन्नसंशयः १० न हि देहभृता शक्यं त्यक्तुं कर्माण्यशेषतः यस्तु कर्मफलत्यागी स त्यागीत्यभिधीयते ११ अनिष्टमिष्टं मि
श्रं च त्रिविधं कर्मणः फलं ॥ ९ कियदेतत् तात्कालिकं सुखं दुःखं चेत्येवमनुसंधानवानित्यर्थः अत एव छिन्नः संशयो देहादि अध्यास

मिथ्याज्ञानं दैहिकं सुखदुःखयोरुपादित्सापरिजिगीषालक्षणं यस्य सः १० नन्वेवंभूतात्कर्मफलत्यागाद्वरं सर्वकर्मत्यागः तस्मिन् सति कर्मवि
क्षेपाभावे न ज्ञाननिष्ठा सुखं संपद्यते तत्राह नहीति देहभृता देहात्माभिमानवता निःशेषेण सर्वाणि कर्माणि त्यक्तुं न हि शक्यं तदुक्तं न हि
कश्चित्क्षणमपि जातु तिष्ठत्यकर्मकृत् इत्यादिना तस्माद्यस्तु कर्माणि कुर्वन्नेव कर्मफलत्यागी स एव मुख्यस्त्यागीत्यभिधीयते ॥ ११ ॥ ९ ॥
एवंभूतस्य कर्मफलत्यागस्य फलमाह अनिष्टमिति ॥

तामसंकर्त्तारमाह अयुक्तइति अयुक्तः अनवहितः प्राकृतो विवेकशून्यः स्तब्धः अनम्रः शठः शक्तिगूहनकारी नैष्कृतिकः परावमानी अलसः अ
नुद्यमशीलः विषादी शोकशीलः यदद्यवाश्वोवा कार्यंतन्मासेनापिनसंपादयति यः सदीर्घसूत्री एवंभूतः कर्त्ता तामसः कर्त्तृत्रैविध्ये नैवज्ञानुरपि
त्रैविध्यमुक्तं कर्मत्रैविध्येनचज्ञेयस्यापित्रैविध्यमुक्तंवेदितव्यं बुद्धेस्त्रैविध्येनकरणस्याप्युक्तंभविष्यति २८ इदानीं बुद्धेर्धृतेश्चापित्रैविध्यंप्र
तिजानीत बुद्धेरितिस्पष्टार्थः २९ तत्रबुद्धेस्त्रैविध्यमाह प्रवृत्तिंचेतित्रिभिः प्रवृत्तिं धर्मंनिवृत्तिमधर्मंयस्मिन्देशकालेचयत्कार्यमकार्यंचभ

अयुक्तःप्राकृतःस्तब्धःशठोनैष्कृतिकोलसः विषादीदीर्घसूत्रीचकर्त्तातामसउच्यते २८ बुद्धेर्भेदंधृतेश्चैवगुणतस्त्रिविधं।
शृणु प्रोच्यमानमशेषेणपृथक्त्वेनधनंजय २९ प्रवृत्तिंचनिवृत्तिंचकार्याकार्येभयाभयेबंधंमोक्षंचयावेतिबुद्धिःसापार्थ
सात्विकी ३० ययाधर्ममधर्मंचकार्यंचाकार्यमेवच अयथावत्प्रजानातिबुद्धिःसापार्थराजसी ३१ अधर्मंधर्ममितिया
मन्यतेतमसावृता सर्वार्थान्विपरीतांश्चबुद्धिःसापार्थतामसी ३२ धृत्यायया धारयतेमनःप्राणेंद्रियक्रियाः योगेनाव्यभिचारि
ण्याधृतिःसापार्थसात्विकी ३३॥ भयाभयेकार्यंच भयाभयेकार्याकार्यनिमित्तावर्थानर्थौकथंबंधःकथंवामोक्षइतियाबुद्धिरंतःक
रणंवेत्तिसासात्विकी ययापुमान्वेत्तिइतिवक्तव्येकरणेकर्त्तृत्वोपचारःकाष्ठानिपचंतीतिवत् ३० राजसींबुद्धिमाह ययेति अयथावत्संदे
हास्पदत्वेनेत्यर्थःस्पष्टमन्यत् ३१ तामसींबुद्धिमाह तथा अधर्ममिति विपरीतग्राहिणीबुद्धिस्तामसीत्यर्थः बुद्धिरंतःकरणंपूर्वोक्तंतस्यानंतुत
वृत्तिः धृतिरपितद्वृत्तिरेवयद्वा अंतःकरणस्यधर्मिणोबुद्धिरध्यवसायलक्षणावृत्तिरेव इच्छाद्वेषादीनांतद्वृत्तीनांबहुत्वेपिधर्माधर्मभयसाधन
त्वेनप्राधान्यादेतासांत्रैविध्यमुक्तंउपलक्षणंचैतदन्यासां ३२ इदानींधृतेस्त्रैविध्यमाह धृत्येतित्रिभिः योगेनचित्तैकाग्र्येणहेतुना अव्यभिचारिण्या

राजसीं धृतिमाह ययेति ययाधृत्या धर्मार्थकामान् प्राधान्येन धारयते न विमुंचति तत्प्रसंगेन फलाकांक्षी च भवति सा राजसी धृतिः ३४ तामसीं
धृतिमाह ययेति दुष्टा विवेकबहुला मेधा यस्य स दुर्मेधाः पुरुषो यया धृत्या स्वप्नादीन् न विमुंचति पुनः पुनरावर्त्तयति स्वप्नोऽत्र निद्रा सा धृतिस्ताम
सी ३५ सुखस्य त्रैविध्यं प्रतिजानीतेऽर्धेन सुखमिति स्पष्टार्थः तत्र सात्विकं सुखमाह अभ्यासादिति सार्धेन यत्र यस्मिन् सुखेऽभ्यासादतिपरिचयाद्रम
ते न तु विषयसुखइव सहसा रतिं प्राप्नोति यस्मिन् रममाणश्च दुःखस्यांतमवसानं नितरां गच्छति ३६ कीदृशं तत् यत्तदिति यत्तत् किमपि अग्रे प्रथमं

ययातु धर्मकामार्थान्धृत्या धारयतेऽर्जुन प्रसंगेन फलाकांक्षी धृतिः सा पार्थ राजसी ३४ यया स्वप्नं भयं शोकं विषादं मदमे
व च न विमुंचति दुर्मेधा धृतिः सा पार्थ तामसी ३५ सुखं त्विदानीं त्रिविधं शृणु मे भरतर्षभ अभ्यासाद्रमते यत्र दुःखांतं च निगच्छति ३६
यत्तदग्रे विषमिव परिणामेऽमृतोपमं तत्सुखं सात्विकं प्रोक्तमात्मबुद्धिप्रसादजं ३७ विषयेंद्रियसंयोगाद्यत्तदग्रेऽमृतोपमं परिणा
मे विषमिव तत्सुखं राजसं स्मृतं ३८ यदग्रे चानुबंधे च सुखं मोहनमात्मनः निद्रालस्यप्रमादोत्थं तत्तामसमुदाहृतं ३९ ॥ विषमिव मनः

संयमाधीनत्वात् दुःखावहमिव भवति परिणामे त्वमृतसदृशं आत्मविषया या बुद्धिस्तस्याः प्रसादो रजस्तमसोर्मलत्यागेन स्वच्छतया वस्थानं ततो
यत् जातं सुखं तत् सात्विकं प्रोक्तं योगिभिः ३७ राजसं सुखमाह विषयेंद्रियेति विषयाणामिंद्रियाणां च संयोगात् यत्तत्प्रसिद्धं स्त्रीसंगादिसुखं अमृ
तमुपमा यस्य तादृशं भवति अग्रे प्रथमं परिणामे विषतुल्यं इहामुत्र च दुःखहेतुत्वात् तत्सुखं राजसं स्मृतं ३८ तामसं सुखमाह यदग्रे इति अग्रे प्रथ
मक्षणे अनुबंधे च पश्चादपि यत्सुखं मोहनं मात्मनो मोहकारणं तदेवाह निद्रा च आलस्यं च प्रमादश्च कर्त्तव्यार्थावधानराहित्येन मनोराज्यं एतेभ्य
उत्तिष्ठति यत्सुखं तत्तामसमुदाहृतं ३९ ॥

अनुक्तमपि संगृह्णन्प्रकरणार्थमुपसंहरति न तदस्तीति एभिः प्रकृतिसंभवैः सत्त्वादिभिस्त्रिभिर्गुणैर्मुक्तं हीनं सत्त्वं प्राणिजातमन्यद्वा यस्यात् तत्पृथिव्यां मनुष्यलोकादिषु दिवि देवेषु च क्वापि नास्तीत्यर्थः ४० ननु च यद्येवं सर्वमपि क्रियाकारकफलादिकं प्राणिजातं च त्रिगुणात्मकमेव कथं तर्हि अस्य मोक्ष इत्यपेक्षायां स्वस्वाधिकारविहितैः कर्मभिः परमेश्वराधनात्तत्प्रसादलब्धज्ञानेनेत्येवं सर्वगीतार्थसारं संगृह्य दर्शयितुं प्रकरणांतरमारभते ब्राह्मणेत्यादि यावत्समाप्तिः हे परंतप शत्रुतापन ब्राह्मणानां क्षत्रियाणां विशां च शूद्राणां च कर्माणि प्रविभक्तानि प्रकर्षेण विभागतो विहितानि शूद्राणां समासात्पृथक्करणं द्विजत्वाभावेन वैलक्षण्यात् विभागोपलक्षणमाह स्वभावः सात्त्विकादिः प्रभ

न तदस्ति पृथिव्यां वा दिवि देवेषु वा पुनः सत्त्वं प्रकृतिजैर्मुक्तं यदेभिः स्यात्त्रिभिर्गुणैः ४० ब्राह्मणक्षत्रियविशां शूद्राणां च परंतप कर्माणि प्रविभक्तानि स्वभावप्रभवैर्गुणैः ४१ शमो दमस्तपः शौचं क्षांतिरार्जवमेव च ज्ञानं विज्ञानमास्तिक्यं ब्रह्मकर्म स्वभावजं ४२ शौर्यं तेजो धृतिर्दाक्ष्यं युद्धे चाप्यपलायनं दानमीश्वरभावश्च क्षात्रं कर्म स्वभावजं ४३ कृषिगोरक्ष्यवाणिज्यं वैश्य ((कर्म स्वभावजं ॥

वति प्रादुर्भवति येभ्यस्तैर्गुणैरुपलक्षणभूतैः यद्वा स्वभावः पूर्वजन्मसंस्कारस्तस्मात्प्रादुर्भूतैरित्यर्थः तत्र सत्त्वप्रधाना ब्राह्मणाः सत्त्वोपसर्जनरजःप्रधानाः क्षत्रियाः तमउपसर्जनरजःप्रधाना वैश्याः तमःप्रधानाः शूद्राः तत्र ब्राह्मणस्य स्वाभाविकानि कर्माण्याह शम इति शमश्चित्तोपरमः दमो बाह्येंद्रियोपरमः तपः पूर्वोक्तं शारीरादि शौचं बाह्यमाभ्यंतरं च क्षांतिः क्षमा आर्जवमवक्रता ज्ञानं शास्त्रीयं विज्ञानमनुभवः आस्तिक्यमस्ति परलोक इति निश्चयः एतच्छमदमादि ब्राह्मणस्य स्वभावाज्जातं कर्म ४२ क्षत्रियस्य स्वाभाविकं कर्माह शौर्यमिति शौर्यं पराक्रमः तेजः प्रागल्भ्यं धृतिर्धैर्यं दाक्ष्यं कौशल्यं युद्धे चापि अपलायनं अपराङ्मुखता दानमौदार्यमीश्वरभावो नियमनशक्तिः एतत्क्षत्रियस्य स्वभावजं कर्म ४३

इदानीं त्रिविधं कर्माह नियतमिति त्रिभिः नियतं नित्यतया विहितं संगरहितमभिनिवेशशून्यं अरागद्वेषतः पुत्रादिप्रीत्या वा शत्रुद्वेषेण
वा यत्कृतं न भवति फलं प्राप्तुमिच्छतीति फलप्रेप्सुः तद्विलक्षणेन निष्कामेन कर्त्रा यत्कृतं कर्म तत्सात्विकमुच्यते २३ राजसं कर्माह यत्त्विति यत्तु क
र्मकामेप्सुना फलं प्राप्तुमिच्छता साहंकारेण वा मत्समः कोन्यः श्रोत्रियोऽन्योऽस्तीत्येवं निरूढाहंकारयुक्तेन च क्रियते यच्च बहुलायासं अतिक्लेशयु
क्तं तत्कर्म राजसमुदाहृतं २४ तामसं कर्माह अनुबंधमिति अनुबध्यत इत्यनुबंधः पश्चाद्भावि शुभाशुभं क्षयं वित्तव्ययं हिंसां परपीडां च पौरुषं

नियतं संगरहितमरागद्वेषतः कृतं अफलप्रेप्सुना कर्म यत्तत्सात्विकमुच्यते २३ यत्तु कामेप्सुना कर्म साहंकारेण वा
पुनः क्रियते बहुलायासं तद्राजसमुदाहृतं २४ अनुबंधं क्षयं हिंसामनवेक्ष्य च पौरुषं मोहादारभ्यते कर्म तत्तामसमुदाहृ
तं २५ मुक्तसंगोनहंवादी धृत्युत्साहसमन्वितः सिद्ध्यसिद्ध्योर्निर्विकारः कर्ता सात्विक उच्यते २६ रागी कर्मफलप्रेप्सुर्लुब्धो हिं
सात्मकोऽशुचिः हर्षशोकान्वितः कर्ता राजसः परिकीर्तितः २७॥ ((स्वसामर्थ्यं चानवेक्ष्यापर्यालोच्य केवलं मोहादेव यत्कर्मारभ्यते
तत्कर्म तामसमुच्यते उदाहृतं २५ कर्तारं त्रिविधमाह मुक्तसंग इति त्रिभिः मुक्तसंगस्त्यक्ताभिनिवेशः अनहंवादी गर्वोक्तिरहितः धृति
र्धैर्यमुत्साह उद्यमस्ताभ्यां समन्वितः संयुक्तः आरब्धस्य कर्मणः सिद्धावसिद्धौ च निर्विकारः हर्षविषादशून्यः एवंभूतः कर्ता सात्विक उच्यते
२६ राजसं कर्तारमाह रागीति रागी पुत्रादिषु प्रीतिमान् कर्मफलप्रेप्सुः कर्मफलकामी लुब्धः परस्वाभिलाषी हिंसात्मको मारकस्वभा
वः अशुचिर्विहितशौचशून्यः लाभालाभयोर्हर्षशोकाभ्यामन्वितः कर्ता राजसः परिकीर्तितः २७ ॥ ९ ॥ ❀ ॥ ९ ॥ ❀ ॥

ननु कथं कर्मणि क्रियमाणे दोषांशप्रहाणेन गुणांश एव कथं संपत्स्यत इत्यपेक्षायामाह असक्तेति असक्ता संगशून्या बुद्धिर्यस्य जितात्मा निरहंकारः वि
गतस्पृहः फलविषयेच्छा यस्मात्स एवंभूतेन सत्यागः सात्विको मत इत्येवं पूर्वोक्तेन कर्मासक्तितत्फलयोस्त्यागलक्षणेन संन्यासेन नैष्कर्म्यसिद्धिं सर्वकर्मनिवृत्ति
लक्षणां सिद्धिं सत्वशुद्धिमधिगच्छति यद्यपि संगफलयोस्त्यागेन कर्मानुष्ठानमपि नैष्कर्म्यमेव कर्तृत्वाभिनिवेशाभावात् तदुक्तं नैव किंचित्करोमीति युक्तो
मन्येत तत्त्वविदित्यादि श्लोकचतुष्टयेन तथापि अनेनोक्तलक्षणेन संन्यासेन परमां नैष्कर्म्यसिद्धिं सर्वकर्माणि मनसा संन्यास्ते सुखं वशीत्येवं लक्षणां पारम

। असक्तबुद्धिः सर्वत्र जितात्मा विगतस्पृहः नैष्कर्म्यसिद्धिं परमां संन्यासेनाधिगच्छति ४९ सिद्धिं प्राप्तो यथा ब्रह्म तथाप्नोति
निबोध मे समासेन तु कौंतेय निष्ठा ज्ञानस्य या परा ५० बुद्ध्या विशुद्धया युक्तो धृत्यात्मानं नियम्य च शब्दादीन्विषयांस्त्यक्त्वा रा
गद्वेषौ व्युदस्य च ५१ विविक्तसेवी लघ्वाशी यतवाक्कायमानसः ध्यानयोगपरो नित्यं वैराग्यं समुपाश्रितः ५२ ॥ हंसपरपर्यायां

प्राप्नोति ४९ एवंभूतस्य परमहंसस्य ज्ञाननिष्ठया ब्रह्मभावे प्रकारमाह सिद्धिं प्राप्त इति षड्भिः नैष्कर्म्यसिद्धिं प्राप्तः सन् यथा येन प्रकारेण ब्रह्म प्राप्नोति तथा तं प्र
कारं संक्षेपेणैव मे वचनान्निबोध तदेवाह बुद्ध्येति उक्तेन प्रकारेण विशुद्धया पूर्वोक्तया सात्विकबुद्ध्या युक्तः धृत्या सात्विकया आत्मानं तामेव बुद्धिं नियम्य नि
श्चलां कृत्वा शब्दादीन्विषयान्त्यक्त्वा तद्विषयौ रागद्वेषौ च व्युदस्य बुद्ध्या विशुद्धया युक्त इत्यादीनां ब्रह्मभूयाय कल्पते इति तृतीयेनान्वयः ५१ किंच विविक्ते
ति विविक्तसेवी शुद्धदेशावस्थायी लघ्वाशी मितभोजी एतैरुपायैर्यतवाक्कायमानसः संयतवाग्देहचित्तो भूत्वा नित्यं सर्वदा ध्यानेन योगो ब्रह्मसंस्पर्शी
तत्परः सन् ध्यानविच्छेदार्थं पुनः पुनर्दृढवैराग्यं सम्यगुपाश्रितो भूत्वा ५२ ॥ ६ ॥

किंच अहंकारमिति ततश्च विविक्तोऽहमित्याद्यहंकारं बलं दुराग्रहं दर्पं योगबलादुन्मार्गप्रवृत्तिलक्षणं प्रारब्धवशात् प्राप्यमाणेष्वपि विषयेषु का
मक्रोधं परिग्रहं च विमुच्य विशेषेणात्यक्त्वा बलादापन्नेषु निर्ममः सन् शांतः परमामुपशांतिं प्राप्नोति ब्रह्मभूयाय ब्रह्माहमिति नैश्चल्येनावस्थानाय क
ल्पते योग्यो भवति ५३ ब्रह्माहमिति नैश्चल्येनावस्थानस्य फलमाह ब्रह्मभूत इति ब्रह्मभूतो ब्रह्मण्यवस्थितः प्रसन्नचित्तो नष्टं न शोचति न चाप्राप्तं
कांक्षति देहाद्यभिमानाभावात् अत एव सर्वेष्वपि भूतेषु समः सन् रागद्वेषादिकृतविक्षेपाभावात् सर्वभूतेषु मद्भावनालक्षणां परां मद्भक्तिं।

अहंकारं बलं दर्पं कामं क्रोधं परिग्रहं विमुच्य निर्ममः शांतो ब्रह्मभूयाय कल्पते ५३ ब्रह्मभूतः प्रसन्नात्मा न।
शोचति न कांक्षति समः सर्वेषु भूतेषु मद्भक्तिं लभते परां ५४ भक्त्या मामभिजानाति यावान्यश्चास्मि तत्वतः ततो मां
तत्वतो ज्ञात्वा विशते तदनंतरं ५५ सर्वकर्माण्यपि सदा कुर्वाणो मद्व्यपाश्रयः मत्प्रसादादवाप्नोति शाश्वतं पदमव्ययं ५६

लभते ५४ ततश्च भक्त्या मामिति तया च परया भक्त्या तत्वतो मामभिजानाति कथंभूतं यावान् सर्वव्यापी यश्चास्मि सच्चिदानंदघनः तथा
भूतं ततश्च मामेवं तत्वतो ज्ञात्वा तदनंतरं तस्या ज्ञानस्योपरमे सति मां विशते परमानंदरूपो भवतीत्यर्थः ५५ स्वकर्मभिः परमेश्वराराधना
दुक्तं मोक्षप्रकारमुपसंहरति सर्वकर्माणीति सर्वकर्माणि नित्यनैमित्तिकानि काम्यानि कर्माणि पूर्वोक्तक्रमेण मद्व्यपाश्रयः सन् कुर्वा ८६
॥ णः अहमेव व्यपाश्रयः आश्रयणीयो न तु स्वर्गादि फलं यस्य सः मत्प्रसादाच्छाश्वतमनादिमव्ययं नित्यं सर्वोत्कृष्टं वैष्णवं पदं प्राप्नोति

यस्मादेवंतस्मात् चेतसेति सर्वकर्माणिचेतसामयिसंन्यस्यसमर्प्यमत्परः अहमेवपरः प्राप्यपुरुषार्थोयस्यसः व्यवसायात्मिकाबुद्ध्यायोगमा श्रित्यसततंकर्मानुष्ठानकालेपिब्रह्मार्पणंब्रह्महविरितिन्यायेनमय्येवचित्तंयस्यसतथाभूतोभव ५७ अतोयद्भविष्यतितच्छृणुमच्चित्तइति मच्चि त्तस्सन् मत्प्रसादात्सर्वाण्यपिदुर्गाणिदुस्तराणि सांसारिकाणिदुःखानितरिष्यसि विपक्षेदोषमाह अथचेद्यदिपुनस्त्वमहंकारात् ज्ञातृत्वाभिमा नात्मदुक्तमेतत्नश्रोष्यसितर्हिविनंक्ष्यसिपुरुषार्थात्भ्रंश्यसे ५८ कामंविनंक्ष्यामिनतुबंधुभिर्युद्धंकरिष्यामीतिचेत् तत्राह यदिति मदुक्तमनादृ त्यकेवलमहंकारमवलंव्य युद्धंनकरिष्यामीतित्वंयन्मन्यसेअध्यवस्यसिएषतेअध्यवसायोमिथ्यैवास्वतंत्रत्वात् तव तदेवाह प्रकृतिः त्वांरजोगुण

चेतसासर्वकर्माणिमयिसंन्यस्यमत्परः बुद्धियोगमयाश्रित्यमच्चित्तःसततंभव ५७ मच्चित्तःसर्व दुर्गाणिमत्प्रसादात्तरिष्यसि अथचेत्त्वमहंकारान्नश्रोष्यसिविनंक्ष्यसि ५८ यदहंकारमाश्रित्यनयो त्स्यइतिमन्यसे मिथ्यैवव्यवसायस्तेप्रकृतिस्त्वांनियोक्ष्यति ५९ स्वभावजेनकौंतेयनिबद्धःस्वेनकर्म णा कर्तुंनेच्छसियन्मोहात्करिष्यस्यवशोपितत् ६० ईश्वरः सर्वभूतानांहृद्देशेर्जुनतिष्ठति ॥

रूपेण परिणतासती नियोक्ष्यतियुद्धे प्रवर्त्तयिष्यत्येव ५९ किंचस्वभावजेनेति स्वभावःक्षत्रियत्वहेतुः पूर्वकर्मसंस्कारः तस्माज्जातेनस्वकीयेनक र्मणाशौर्यादिनापूर्वोक्तेननिबद्धोयंत्रितः त्वंमोहात् यत्कर्मयुद्धलक्षणंकर्तुंनेच्छसि अवशोपितत्कर्मकरिष्यस्येव ६० तदेवंश्लोकद्वयेनसांख्याधिष्ठितमते नप्रकृतिपारतंत्र्यंस्वभावपारतंत्र्यंकर्मपारतंत्र्यंचोक्तं इदानींस्वमतमाह ईश्वरइतिद्वाभ्यां सर्वभूतानांहृदयमध्येईश्वरोंतर्यामीतिष्ठति किंकुर्वन्सर्वाणिभूतानि मायया निजशक्त्या भ्रामयन् तत्तत्कर्मसुप्रवर्त्तयन् यथादारुयंत्रमारूढानिकृत्रिमानिभूतानिसूत्रधारोलोकेभ्रामयतितद्वदित्यर्थः यद्वायंत्राणिशरीराण्यारूढानिभूतानि

कृषीति कृषिः कर्षणं गां रक्षतीति गोरक्षस्तस्य भावो गोरक्ष्यं पशुपाल्यमित्यर्थः वाणिज्यं क्रयविक्रयादि एतद्वैश्यस्य स्वभावजं कर्म त्रै
वर्णिकपरिचर्यात्मकं कर्म शूद्रस्यापि स्वभावजं ४४ एवंभूतस्य ब्राह्मणादिकर्मणो ज्ञानहेतुत्वमाह स्वे स्व इति स्वस्वाधिकारविहिते कर्मणि
अभिरतः परिनिष्ठितो नरः संसिद्धिं ज्ञानयोग्यतां लभते कर्मणां ज्ञानप्राप्तिप्रकारमाह साईन स्वकर्मेति स्वकर्मपरिनिष्ठितो यथा येन प्रकारेण त
त्त्वज्ञानं लभते तं प्रकारं शृणु ४५ तमेवाह यत इति यतः अंतर्यामिनः परमेश्वरात् भूतानां प्राणिनां प्रवृत्तिश्चेष्टा भवति येन च कारणात्मना सर्वमिदं वि
श्वं ततं व्याप्तं तमीश्वरं स्वकर्मणाऽभ्यर्च्य पूजयित्वा सिद्धिं लभते मनुष्यः ४६ स्वकर्मणेति विशेषणस्य फलमाह श्रेयानिति विगुणोपि स्वधर्मः सम्य

परिचर्यात्मकं कर्म शूद्रस्यापि स्वभावजं ४४ स्वे स्वे कर्मण्यभिरतः संसिद्धिं लभते नरः स्वकर्मनिरतः सिद्धिं यथा विंद
ति तच्छृणु ४५ यतः प्रवृत्तिर्भूतानां येन सर्वमिदं ततं स्वकर्मणा तमभ्यर्च्य सिद्धिं विंदति मानवः ४६ श्रेयान्स्वधर्मो विगुणः
परधर्मात्स्वनुष्ठितात् स्वभावनियतं कर्म कुर्वन्नाप्नोति किल्बिषं ४७ सहजं कर्म कौंतेय सदोषमपि न त्यजेत् सर्वारंभा हि दो
षेण धूमेनाग्निरिवावृताः ४८ ॥ ग्नुष्ठितादपि परधर्मात् श्रेष्ठः नच बंधुवधादियुक्ताद्युद्धादेः स्वधर्मात् भिक्षाटनादिपरधर्मः श्रेष्ठः इति मं
तव्यं यतः स्वस्वभावेन पूर्वोक्तेन नियतं नियमेनोक्तं कर्म कुर्वन् किल्बिषं नाप्नोति ४७ यदि पुनः सारंभत्वात् स्वधर्मे हिंसालक्षणं दोषं मत्वा पर
धर्मं श्रेष्ठं मन्यसे तर्हि सदोषत्वं परधर्मेपि तुल्यमित्याशयेनाह सहजमिति सहजं स्वभावविहितं कर्म सदोषमपि न त्यजेत् हि यस्मात् सर्वेप्यारंभाः
दृष्टादृष्टार्थानि सर्वाण्यपि कर्माणि दोषेण केनचिदावृता व्याप्ता एव यथा सहजेन धूमेनाग्निरावृतः तद्वत् अतो यथाग्नेर्धूमरूपं दोषमपाकृ
त्य प्रताप एव तमःशीतादिनिवृत्तये सेव्यते तथा कर्मणोपि दोषांशं विहाय गुणांश एव सत्त्वशुद्धये सेव्यत इत्यर्थः ४८ ॥ ६ ॥ ॥६॥ ॥

एवंवर्त्तमानस्त्वंमत्प्रसादात् लब्धज्ञानेनमामेवैष्यसिप्राप्स्यसि अत्रचसंशयंमाकार्षीः त्वंहिमेप्रियोसिअतः सत्यंयथाभवतिएवंतुभ्यमहंप्र
तिजानेप्रतिज्ञांकरोमि ६५ ततोगुह्यतममाहसर्वधर्मानिति मद्भक्तैवसर्वंभविष्यतीतिदृढविश्वासेनसविधिकंकार्यंत्यक्त्वामदेकशरणोभवएववर्त्त
र्त्तमानःकर्मत्यागनिमित्तंपापंस्यादितिमाशुचःशोकंमाकार्षीःयतस्त्वामदेकशरणंसर्वपापेभ्योऽहंमोचयिष्यामि ६६ एवंगीतार्थमुपदिश्यतत्संप्रदाय
प्रवर्त्तनेनियममाह इदमिति इदंगीतातत्त्वंतेत्वयाऽतपस्कायस्वधर्माऽनुष्ठानहीनायनवाच्यंनचाभक्तायगुरावीश्वरेचभक्तिशून्यायकदाचिदपिन
वाच्यंनचाशुश्रूषवेपरिचर्यामकुर्वतेश्रोतुमनिच्छतेवानवाच्यं नवामांपरमेश्वरंयोभ्यसूयति मनुष्यदृष्ट्यादोषारोपेणनिंदतितस्मैचनवाच्यं ६७ ए॰

मामेवैष्यसिसत्यंतेप्रतिजानेप्रियोसिमे ६५ सर्वधर्मान्परित्यज्यमामेकंशरणंव्रज अहंत्वांसर्वपापेभ्योमोक्षयिष्यामि।
माशुचः ६६ इदंतेनातपस्कायनाभक्तायकदाचन नचाशुश्रूषवेवाच्यंनचमांयोभ्यसूयति ६७ यइदंपरमंगुह्यंमद्भक्तेष्वभिधा
स्यतिभक्तिंमयिपरांकृत्वामामेवैष्यत्यसंशयः ६८ नचतस्मान्मनुष्येषुकश्चिन्मेप्रियकृत्तमः भविताानचमेतस्मादन्यःप्रियतरोभु
वि ६९ अध्येष्यतेचयइमंधर्म्यंसंवादमावयोः॥ तैर्दोषैर्विरहितेभ्योभक्तेभ्योगीताशास्त्रोपदेष्टुः फलमाह यइममिति मद्भक्तेषुमद्भक्तेभ्योयोव
क्ष्यतिसमयिपरांभक्तिंकरोतिततोनिःसंशयःसन्मामेवप्राप्स्यति ६८ किंचनचेति तस्मात्मद्भक्तेभ्योगीताशास्त्रव्याख्यातुःसकाशादन्योमनुष्येषु
मध्येकश्चिदपिममप्रियकृत्तमः अत्यंतपरितोषकर्त्तानास्तिनचकालांतरेभविताभविष्यति ममापितस्मादन्यःप्रियतरोऽधुनाभुवितावन्नास्तिन
चकालांतरेभविताभविष्यतीत्यर्थः ६९ पठतःफलमाह अध्येष्यतइतिआवयोःकृष्णार्जुनयोरिमंधर्म्यंधर्मादनपेतंसंवादंयोध्येष्यतेजपरूपे

रामः
९०

श्रेष्ठेन ज्ञानयज्ञेनाहमिष्टः स्यां भवेयं इति मम मतिरिति यद्यप्यसौ गीतार्थमबुध्यमान एव केवलं जपति तथापि मम तत् शृण्वतो मामेवासौ प्रका
शयतीति बुद्धिर्भवतीति यथा लोके यदृच्छयापि कदाचित् कस्यचित् नाम गृह्णाति तदासौ मामयमाह्वयतीति मत्वा तत्पार्श्वमागच्छति तथैव तस्यापि
प्रसन्नो हं सन्निहितो भवेयं अत एवाजामिल क्षत्रबंधु मुख्यानां कथंचिन्नामोच्चारणमात्रेण प्रसन्नोस्मि तथैव तस्यापि प्रसन्नो भवेयमित्यर्थः ७० ॥
अन्यस्य जपतो योन्यः कश्चिच्छृणोति तस्यापि फलमाह श्रद्धावानिति यो नरः श्रद्धायुक्तः केवलं शृणुयादपि श्रद्धावानपि कश्चित् किमर्थमुच्चैर्जपति ॥

ज्ञानयज्ञेन तेनाहमिष्टः स्यामिति मे मतिः ७० श्रद्धावाननसूयश्च शृणुयादपि यो नरः सोपि मुक्तः शुभांल्लोकान्प्राप्नुयात्पुण्य
कर्मणा ७१ कच्चिदेतच्छ्रुतं पार्थ त्वयैकाग्रेण चेतसा कच्चिदज्ञानसंमोहः प्रनष्टस्ते धनंजय ७२ अर्जुन उवाच नष्टो मोहः स्मृ
तिर्लब्धा त्वत्प्रसादान्मयाच्युत स्थितोस्मि गतसंदेहः करिष्ये वचनं तव ७३ संजय उवाच इत्यहं वासुदेवस्य पार्थस्य च महात्मनः

अशुद्धं जपतीति वा द्वेषदृष्टिं करोति तद्व्यावृत्त्यर्थमाह असूयारहितो यः शृणुयात् सोपि पापैः ॥ संवादमिममश्रौषमद्भुतं रोमहर्षणं ७४
सर्वैर्मुक्तः सन् अश्वमेधादिपुण्यकृतां लोकान् प्राप्नुयात् ७१ सम्यक्बोधानुपपत्तौ पुनरुपदेक्ष्यामीत्याशयेनाह कच्चिदिति कच्चिदिति प्रश्नार्थे अज्ञानसं
मोहः तत्त्वज्ञानविपर्ययः स्पष्टमन्यत् ७२ कृतार्थः सन् अर्जुन उवाच नष्ट इति आत्मविषयो मोहो नष्टः यतः अयमहमस्मीति स्वरूपानुसंधानरूपा स्मृ
तिः त्वत्प्रसादात् मया लब्धा अतः स्थितोस्मि युद्धाय स्थितोस्मि गतो धर्मविषयः संदेहो यस्य तव आज्ञां करोमीति ७३ तदेवं धृतराष्ट्रं प्रति कृष्णार्जुनसंवादं
कथयित्वा प्रस्तुतां कथामनुसंदधानः संजय उवाच इतीति रोमहर्षणं रोमांचकरं संवादमश्रौषं श्रुतवानहं स्पष्टमन्यत् ७४ ॥ ७४ ॥

आत्मनस्तच्छ्रवणेऽसंभावनामाह व्यासेति भगवताव्यासेनदिव्यंचक्षुः श्रोत्रादिमह्यंदत्तं अतोव्यासस्यप्रसादादहंश्रुतवानस्मि किंतदित्यपेक्षायामा
हपरंयोगंपरत्वमाविष्करोति योगेश्वरादितियोगेश्वरात्श्रीकृष्णात्स्वयमेवसाक्षात्कथयतःश्रुतवानिति ७५ किंच राजन्नितिहृष्यामिरोमांचितो
भवामिहर्षंप्राप्नोमीतिवास्पष्टमन्यत् ७६ किंच तच्चेतिविश्वरूपंनिर्दिशतिस्पष्टमन्यत् १६ ७७ अतस्त्वंस्वपुत्राणांराज्यादिशंकांपरित्यजेत्याह यत्रेति य

व्यासप्रसादाच्छ्रुतवानेतद्गुह्यमहंपरं योगंयोगेश्वरात्कृष्णात्साक्षात्कथयतःस्वयं ७५ ॥
राजन्संस्मृत्यसंस्मृत्यसंवादमिममद्भुतं केशवार्जुनयोःपुण्यंहृष्यामिचमुहुर्मुहुः ७६ ॥
तच्चसंस्मृत्यसंस्मृत्यरूपमत्यद्भुतंहरेः ॥ विस्मयोमेमहान्राजन्हृष्यामिचपुनःपुनः ७७ ॥
यत्रयोगेश्वरःकृष्णोयत्रपार्थोधनुर्धरः तत्रश्रीर्विजयोभूतिर्ध्रुवानीतिर्मतिर्मम ७८ ॥

त्रयेषांपक्षेयोगमायेश्वरःश्रीकृष्णोवर्त्तते यत्रचपार्थोगांडीवधनुर्धरः तत्रश्रीःराज्यलक्ष्मीस्तत्रैवचविजयस्तत्रैवचविभूतिः उत्तरोत्तराभिवृद्धि ८८
श्चनीतिर्नयोपितत्रैवध्रुवानिश्चितेतिसर्वत्रसंबध्यते इतिममममतिर्निश्चयः अतइदानीमपितावत्सपुत्रस्त्वं श्रीकृष्णंशरणमुपेत्य पांडवान्
प्रसाद्यसर्वस्वंतेभ्योनिवेद्य पुत्रप्राणरक्षणंकुर्विति भावः ७८

नोजीवान् भ्रामयन्नित्यर्थः तथाचश्वेताश्वतराणांमंत्रः एकोदेवः सर्वभूतेषुगूढः सर्वव्यापीसर्वभूतांतरात्माकर्माध्यक्षः सर्वभूताधिवासः साक्षीचेताः केवलोनिर्गुणश्चेति अंतर्यामिब्राह्मणंचयआत्मनितिष्ठन्नात्मानमंतरोयमयति यमात्मानवेदयस्यात्माशरीरंएषतआत्मांतर्याम्य मृतइत्यादि ६१ यस्मातएवंसर्वेजीवाः परमेश्वरपरतंत्राः तस्मात् तमेवेति तस्मात् अहंकारंपरित्यज्यसर्वभावेनसर्वात्मनातमेवेश्वरमेवशरणं गच्छ ततः तस्यैवप्रसादात्परमामुपशांतिंस्थानंपारमेश्वरंशाश्वतंनित्यंप्राप्स्यसि ६२ सर्वगीतार्थमुपसंहरन्नाह इतितेज्ञानमिति इतिअनेनप्रकारेणतेतुभ्यंसर्वज्ञेनपरमकारुणिकेनमयाज्ञानमाख्यातमुपदिष्टं कथंभूतंगुह्यातगोप्यातरहस्यंमंत्रयोगादिज्ञानादपिगुह्यतरंएततमयाउपदिष्टं

भ्रामयन्सर्वभूतानियंत्रारूढानिमायया ६१ तमेवशरणंगच्छसर्वभावेनभारत तत्प्रसादात्परंशांतिंस्थानंप्रा प्स्यसिशाश्वतम् ६२ इतितेज्ञानमाख्यातंगुह्याद्गुह्यतरंमया विमृश्यैतदशेषेणयथेच्छसितथाकुरु ६३ सर्वगु ह्यतमंभूयःशृणुमेपरमंवचः इष्टोसिमेदृढमिति ततोवक्ष्यामितेहितं ६४ मन्मनाभवमद्भक्तोमद्याजीमांनमस्कुरु

तदेततगीताशास्त्रमशेषतोविमृश्यपर्यालोच्य पश्चात्त्वंयथाइच्छसितथाकुरु एतस्मिन्पर्यालोचिते सति तवमोहोनिवर्तिष्यतइतिभावः ६३ अतिगंभीरंगीताशास्त्रमशेषतः पर्यालोचयितुमशक्नुवतः कृपयास्वयमेवतस्यसारंसंगृह्यकथयति सर्वगुह्यतममितित्रिभिः सर्वेभ्योपिगु ह्येभ्योगुह्यतमंमेवचः तत्रतत्रोक्तमपिभूयःपुनरपिवक्ष्यमाणंशृणुपुनःपुनःकथनेहेतुमाह दृढमत्यंतंमेममत्वमिष्टःप्रियोसि इतिमत्वाततएवदेतो स्तेहितंवक्ष्यामियद्वात्वंममेष्टोसिमयावक्ष्यमाणंचदृढंसर्वप्रमाणोपेतमितिनिश्चित्यततस्तेवक्ष्यामीत्यर्थः दृढमतिरितिकेचित्पठंति ६४ तदेवा हमन्मनाइति मन्मनाभवमच्चित्तोभव ममैवभक्तोभवमद्याजीमद्यजनशीलोभवमामेवनमस्कुरु॥

भगवद्भक्तियुक्तस्य तत्प्रसादात्मबोधतः सुखं बंधविमुक्तिः स्यादिति गीतार्थसंग्रहः तथा हि पुरुषः स परः पार्थ भक्त्या लभ्यस्त्वनन्यया भक्त्या त्वनन्यया शक्य अहमेवंविधोऽर्जुन इत्यादौ भगवद्भक्तेर्मोक्षं प्रति साधकतमत्वश्रवणात् तदेकांतभक्तिरेव तत्प्रसादोत्पन्नज्ञानावांतरव्यापारमात्रयुक्ता मोक्षहेतुरिति स्फुटं प्रतीयते ज्ञानस्य भक्त्यवांतरव्यापारत्वमेव युक्तं तेषां सततयुक्तानां भजतां प्रीतिपूर्वकं ददामि बुद्धियोगं तं येन मामुपयांति ते इति मद्भक्त एतद्विज्ञाय मद्भावायोपपद्यते इत्यादिवचनात् न च ज्ञानमेव भक्तिरिति युक्तं समः सर्वेषु भूतेषु मद्भक्तिं लभते परां भक्त्या मामभिजानाति यावान्यश्चास्मि तत्त्वतः इत्यादौ भेदेन निर्देशात् न चैवं सति तमेव विदित्वातिमृत्युमेति नान्यः पंथा विद्यतेऽयनायेत्यादिश्रुतिविरोधः

इति श्रीमहाभारते शतसाहस्र्यां संहितायां भीष्मपर्वणि श्रीभगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे मोक्षसंन्यासयोगो नामाऽष्टादशोऽध्यायः १८ ॥ ॥ ॥ ॥

((शंकनीयः भक्त्यवांतरव्यापारत्वात् ज्ञानस्य न हि काष्ठैः पचतीत्युक्ते ज्वालानामसाधनत्वमुक्तं भवति यस्य देवे परा भक्तिर्यथा देवे तथा गुरौ तस्यैते कथिता ह्यर्थाः प्रकाशंते महात्मनः देहांते देवः परं ब्रह्म तारकं व्याचष्टे यमेवैष वृणुते तेन लभ्य इत्यादिश्रुतिस्मृतिपुराणवचनान्येवं सति समंजसानि भवंति तस्माद्भगवद्भक्तिरेव मोक्षहेतुरिति सिद्धं तेनैव सत्तया भक्त्या तद्गीताविवृतिः कृता स एव परमानंदस्तया प्रीणातु माधवः परमानंदपादाब्जरजःश्रीधारिणाऽधुना श्रीधरस्वामियतिना कृता गीतासुबोधिनी स्वप्रागल्भ्यबलाद्विलोड्य भगवद्गीतांतरं तन्तरं गंतुं तत्त्वमपेक्षरूपैति किं गुरुकृपापीयूषदृष्टिं विना अंबु स्वांजलिना निरस्य जलधेरादित्सुरंतर्मणीन् नावर्तेषु न किं निमज्जति जनः सत्कर्णधारं विना इति श्रीभगवद्गीताटीकायां सुबोधिन्यां श्रीधरस्वामीविरचितायामष्टाद

Acc. No.......... Date..........

॥इतिश्रीगीताटीकाश्रीधरीसंयुक्तासमाप्ता॥॥